आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६

सटीकशांकरपदभाष्यवाक्यभाष्योपेता

केनोपनिषत् ।

रत्नागिरिग्रामनिवासिभिर्वेदशास्त्रज्ञैर्महामहोपाध्यायैः

आगाशे इत्युपाह्वैर्बालशास्त्रिभिः संशोधिता ।

तथा

शंकरानन्दकृता केनोपनिषदीपिका नारायणविरचिता केनोपनिषद्दीपिका च ।

इदं पुस्तकद्वितयमानन्दाश्रमस्थपण्डितैः

संशोधितम् ।

एतत्पुस्तकं

बी. ए. इत्युपपदधारिणा

विनायक गणेश आपटे

इत्यनेन

पुण्याख्यपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-

महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयस्ताक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

षष्ठीयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८५६ ।

खिस्ताब्दाः १९३४ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

केनोपनिषद आदर्शपुस्तकानि शुद्धीकरणार्थं येषां मिलितानि तेषां नामानि पुस्तकानां संज्ञाश्च प्रदर्श्यन्ते ।

(क) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता 'बिब्लिओथिका इण्डिका' इति ग्रन्थावल्यां मुद्रिता पुण्यपत्तननिवासिनां कैलासवासिनां वे० शा० सं० देवोपाह्वबालशास्त्रिणाम् ।

(ख.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता काश्यां शिलामुद्रिता रा० रा० महादेव चिमणाजी आपटे इत्येतेषाम् ।

(ग.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता, इन्दूरपुरनिवासिनां क्विे इत्युपाह्वानां श्रीयुतानां रा० रा० भाऊसाहेब बाळासाहेब इत्येतेषाम् ।

(घ.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता वटोदरनिवासिनां श्रीयुतानां पटवर्धनोपाह्वानां रा० रा० कृष्णराव भीमाशंकर इत्येतेषाम् ।

(ङ.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता वे० शा० सं० रा० रा० दिनकरशास्त्री जोशी नागावकर इत्येतेषाम् । लेखनकालः सं० १८६२

(च.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता बडलीग्रामनिवासिनां श्रीयुतानां वे० शा० सं० रा० रा० चिदम्बरदीक्षितकुलोत्पन्नानां मार्तण्डदीक्षितानाम् । लेखनकालः शके १७६७

(छ.) इतिसंज्ञिता—केनोपनिषत्पुण्यपत्तननिवासिनां श्रीयुतानां रा० रा० भाऊसाहेब नगरकर इत्येतेषाम् ।

(ज.) इतिसंज्ञिता—केनोपनिषत्पुण्यपत्तननिवासिनां श्रीमतां पुरंदरे इत्युपाह्वानां मल्हारराव इत्येतेषाम् ।

(झ.) इतिसंज्ञितम्—केनोपनिषत्पदभाष्यं सटीकं करवीरपुरनिवासिनां वे० शा० सं० द्रविडोपाह्वानां नानाशास्त्रिणाम् ।

(ञ.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता करवीरपुरनिवासिनां श्रीमतां वे० शा० सं० गुरुमहाराजानाम् । लेखनकालः सं० १८७८

(ट.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता अष्टेग्रामनिवासिनां लिमये इत्युपाह्वानां रा० रा० गोविन्दशर्मणाम् ।

(ठ.) इतिसंज्ञिता—केनोपनिषत्सटीकपदभाष्योपेता नागपुरनिवासिनां श्रीयुतानां रा० रा० अप्पासाहेब बुटी इत्येतेषाम् ।

(क.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता वडलीग्रामनिवासिनां श्रीयुतानां वे० शा० सं० रा० रा० चिदम्बरदीक्षितकुलोत्पन्नानां मार्तण्डदीक्षितानाम् । लेखनकालः शके १७६७

(ख.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता, इन्दूरपुरनिवासिनां किबे इत्युपाह्वानां श्रीयुतानां भाऊसाहेब बाळासाहेब इत्येतेषाम् ।

(ग.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता वे० शा० सं० रा० रा० दिनकरशास्त्री जोशी नागावकर इत्येतेषाम् । लेखनकालः सं० १८६६

(घ.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता वटोदरानिवासिनां श्रीयुतानां पटवर्धनोपाह्वानां रा० रा० कृष्णराव भीमाशंकर इत्येतेषाम् ।

(ङ.) इतिसंज्ञितम्—केनोपनिषद्वाक्यभाष्यं विंचूरपुरनिवासिनां श्रीयुतानां रा० रा० रावसाहेब अण्णासाहेब इत्येतेषाम् । लेखनकालः शके १६३२

(च.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता मुम्बापुरनिवासिनां वे० शा० सं० रा० रा० जयकृष्णमहाराजानाम् ।

(छ.) इतिसंज्ञितम्—केनोपनिषद्वाक्यभाष्यं सटीकं करवीरपुरनिवासिनां वे० शा० सं० रा० रा० द्रविडोपाह्वानां नानाशास्त्रिणाम् ।

(ज.) इतिसंज्ञितम्—केनोपनिषद्वाक्यभाष्यं करवीरपुरनिवासिनां श्रीमतां वे० शा० सं० गुरुमहाराजानाम् । लेखनकालः शके १६९५

(झ.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्योपेता करवीरपुरनिवासिनां श्रीमतां वे० शा० सं० गुरुमहाराजानाम् ।

(अ.) इतिसंज्ञिता—केनोपनिषत्सटीकवाक्यभाष्यबोधेता नागपुरनिवासिनां श्रीयुतानां रा० रा० अप्पासाहेब बुटी इत्येतेषाम् ।

(क.) इतिसंज्ञिता—केनोपनिषद्दीपिका मुम्बापुरनिवासिनां वे० शा० सं० रा० रा० जयकृष्णमहाराजानाम् ।

(ख.) इतिसंज्ञिता—केनोपनिषद्दीपिका वटोदरनिवासिनां श्रीयुतानां पटवर्धनोपाह्वानां रा० रा० कृष्णराव भीमाशंकर इत्येतेषाम् ।

(ग.) इतिसंज्ञिता—केनोपनिषद्दीपिका मूलयुता ×

(क.) इतिसंज्ञिता—केनोपनिषद्दीपिका नारायणविरचिता, पुण्यपत्तननिवासिनां श्रीयुतानां रा० रा० भाऊसाहेब नगरकर इत्येषाम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

× इदं भ्रान्तिवशकाशात्प्राप्तम् । एतत्पुस्तकस्य स्वामिनो नाम न ज्ञायते ।

अथास्याः केनोपनिषदो मन्त्रप्रतीकानां वर्णानुक्रमणिका ।

—:⊙:—

मन्त्रप्रतीकानि					खं०	मं०	पृ०
			अ.				
अथ वायुमब्रुवन्वायो	....	...	....	....	३	७	२४
अथाध्यात्मं यदेतत्	....	...	...	...	४	५	२७
अथेन्द्रमब्रुवन्मघवन्	...	....	....	....	३	११	२५
			इ.				
इह चेदवेदीदथ	...	....	....	....	२	५	२१
			उ.				
उपनिषदं भो ब्रूहि	...	...	....	....	४	७	२८
			क.				
केनेषितं पतति प्रेषितं मनः		....	...	....	१	१	४
			त.				
तदभ्यद्रवत्तमभ्यवदत्	....	....	....	....	३	४	२४
” ”	...	....	...	...	”	८	”
तद्ध तद्वनं नाम	....	...	...	....	४	१	२८
तद्धैषां विजज्ञौ	....	....	...	....	३	२	२३
तस्माद्वा इन्द्रोऽतितराम्	...	....	....	....	४	३	२६
तस्माद्वा एते देवाः	...	....	...	...	४	२	२१
तस्मिꣳस्त्वयि किं वीर्यम्	....	...	....	...	३	५	२४
” ”	....	....	....	....	”	९	२५
तस्मै तृणं निदधौ	....	....	....	....	३	६	२४
” ”	...	....	...	...	”	१०	२५
तस्यै तपो दमः कर्मेति	...	....	....	....	४	८	३०
तस्यैष आदेशो यदेतत्	....	....	....	...	४	४	२७
तेऽग्निमब्रुवञ्जातवेदः	....	....	....	....	३	३	२३
			न.				
न तत्र चक्षुर्गच्छति	...	...	....	...	१	३	८
नाहं मन्ये सुवेदेति	...	....	....	...	३	३	१६

मन्त्रप्रतीकानि					ख०	म०	पृ०
			प.				
प्रतिबोधविदितम्	....	....	....	....	२	४	१७
			ब.				
ब्रह्म ह देवेभ्यः	....	....	...	....	३	१	२२
			य.				
यच्चक्षुषा न पश्यति	...	...	....	...	१	६	१२
यच्छ्रोत्रेण न शृणोति	...	...	....	....	१	७	१३
यत्प्राणेन प्राणिति	...	....	....	...	१	८	१३
यदि मन्यसे सुवेदेति	...	...	....	...	२	२	१३
यद्वाचाऽनभ्युदितम्	....	....	...	...	१	४	११
यन्मनसा न मनुते	....	...	....	...	१	५	१२
यस्यामतं तस्य मतम्	....	...	....	....	२	३	१६
यो वा एतामेषम्	....	....	...	....	४	९	३१
			श.				
श्रोत्रस्य श्रोत्रम्	...	...	....	....	१	२	६
			स.				
स तस्मिन्नेवाऽऽकाशे	....	....	...	...	३	१२	१५
सा ब्रह्मेति होवाच	....	....	....	...	४	१	२६

समाप्तिमगमदियं वर्णानुक्रमणिका ।

ॐ तत्सद्ब्रह्मणे नमः ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता

केनोपनिषत् ।

—:⊙:—

अथ श्रीमच्छंकरभगवत्पादविरचितं भाष्यम् ।

केनेषितमित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्याऽऽरम्भः । प्रागेतस्मात्कर्माण्यशेषतः परिसमापितानि समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि कर्माङ्गसामविषयाणि च । अनन्तरं च गायत्रसामविषयं दर्शनं वंशान्तमुक्तं कार्यं सर्वमेतद्यथोक्तं कर्म च ज्ञानं च सम्यगनुष्ठितं निष्कामस्य मुमुक्षोः सत्त्वशुद्ध्यर्थं भवति । सकामस्य तु ज्ञानरहितस्य केवलानि श्रौतानि स्मार्तानि च कर्माणि दक्षिणमार्ग-

---

अथाऽऽनन्दगिरिकृता टीका ।

यच्छ्रोत्रादेरधिष्ठानं चक्षुर्वागाद्यगोचरम् ।
स्वतोऽध्यक्षं परं ब्रह्म नित्यमुक्तं भजामि तत् ॥

केनेषितमित्यादिकां तलवकारशाखोपनिषदं व्याचिख्यासुर्भगवान्भाष्यकारोऽहंप्रत्यय-गोचरस्याऽऽत्मनः संसारित्वादसंसारिब्रह्मभावस्योपनिषत्प्रतिपाद्यस्यासंभवान्निर्विषयत्वा-दव्याख्येयत्वमित्याशङ्क्याहंकारसाक्षिणः संसारित्वग्राहकप्रमाणाविषयत्वाद्ब्रह्मत्वप्र-तिपादने विरोधासंभवात्सविषयत्वाद्व्याख्येयत्वं प्रतिजानीते—केनेषितमित्याद्येति । कस्तर्हि नवमस्याध्यायस्याष्टाध्याय्या सह नियतपूर्वोत्तरभावानुपपत्तिलम्भः संबन्ध इत्याशङ्क्य हेतुहेतुमद्भावलक्षणसंबन्धं दर्शयितुं वृत्तमनुवदति—प्रागेतस्मादित्यादिना । कर्माङ्गसाम पाञ्चभक्तिकं साप्तभक्तिकं च तद्विषयाण्युपासनानि पृथिव्यादिदृष्ट्यो-क्तानि । प्राणदृष्ट्या गायत्रसामोपासनं च । शिष्याचार्यसंतानाविच्छेदो वंशस्तदव-सानेन ग्रन्थेन कार्यरूपमेव वस्तूक्तं चेत्तर्हि प्राणाद्युपासनसहितस्य कर्मणः संसारफल-त्वाद्ब्रह्मज्ञानानुपयोगात्कथं हेतुहेतुमद्भावः संबन्धोऽभिधित्सित[1] इत्याशङ्क्य नित्यक-र्मणां तावज्ज्ञानोपयोगित्वं कथयति—सर्वमेतादिति । काम्यानां प्रतिषिद्धानां च फलं तद्दोषदर्शनेन वैराग्यार्थं कथयति—सकामस्य त्विति । एतयोः पथोर्ज्ञान-

---

१ क. ख. च. ञ. °न्धोऽविधित्सत । २ ग. घ. ङ. झ. ट. °णां फलं तावज्ज्ञानोपयोगि क° ।

प्रतिपत्तये पुनरावृत्तये च भवन्ति । स्वाभाविक्या त्वशास्त्रीयया प्रवृत्त्या पश्वादिस्थावरान्ताऽधोगतिः स्यात् । " अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम् " इति श्रुतेः । " प्रजा ह तिस्रो अत्यायमीयुः " इति मन्त्रवर्णाद्विशुद्धसत्त्वस्य तु निष्कामस्यैव बाह्यादनित्यात्साध्यसाधनसंबन्धादिह कृतात्पूर्वकृताद्वा संस्कारविशेषोद्भवाद्विरक्तस्य प्रत्यगात्मविषया जिज्ञासा प्रवर्तते । तदेतद्वस्तु प्रश्नप्रतिवचनलक्षणया श्रुत्या प्रदर्श्यते केनेषितमित्याद्यया । काठके चोक्तम्—" पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् " इत्यादि । " परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन " " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इत्याद्यथर्वणे च । एवं विरक्तस्य प्रत्यगात्मविषयं विज्ञानं श्रोतुं मन्तुं विज्ञातुं च सामर्थ्यमुपपद्यते नान्यथा । एतस्माच्च प्रत्यगात्मब्रह्मविज्ञानात्संसारबीजमज्ञानं कामकर्मप्रवृत्तिकारणमशेषतो निवर्तते । " तत्र को मोहः कः शोक एकत्वमनुपश्यतः " इति मन्त्रवर्णात् । " तरति शोकमात्मवित् " इति,

---

कर्मणोर्मध्ये केनापि मार्गेण ये न प्रवृत्तास्ते प्रतिषिद्धानुष्ठायिन इत्यर्थः । जायस्व म्रियस्वेति । पुनः पुनर्जायन्ते म्रियन्ते चेत्यर्थः । तिस्रः प्रजा जरायुजाण्डजोद्भिज्जलक्षणाः पितृयाणदेवयानलक्षणमार्गद्वयगमनमतीत्य कष्टामेव गतिमीयुः प्राप्ता इत्यर्थः । एवं कर्मफलमुक्त्वा ततो विरक्तस्य विशुद्धसत्त्वस्य ब्रह्मज्ञानेऽधिकार इति दर्शयन्हेतुहेतुमद्भावमाह—विशुद्धसत्त्वस्य त्विति । साध्यसाधनसंबन्धाद्विरक्तस्येति संबन्धः । तत्र निमित्तस्यादृष्टस्यानियतत्वमाह—इह कृतादिति । कर्मफलाद्विरक्तस्य ब्रह्मजिज्ञासा भवतीत्यत्रान्यसंवादमाह—काठके चेति । आवृत्तचक्षुरिति[4] । साध्यसाधनभावादुपरतकरणग्रामश्चक्षुर्ग्रहणस्योपलक्षणार्थत्वात् । अन्वयव्यतिरेकसिद्धत्वं चाऽऽह—एवं हीति । नान्यथेति । अविरक्तस्य बहिर्विषयासक्तचेतस आत्मजिज्ञासैवानुपपन्ना कथंचिज्ज्ञाताऽपि न फलावसाना स्याच्छ्रद्धयागादिवदित्यर्थः । यद्यप्येवमुपनिषदः कर्मकाण्डसंबन्धोऽस्ति तथाऽप्युपनिषज्जन्यज्ञानस्य निष्प्रयोजनत्वान्नोपनिषदो व्याख्यारम्भः संभवतीत्याशङ्क्याऽऽह—एतस्माच्चेति । समुच्चयवादिनोऽ-

---

१ क. ख. घ. ङ. °वृतच्च° । २ क. ख. च. ङ. प्रजाः स्वेदजा° । ३ क. ख. घ. ङ. °वृतच्च° । ४ ग, ङ. ट. °ति कार्यकारणभा° ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

इत्यादिश्रुतिभ्यश्च । कर्मसहितादपि ज्ञानादेतत्सिध्यतीति चेन्न । वाजसनेयके तस्यान्यकारणत्ववचनात् । " जाया मे स्यात् " इति प्रस्तुत्य " पुत्रेणायं लोको जय्यो नान्येन कर्मणा । कर्मणा पितृलोको विद्यया देवलोकः " इत्यात्मनोऽन्यस्य लोकत्रयस्य कारणत्वमुक्तं वाजसनेयके । तत्रैव च पारिव्राज्यविधाने हेतुरुक्तः—" किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः " इति । तत्रायं हेत्वर्थः—प्रजाकर्मतत्संयुक्तविद्याभिर्मनुष्यपितृदेवलोकत्रयसाधनैरनात्मलोकप्रतिपाद्यैः किं करिष्यामो न चास्माकं लोकत्रयमनित्यं साधनसाध्यमिष्टं येषामस्माकं स्वाभाविकोऽजोऽजरोऽमृतोऽभयो न वर्धते कर्मणा नो कनीयानित्यश्च लोक इष्टः । स च नित्यत्वान्नाविद्यानिवृत्तिव्यतिरेकेणान्यसाधननिष्पाद्यस्तस्मात्प्रत्यगात्मब्रह्मविज्ञानपूर्वकः सर्वैषणासंन्यास एव कर्तव्य इति । कर्मसहभावित्वविरोधाच्च प्रत्यगात्मब्रह्मविज्ञानस्य । न ह्युपात्तकारकफलभेदविज्ञानेन कर्मणा प्रत्यस्तमितसर्वभेददर्शनस्य प्रत्यगात्मब्रह्मविषयस्य सहभावित्वमुपप-

---

मिप्रायं शङ्कते—कर्मसहितादपीति । एकाध्ययनविधिपरिगृहीतत्वात्कर्मज्ञानकाण्डयोरेकं फलं वाच्यं ततः कर्मसमुच्चिताज्ज्ञानात्सनिदानसंसारनिवृत्तिलक्षणं फलं सिध्यतीति न कर्मसु विरक्तस्योपनिषदारम्भ इत्यर्थः । अध्ययनविधिपरिग्रहमात्रेण कर्मकाण्डस्य न मोक्षफलत्वं कल्पयितुं शक्यं फलान्तरावगमविरोधादित्याह—न । वाजसनेयक इति । किंच यदि श्रुतेः कर्मसमुच्चितज्ञानं विधित्सितं स्यात्तदा पारिव्राज्यं नोपदिश्येत श्रुत्या हेत्वभिधानेन ततो न समुच्चयः श्रुत्यर्थ इत्याह—तत्रैव चेति । प्रजाशब्दस्योपलक्षणार्थत्वमादाय हेत्वर्थमाह—तत्रायमिति । किं करिष्यामो न किमप्यात्मकामत्वादेवेति शेषः । तत्फलं भुक्त्वा क्रमेण मोक्षसंभवात्किमिति प्रजादिष्वनादर इत्याशङ्क्याऽऽह—न चेति । इष्टोऽप्ययमात्मलोकः कर्मणा विना न लभ्यते फलत्वान्मोक्षस्यान्यथास्वभावमुक्तत्वे बन्धमोक्षावस्थयोरविशेषापातादित्याशङ्क्याऽऽह—स चेति । कर्ममोक्षे कार्यस्योत्पाद्यादेरसंभवात्सम्यग्ज्ञानादविद्यानिवृत्त्या फलप्रसिद्ध्युपपत्तेर्न कर्मकार्यो मोक्ष इत्यर्थः । ब्रह्मज्ञानस्यानुभवावसानतासिद्धये परोक्षनिश्चयपूर्वकः संन्यासः कर्तव्यः । सिद्धे चानुभवावसाने ब्रह्मात्मज्ञाने स्वभावप्राप्तः संन्यास इति द्रष्टव्यम् । इतश्च न कर्मब्रह्मात्मतानिश्चयसमुच्चयः शास्त्रार्थ इत्याह—कर्मसहभावित्वेति । ननु कर्मवद्ब्रह्मज्ञानस्य विधितोऽनुष्ठेयत्वाद्विधेश्च विनियोज्यादिभेदापेक्षितत्वात्कथं सर्वभेददर्शनप्रत्यस्तमय

---

१ क. ख. °त्मा नायं ।

सामवेदीयतलवकारोपनिषत् ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ।

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ।

ॐ केनेषितं पतति

यते । वस्तुमाधान्ये सत्यपुरुषतन्त्रत्वद्ब्राह्मविज्ञानस्य । तस्माद्दृष्टादृष्टेभ्यो बाह्यसाधनसाध्येभ्यो विरक्तस्य प्रत्यगात्मविषया ब्रह्मजिज्ञासेयं केनेषितमित्यादिश्रुत्या प्रदर्श्यते । शिष्याचार्यप्रश्नप्रतिवचनरूपेण कथनं तु सूक्ष्मवस्तुविषयत्वात्सुखप्रतिपत्तिकारणं भवति । केवलतर्कागम्यत्वं च दर्शितं भवति । " नैषा तर्केण मतिरापनेया " इति श्रुतेश्च । " आचार्यवान्पुरुषो वेद " " आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् " इति । " तद्विद्धि प्रणिपातेन " इत्यादिश्रुतिस्मृतिनियमाच्च । कश्चिद्दुरुं ब्रह्मनिष्ठं विधिवदुपेत्य प्रत्यगात्मविषयादन्यत्र शरणमपश्यन्नभयं नित्यं शिवमचलमिच्छन्पप्रच्छेति कल्प्यते । केनेषितमित्यादि । केनेषितमिति केन कर्त्रेषितमिष्टमभिप्रेतं सन्मनः पतति गच्छति स्वविषयं प्रतीति संबध्यते ।

उच्यते ब्रह्मज्ञाने सतीत्याशङ्क्याऽऽह—वस्तुमाधान्ये सतीति । विधिजन्यप्रयत्नमाध्यो हि विधिविषय उच्यते ज्ञानं न तथेति तद्विषेरसिद्धिरित्यर्थः । यस्मात्प्रत्यगात्मनो ब्रह्मतानिश्चयस्य परोक्षस्यापरोक्षस्य वा कर्मणा समुच्चयो न प्रामाणिकस्तस्मादित्युपसंहरति—तस्मादिति । प्रश्नप्रतिवचनरूपेण प्रतिपादनस्य तात्पर्यमाह—शिष्याचार्येति । आपनेया प्रापणीया हन्तव्या वा न भवतीत्यर्थः । साधिष्ठं शोभनतमं फलं प्रापयतीत्यर्थः । इष आभीक्ष्ण्ये गतौ चेति धात्वन्तरसंभवे कथमिच्छार्थस्यैव व्याख्यानमित्या-

प्रेषितं मनः ।

इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासंभवादिच्छार्थस्यैवैतद्रूपमिति गम्यते । इषितमितीट्प्रयोगस्तु च्छान्दसस्तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमित्येवत् । तत्र प्रेषितमित्येवोक्ते प्रेषयितृप्रेषणविशेषविषयाकाङ्क्षा स्यात् । केन प्रेषयितृविशेषेण । कीदृशं वा प्रेषणमिति । इषितमिति तु विशेषणे सति तदुभयं निवर्तते । कस्येच्छामात्रेण प्रेषितमित्यर्थविशेषनिर्धारणाद्यद्येषोऽर्थोऽभिप्रेतः स्यात्केनेषितमित्येतावतैव सिद्धत्वात्प्रेषितमिति न वक्तव्यम् । अपि च शब्दाधिक्यादर्थाधिक्यं युक्तमितीच्छया कर्मणा वाचा वा केन प्रेषितमित्यर्थविशेषोऽवगन्तुं युक्तः । न प्रश्नसामर्थ्याद्देहादिसंघातादनित्यात्कर्मकार्याद्विरक्तोऽतोऽन्यत्कूटस्थं नित्यं वस्तु बुभुत्समानः पृच्छतीति सामर्थ्यादुपपद्यते । इतरथेच्छावाक्कर्मभिर्देहादिसंघातस्य प्रेरयितृत्वं प्रसिद्धमिति प्रश्नोऽनर्थक एव स्यात् । एवमपि प्रेषितशब्दस्यार्थो न प्रदर्शित एव न संशयवतोऽयं प्रश्न इति प्रेषितशब्दस्यार्थविशेष उपपद्यते । किं यथामासिद्धमेव कार्यकारणसंघातस्य प्रेषयितृत्वं किंवा संघातव्यतिरिक्तस्य स्वतन्त्रस्येच्छामात्रेणैव मनआदिप्रेषयितृत्वमित्यस्यार्थस्य प्रदर्शनार्थं केनेषितं पतति

शङ्कयाऽऽह—इषेरिति । आभीक्ष्ण्यं पौनःपुन्यं तद्विषयताया गतिविषयताया वा मनसोऽनभिप्रेतत्वान्मनःप्रवर्तकविशेषस्यैव बुभुत्सितत्वादित्यर्थः । = इट्प्रयोगे सति गुणेन भवितव्यम् । तदैषितमिति स्यात्तदभावाच्छान्दसत्वामिधानं न तु धातोरनिट्त्वादनुबन्धस्य विकल्पविधानादन्वेषितमन्विष्टं वेति वैकल्पिकप्रयोगादर्शनादिति । इषितं प्रेषितमिति पदद्वयस्यार्थवत्त्वमाह—तत्र प्रेषितमित्यादिना । इच्छामात्रेणेति । प्रयत्नमन्तरेण संनिधिमात्रेणेति व्याख्यातं नेदं व्याख्यानमपि शोभते । अपर्यायशब्दभेदस्यार्थभेदव्यभिचारादित्याह—अपि चेति । त्वदुक्तोऽयमर्थविशेषो न घटते संघातस्यैवेच्छादिभिः प्रवर्तकत्वसिद्धेः प्रश्नानुपपत्तिप्रसङ्गादित्याह—न प्रश्नोत । मनसः स्वातन्त्र्या-

= सेट्कस्येषिविषये किंत्वनिषेधाभावात्क्ङिति चेति निषेधप्रसक्त्या गुणेन भवितव्यमिति चिन्त्यम् । धातोरनिट्त्वाभावेऽपि यथाकथंचिदनुबन्धशब्देनेटो ग्रहणेऽपि तीषसहेति विकल्पे सत्यपि यस्य विभाषेति क्त्स्येण्निषेधाद्वैकल्पिकप्रयोगादिति पुस्तकान्तरीयपाठोऽपि चिन्त्यः । प्रयोगादर्शनादिति पाठेऽपि यस्य विभाषेति निषेधपूरणमपेक्ष्यमेव । ण्यन्तेषिणा गुणसमर्थनं तु गुणस्येण्निनित्तत्वाभावेनेटि सतीत्यक्षराननुगुणम् । प्रेषितशब्दे प्रेरणास्वीकारादिषितशब्दे ण्यर्थानुपयोगेन भाष्यानभिप्रेतं च । अनुबन्धस्येत्याद्युत्तरग्रन्थासंबद्धं चेति ज्ञेयम् ।

१ ग, घ. ङ. च. झ. ञ. ट. 'गादि' ।

केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां
वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥१॥ श्रो स्य श्रोत्रं

प्रेषितं मन इति विशेषणद्वयमुपपद्यते । ननु स्वतन्त्रं मनः स्वविषये स्वयं वर्तत इति प्रसिद्धम् । तत्र कथं प्रश्न उपपद्यत इति । उच्यते । यदि स्वतन्त्रं मनः प्रवृत्तिनिवृत्तिविषयं स्यात्तर्हि सर्वस्यानिष्टचिन्तनं न स्यादनर्थं च जानन्संकल्पयति । अत्युग्रदुःखे च कार्ये वार्यमाणमपि प्रवर्तत एव मनस्तस्माद्युक्त एव केनेषितमित्यादिप्रश्नः । केन प्राणो युक्तो नियुक्तः प्रेरितः सन्प्रैति गच्छति स्वव्यापारं प्रति । प्रथम इति प्राणविशेषणं स्यात्तत्पूर्वकत्वात्सर्वेन्द्रियवृत्तीनाम् । केनेषितां वाचमिमां शब्दलक्षणां वदन्ति लौकिकाः । तथा चक्षुः श्रोत्रं च स्वे स्वे विषये क उ देवो द्योतनवान्युनक्ति नियुङ्क्ते प्रेरयति ॥ १ ॥

एवं पृष्टवते योग्यायाऽऽह गुरुः शृणु त्वं यत्पृच्छासि । मनआदिकरणजातस्य को देवः स्वविषयं प्रति प्रेरयिता कथं वा प्रेरयतीति । श्रोत्रस्य श्रोत्रं शृणोत्यनेनेति श्रोत्रं शब्दस्य श्रवणं प्रति करणं शब्दाभिव्यञ्जकं श्रोत्रमिन्द्रियं तस्य श्रोत्रं स यस्त्वया पृष्टश्चक्षुः श्रोत्रं क उ देवो युनक्तीति । असावेवंविशिष्टः श्रोत्रादीनि नियुङ्क्त इति वक्तव्ये नन्वेतदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रमिति । नैष दोषः । तस्यान्यथाविशेषानवगमात् । यदि हि श्रोत्रादिव्यापारव्यतिरिक्तेन स्वव्यापारेण विशिष्टः श्रोत्रादिनियोक्ताऽवगम्येत दात्रादिप्रयोक्तृवत्तदेदमननुरूपं प्रतिवचनं स्यात् । न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापारविशिष्टो लवित्रादिवदधिगम्यते । श्रोत्रादीनामेव तु संहतानां व्यापारेणाऽऽलोचनसंकल्पाध्यवसायलक्षणेन फलावसानलिङ्गेनावगम्यते । अस्ति हि श्रोत्रादिभिरसंहतो यत्प्रयोजनमयुक्तः

त्स्वव्यतिरिक्तप्रवर्तकसंभावनाभावात्प्रश्नो न घटत इत्याक्षिप्य समाधत्ते—ननु स्वतन्त्रमित्यादिना । अत्युग्रदुःखे चेति । अद्यतनीदुःखे द्यूतादिकार्ये ॥ १ ॥

प्रतिवचनस्य प्रश्नाननुरूपत्वमाशङ्क्य समाधत्ते—असावेवंविशिष्ट इत्यादिना । श्रोत्रादयः स्वविलक्षणशेषाः संहतत्वाद्गृहादिवदित्यनुमानेन श्रोत्रादिशेषी तावदवगम्यते यदि सोऽपि संहतः स्यात्तर्हि गृहादिवदचेतनः स्यात् । ततस्तस्याप्यन्यः शेषी कल्प्यस्तस्याप्यन्य इत्यनवस्थाप्रसङ्गपरिहारायासंहतश्चेतनो गम्यते । अतः सर्वसाक्षिणं लक्षयितुं युक्तमेव प्रतिवचनमित्यर्थः । फलावसानं फलनिष्पत्तिर्लिङ्गम् । यस्मिन्नवगत्या हि करणस्य व्यापारो लिङ्ग्यते नित्यावगतिव्यञ्जकत्वाद्वा फलावसानलिङ्गं

मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राण-

श्रोत्रादिकलापो गृहादिवादिति संहतानां परार्थत्वादवगम्यते श्रोत्रादीनां प्रयोक्ता। तस्मादनुरूपमेवेदं प्रतिवचनं श्रोत्रस्य श्रोत्रमित्यादि कः पुनरत्र पदार्थः श्रोत्रस्य श्रोत्रमित्यादेः। नह्यत्र श्रोत्रस्य श्रोत्रान्तरेणार्थः। यथा प्रकाशस्य प्रकाशान्तरेण। नैष दोषोऽयमत्र पदार्थः—श्रोत्रं तावत्स्वविषयव्यञ्जनसमर्थं दृष्टम्। तच्च स्वविषयव्यञ्जनसामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्मज्योतिषि नित्ये संहते सर्वान्तरे सति भवति नासतीत्यतः श्रोत्रस्य श्रोत्रमित्याद्युपपद्यते। तथा च श्रुत्यन्तराणि—"आत्मनैवायं ज्योतिषाऽऽस्ते" "तस्य भासा सर्वमिदं विभाति" "येन सूर्यस्तपति तेजसेद्धः" इत्यादीनि।

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्'।

'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत' ॥ इत्यादि गीतासु।

काठके च—"नित्यो नित्यानां चेतनश्चेतनानाम्" इति। श्रोत्रादेव सर्वस्याऽऽत्मभूतं चेतनमिति प्रसिद्धं तदिह निवर्त्यते। अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजरममृतमभयमजं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तमिति प्रतिवचनं शब्दार्थश्चोपपद्यत एव। तथा मनसोऽन्तःकरणस्य मनः। न ह्यन्तःकरणमन्तरेण चैतन्यज्योतिषा दीपितं स्वविषयसंकल्पाध्यवसायादिसमर्थं स्यात्। तस्मान्मनसोऽपि मन इति। इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति। यद्वाचो ह वाचं यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः संबध्यते। यस्माच्छ्रोत्रस्य श्रोत्रम्। यस्मान्मनसो मन इत्येवम्। वाचो ह वाचमिति द्वितीया प्रथमात्वेन विपरिणम्यते। प्राणस्य प्राण इति दर्शनात्। वाचो ह वाचमित्येतदनुरोधेन प्राणस्य प्राणमिति कस्माद्द्वितीयैव न क्रियते। न। बहूनामनुरोधस्य युक्तत्वाद्वाचमित्यस्य वागित्येतावद्वक्तव्यं स उ प्राणस्य प्राण इति शब्दद्वयानुरोधेन। एवं हि बहूनामनुरोधो युक्तः कुतः स्यात्। पृष्टं च वस्तु प्रथमयैव निर्देष्टुं युक्तम्। स यस्त्वया पृष्टः प्राणस्य प्राणाख्यवृत्तिविशेषस्य प्राणस्तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम्। न ह्यात्मनाऽनधिष्ठितस्य प्राणनमुपपद्यते। "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" "ऊर्ध्वं प्राणमुन्न-

व्यापारस्तेन तच्छेषी लक्ष्यत इत्यर्थः। प्रतिवचनस्य संक्षेपतस्तात्पर्यमाह—श्रोत्रादेव सर्वस्येति। यस्मादस्ति श्रोत्रस्य श्रोत्रं तस्माच्छ्रोत्रादावात्मबुद्धिः संत्यक्तव्येति शेषः। प्राणचेष्टा चेतनाधिष्ठानपूर्विकाऽचेतनप्रवृत्तित्वाद्वह्वादिप्रवृत्तिवदित्यभिप्रेत्याऽऽह—न ह्यात्मनाऽनधिष्ठितस्येति। ज्ञात्वेति पदाध्याहारे कारणमाह—पृष्टः पृष्ट-

श्चक्षुषश्चक्षुः । अतिमुच्य धीराः प्रेत्या-
स्माल्लोकादमृता भवन्ति ॥ २ ॥ न तत्र

यत्त्वपानं प्रत्यगस्यति " इत्यादिश्रुतिभ्यः । इहापि च वक्ष्यते—" येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि " इति । श्रोत्रादीन्द्रियप्रस्तावे घ्राण-प्राणस्य ननु युक्तं ग्रहणम् । सत्यमेवं प्राणग्रहणेनैव तु घ्राणप्राणस्य ग्रहणं कृतम् । एवं मन्यते श्रुतिः सर्वस्यैव करणकलापस्य यदर्थमयुक्ता प्रवृत्तिस्त-द्ब्रह्मेति प्रकरणार्थो विवक्षितः । तथा चक्षुषश्चक्षूरूपप्रकाशकस्य चक्षुषो यद्रूपग्र-हणसामर्थ्यं तदात्मचैतन्याधिष्ठितस्यैवातश्चक्षुषश्चक्षुः । प्रष्टुः पृष्टस्यार्थस्य ज्ञातु-मिष्टत्वाच्छ्रोत्रादेः श्रोत्रादिलक्षणं यथोक्तं ब्रह्म ज्ञात्वेत्यध्याहियते । अमृता भवन्तीति फलश्रुतेश्च । ज्ञानाद्धयमृतत्वं प्राप्यते । ज्ञात्वा विमुच्यत इति सामर्थ्याच्छ्रोत्रादिकरणकलापमुज्झित्वा । श्रोत्रादौ ह्यात्मभावं कृत्वा तदु-पाधिः संस्तदात्मना जायते म्रियते संसरति च । अतः श्रोत्रादेः श्रोत्रादि-लक्षणं ब्रह्माऽऽत्मेति विदित्वाऽतिमुच्य श्रोत्राद्यात्मभावं परित्यज्य ये श्रो-त्राद्यात्मभावं परित्यजन्ति ते धीरा धीमन्तः । नहि विशिष्टधीमत्त्वमन्तरेण श्रोत्राद्यात्मभावः शक्यः परित्यक्तुम् । प्रेत्य व्यावृत्त्यास्माल्लोकात्पुत्रमित्र-कलत्रबन्धुषु ममाहंभावसंव्यवहारलक्षणात्त्यक्तसर्वैषणा भूत्वेत्यर्थः । अमृता अमरणधर्माणो भवन्ति । " न कर्मणा न प्रजया धनेन त्यागेनैके अमृत-त्वमानशुः" " पराञ्चि खानि व्यतृणत् " " आवृत्तचक्षुरमृतत्वमिच्छन् " यदा सर्वे प्रमुच्यन्ते " " अत्र ब्रह्म समश्नुते " इत्यादिश्रुतिभ्यः । अथ-वाऽतिमुच्येत्यनेनैवैषणात्यागस्य सिद्धत्वादस्माल्लोकात्प्रेत्यास्माच्छरीरात्प्रेत्य मृत्वेत्यर्थः ॥ २ ॥

यस्माच्छ्रोत्रादेरपि श्रोत्राद्यात्मभूतं ब्रह्मातो न तत्र तस्मिन्ब्रह्मणि चक्षु-

---

स्यार्थस्येति । सामर्थ्यादिति । श्रोत्राद्यात्मभावत्यागमन्तरेणामृतत्वासंभवाज्ज्ञान-बलाच्छ्रोत्राद्यात्मभावं त्यक्त्वाऽमृता भवन्तीति संबन्धः । एतत्स्फुटयति—श्रोत्रादौ ह्यित्यादिना । मृत्वेति । विदेहमुक्तिर्विवक्षिता प्रारब्धभोगक्षये शरीरान्तरोत्पादे कारणाभावादवश्यंभाविनी विदुषो मुक्तिरित्यर्थः ॥ २ ॥

सर्पाद्यध्यासाधिष्ठानरज्ज्ववच्छ्रोत्राद्यध्यासाधिष्ठानचैतन्यं श्रोत्रस्य श्रोत्रमित्यादिना लक्षितं तर्हि रज्ज्ववदधिष्ठानत्वाद्विषयत्वप्रसङ्ग इति शङ्कां निवर्तयति—यस्माच्छ्रोत्रादे-रधीत्यादिना । अध्यस्तस्य ह्यधिष्ठानमेव स्वरूपमाद्यन्तमध्येषु तदव्यभिचारात्स्वरूप-

चक्षुर्गच्छति न वाग्गच्छति नो मनो न
विद्मो न विजानीमो यथैतदनुशिष्या-
दन्यदेव तद्विदितादथो अविदितादधि ।

र्गच्छति । स्वात्मनि गमनासंभवात् । तथा न वाग्गच्छति । वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा तदाऽभिधेयं प्रति वाग्गच्छतीत्युच्यते । तस्य च शब्दस्य तन्निर्वर्तकस्य च करणस्याऽऽत्मा ब्रह्मातो न वाग्गच्छति । यथाऽग्निर्दाहकः प्रकाशकश्चापि सन्न ह्यात्मानं प्रकाशयति दहति च तद्वत् । नो मनो मनश्चान्यस्य संकल्पयितृव्यवसायितृ च सदात्मानं संकल्पयत्यध्यवस्यति च तस्यापि ब्रह्माऽऽत्मेतीन्द्रियमनोभ्यां हि वस्तुनो विज्ञानं तदगोचरत्वान्न विद्मस्तद्ब्रह्मेदृशमित्यतो न विजानीमो यथा येन प्रकारेणैतद्ब्रह्मानुशिष्यादुपदिशेच्छिष्यायेत्यभिप्रायः । यद्धि करणगोचरं तदन्यस्मा उपदेष्टुं शक्यं जातिगुणक्रियाविशेषणैः । न तज्जात्यादिविशेषणवद्ब्रह्म । तस्माद्विषमं शिष्यानुपदेशेन प्रत्याययितुमिति । उपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यतां दर्शयति— न विद्म इत्यादि । अत्यन्तमेवोपदेशप्रकारप्रत्याख्याने प्राप्ते तदपवादोऽयमुच्यते । सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः । आगमेन तु शक्यत एव प्रत्याययितुम् । तदुपदेशार्थमागममाह—अन्यदेव तद्विदितादथो अविदितादधीति । अन्यदेव पृथगेव तद्यत्प्रकृतं श्रोत्रादीनां श्रोत्रादीत्युक्तमविषयं च तेषाम् । तद्विदितादन्यदेव हि विदितं नाम यद्विदिक्रियायाऽतिशयेनाऽऽप्तं तद्विदिक्रियाकर्मभूतं क्वचित्कित्कस्यचिद्विदितं स्यादिति सर्वमेव व्याकृतं तद्विदितमेव तत्तस्मादन्यदित्यर्थः । अविदितमज्ञातं तर्हीति प्राप्त आह—अथो अविदिताद्विदितविपरीतादव्याकृतादविद्यालक्षणाद्व्याकृतबीजात् । अधीत्युपर्यर्थे । लक्षणयाऽन्यदित्यर्थः । यद्धि यस्मादध्युपरि

विषयता च न पदार्थधर्मत्वतोऽयोजकोऽयं हेतुरित्यर्थः । अविषयत्वात्तर्हि शास्त्राचार्योपदेश्यत्वमपि न स्यादित्याशङ्क्य नास्त्येव वास्तवमित्याह-इन्द्रियमनोभ्यां हीति । ब्राह्मणोऽयमित्यादि जातितः कृष्णोऽयमित्यादि गुणतः पाचकोऽयमित्यादि क्रियातो राजपुरुष इत्यादि संबन्धविशेषणत उपदिश्यते । ब्रह्म तु न जात्यादिमत् । " केवलो निर्गुणश्च " इत्यादिश्रुतेः । अज्ञेनाऽऽगमस्य भेदेन प्रतिपन्नत्वात्तद्दृष्ट्याऽऽचार्यस्याप्यविद्यालेशोत्थदृष्ट्या व्यावहारिक उपदेश उपपद्यत आगमतस्तस्यैवाऽऽत्मानं ब्रह्मरूपेण लक्षयितुं योग्यतातिशयवत्त्वादित्यभिप्रेत्याऽऽह—अत्यन्तमेवेति । वाक्यस्य पदार्थान्वया-

१ ख. च. ज. °शोच्छेदद्दृ° ।

इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥

भवति तत्तस्मादन्यदिति प्रसिद्धं यद्विदितं तदल्पं मर्त्यं दुःखात्मकं चेति हेयम् । तस्माद्विदितादन्यद्ब्रह्मेत्युक्ते त्वहेयत्वमुक्तं स्यात् । तथाऽविदिताद्धीत्युक्तेऽनुपादेयत्वमुक्तं स्यात् । कार्यार्थं हि कारणमन्यदन्येनोपादीयतेऽतश्च न वेदितुरन्यस्मै प्रयोजनायान्यदुपादेयं भवतीत्येवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽन्यब्रह्मविषया जिज्ञासा शिष्यस्य निवर्तिता स्यात् । न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्यामन्यत्वं वस्तुनः (तः) संभवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः । " अयमात्मा ब्रह्म " " य आत्माऽपहतपाप्मा " " यत्साक्षादपरोक्षाद्ब्रह्म " " य आत्मा सर्वान्तरः " इत्यादिश्रुत्यन्तरेभ्यश्चेत्येवं सर्वात्मनः सर्वविशेषरहितस्य चिन्मात्रज्योतिषो ब्रह्मत्वप्रतिपादकस्य वाक्यार्थस्याऽऽचार्योपदेशपरम्परया प्राप्तत्वमाह—इति शुश्रुमेत्यादि । ब्रह्म चैवमाचार्योपदेशपरम्परयैवाधिगन्तव्यं न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्चेत्येवं शुश्रुम श्रुतवन्तो वयं पूर्वेषामाचार्याणां वचनम् । ये आचार्या नोऽस्मभ्यं तद्ब्रह्म व्याचचक्षिरे व्याख्यातवन्तो विस्पष्टं कथितवन्तस्तेषामित्यर्थः ॥ ३ ॥

अन्यदेव तद्विदितादथो अविदितादधीत्यनेन वाक्येनाऽऽत्मा ब्रह्मेति प्रतिपादिते श्रोतुराशङ्का जाता तत्कथं त्वात्मा ब्रह्म । आत्मा हि नामाधिकृतः कर्मण्युपासने च संसारी कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान्स्वर्गं वा प्राप्तुमिच्छति तत्तस्मादन्य उपास्यो विष्णुरीश्वर इन्द्रश्च प्राणो वा ब्रह्म भवितुमर्हति न त्वात्मा । लोकप्रत्ययविरोधात् । यथाऽन्ये तार्किका ईश्वरादन्य आत्मेत्याचक्षते तथा कर्मिणः " अमुं यजामुं यज " इत्यन्या एव देवता उपासते । तस्माद्युक्तं यद्विदितमुपास्यं तद्ब्रह्म भवेत् । ततोऽन्य उपासक इति । तामेतामाशङ्कां शिष्यलिङ्गेनोपलक्ष्य तद्व्याख्यातात्पर्यं दर्शयितुमुपक्रमते—यद्विदितं तदल्पमित्यादिना । यद्वेदितुरन्यत्तद्विदितमविदितं चेति द्वयी गतिः । ततो विदितत्वाविदितत्वनिषेधेन वेदितुः स्वरूपं ब्रह्मेत्यत्र तात्पर्यमागमस्येत्याह—न ह्यन्यस्येति ॥ ३ ॥

उक्तवाक्यार्थे लौकिकतार्किकमीमांसकप्रतिपत्तिविरोधमाशङ्क्य परिहरति विदिताद्न्यत्वप्रपञ्चनाय—अन्यदेव तद्विदितादित्यादिना । अष्टसु स्थानेष्विति ।

---

१ क. ख. °न्यत्वाद्ब्रह्म° ।

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।

क्याद्वाऽऽह मैवं शङ्किष्ठाः । यच्चैतन्यमात्रसत्ताकं वाचा वामिति जिह्वामूलादिष्वष्टसु स्थानेषु विषक्तमाग्नेयं वर्णानामभिव्यञ्जकं करणं वर्णाश्चार्थसंकेतपरिच्छिन्ना एतावन्त एवं क्रमप्रयुक्ता इत्येवं तदभिव्यङ्ग्यशब्दः पदं वागित्युच्यते । "अकारो वै सर्वा वाक्सैषा स्पर्शान्तःस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति श्रुतेः । मितममितं स्वरः सत्यानृते एव विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करणगुणवत्याऽनभ्युदितमप्रकाशितमनभ्युक्तं येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वागभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते प्रयुज्यत इत्येतत् । यद्वाचो ह वागित्युक्तं वदन्वाक् । यो वाचमन्तरो यमयतीत्यादि च वाजसनेयके । "या वाक्पुरुषेषु सा घोषेषु प्रतिष्ठिता कश्चित्तां वेद ब्राह्मणः" इति प्रश्नमुत्थाप्य प्रतिवचनमुक्तम् "सा वाग्यया स्वप्ने भाषते" इति । सा हि वक्तुर्वक्तिर्नित्या वाक्चैतन्यज्योतिःस्वरूपा । "न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते" इति श्रुतेः । तदेवाऽऽत्मस्वरूपं ब्रह्म निरतिशयं भूमाख्यं बृहत्त्वाद्ब्रह्मेति विद्धि विजानीहि त्वं यैर्वामा-

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥

इत्येतेष्वाकाशप्रदेशेष्वाश्रितमित्यनेनाऽऽकांशोपादानत्वं सूचितम् । आग्नेयमिति । अग्निदेवताकमित्यर्थः । न केवलं करणं वागुच्यते वर्णाश्चोच्यन्त इत्याह—वर्णाश्चेति ।

तदुक्तम्—यावन्तो यादृशा ये च यदर्थप्रतिपादकाः ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ॥ इति ।

गौरिति पदं गकारौकारविसर्जनीया एवं क्रमविशेषावच्छिन्ना इति मीमांसकाद्यनुसारेणोक्तं स्फोटवादिनोऽनुसारेणाऽऽह—तदभिव्यङ्ग्य इति । स्फुटयते व्यज्यते वर्णैरिति स्फोटः पदादिबुद्धिप्रमाणकः । एकरूपाया बुद्धेरनेकवर्णावलम्बनत्वासंभवादिति भावः । उक्ते वाक्यार्थे[1] श्रुतिसंमतिमाह—अकार इति । अकारप्रधानौंकारोपलक्षिता स्फोटरूपा चिच्छक्तिः सर्वा वाक्सैषा स्पर्शान्तःस्थोष्मभिर्व्यज्यमाना कादयो मावसानाः स्पर्शा यरलवा अन्तःस्थाः शषसहा ऊष्माणस्तैः क्रमविशेषावच्छिन्नैर्व्यज्यमाना नानारूपा विवर्तते । मितमृगादि पादावसाननियताक्षरत्वात् । अमितं यजुराद्यनियताक्षरपादावसानत्वात् । स्वरः साम । गीतिप्राधान्यात् । सत्यं यथादृष्टार्थवचनम् । अनृतं तद्विपरीतम् । करणं वागिन्द्रियं गुण उपसर्जनं यस्याः सा करणगुणवती पुरु-

१ न. घ. ङ. ट. वाक्यपदार्थे ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ४ ॥
यन्मनसा न मनुते येनाऽऽहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥

पाधिभिः । वाचो ह वाक्चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनः कर्ता भोक्ता विज्ञाता नियन्ता प्रशासिता · विज्ञानमानन्दं ब्रह्मेत्येवमादयः संव्यवहारा असंव्यवहार्ये निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते तान्व्युदस्याऽऽत्मानमेव निर्विशेषं ब्रह्म विद्धीत्येवशब्दार्थः । नेदं ब्रह्म यदिदमित्युपाधिभेदविशिष्टमनात्मेश्वराद्युपासते ध्यायन्ति । तदेव ब्रह्म त्वं विद्धीत्युक्तेऽपि नेदं ब्रह्मेत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते । नियमार्थमन्यब्रह्मबुद्धिपरिसंख्यानार्थं वा ॥ ४ ॥

यन्मनसा न मनुते । मन इत्यन्तःकरणं बुद्धिमनसोरेकत्वेन गृह्यते । मनुतेऽनेनेति मनः सर्वकरणसाधारणम् । सर्वविषयव्यापकत्वात् । " कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव " इति श्रुतेः । कामादिवृत्तिमन्मनस्तेन मनसा यच्चैतन्यज्योतिर्मनसोऽवभासकं न मनुते न संकल्पयति नापि निश्चिनोति । मनसोऽवभासकत्वेन नियन्तृत्वात् । सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्ततेऽन्तःकरणम् । अन्तःस्थेन हि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यं तेन सवृत्तिकं मनो येन ब्रह्मणा मतं विषयीकृतं व्याप्तमाहुः कथयन्ति ब्रह्मविदः । तस्मात्तदेव मनस आत्मानं प्रत्यक्चेतयितारं ब्रह्म विद्धि । नेदमित्यादि पूर्ववत् ॥ ५ ॥

यच्चक्षुषा न पश्यति न विषयी करोत्यन्तःकरणवृत्तिसंयुक्तेन येन चक्षूंष्यन्तःकरणवृत्तिभेदभिन्नाश्चक्षुर्वृत्तीः पश्यति लोकश्चैतन्यात्मज्योतिषा विषयी करोति व्याप्नोति ॥ ६ ॥

षेषु चेतनेषु या वाक्शक्तिः सा घोषेषु वर्णेषु प्रतिष्ठिता तद्व्यङ्ग्यत्वादित्यर्थः । तदेवेत्येवकारस्य कृत्यमाह—यैर्वागाद्युपाधिभिरिति । नियमार्थमिति । पक्षेऽनात्मन्यपि ब्रह्मबुद्धौ प्राप्तायामात्मैव ब्रह्मेति बुद्धिं नियन्तुमित्यर्थः । अन्यस्मिन्नुपास्ये या ब्रह्मबुद्धिस्तन्निवृत्त्यर्थं वा पुनरब्रह्मत्वमुच्यत इत्यर्थः ॥ ४ ॥

सर्वं स्पष्टमिति न व्याख्यातम् ॥ ५ ॥ ६ ॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदꣳ श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥
इति प्रथमः खण्डः ॥ १ ॥

===

यदि मन्यसे सुवेदेति

यच्छ्रोत्रेण न शृणोति दिग्देवताधिष्ठितेनाऽऽकाशकार्येण मनोवृत्तिसंयुक्तेन न विषयी करोति लोको येन श्रोत्रमिदं श्रुतं यत्प्रसिद्धं चैतन्यात्मज्योतिषा विषयीकृतं तदेवेत्यादि पूर्ववत् ॥ ७ ॥

यत्प्राणेन घ्राणेन पार्थिवेन नासिकापुटान्तरवस्थितेनान्तःकरणप्राणवृत्तिभ्यां सहितेन यन्न प्राणिति गन्धवन्न विषयी करोति येन चैतन्यात्मज्योतिषाऽवभास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते । तदेवेत्यादि सर्वं समानम् ॥ ८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये प्रथमः खण्डः ॥ १ ॥

एवं हेयोपादेयविपरीतस्वमात्मा ब्रह्मेति प्रत्यायितः शिष्योऽहमेव ब्रह्मेति सुष्ठु वेदाहं मामिति गृह्णीयादित्याशङ्क्याऽऽचार्यः शिष्यबुद्धिविचालनार्थं यदीत्याह । नन्विष्टैव सुवेदाहमिति निश्चिता प्रतिपत्तिः सत्यमिष्टा निश्चिता प्रतिपत्तिर्न हि सुवेदाहमिति । यद्धि वेद्यं वस्तु विषयी भवति तत्सुष्ठु वेदितुं शक्यं दाह्यमिव दग्धुमग्नेर्दग्धुर्न त्वग्नेः स्वरूपमेव । सर्वस्य हि वेदितुः स्वात्मा ब्रह्मेति सर्ववेदान्तानां सुनिश्चितोऽर्थः । इह च तदेव प्रतिपादितं प्रश्नप्रतिवचनोक्त्या श्रोत्रस्य श्रोत्रमित्याद्यया । यद्वाचाऽनभ्युदितमिति विशेषतोऽवधारितम् । ब्रह्मावित्संप्रदायनिश्चयश्चोक्तोऽन्यदेव तद्विदितादथो अविदितादधीत्युपन्यस्तमुपसंहरिष्यति चाविज्ञातं विजानतां विज्ञातमविजानतामिति । तस्माद्युक्तमेव शिष्यस्य सुवेदेति बुद्धिं निराकर्तुम् । न हि वेदिता वेदितुर्वेदितुं शक्योऽग्नि-

---

॥ ७ ॥ ८ ॥

इति प्रथमः खण्डः ॥ १ ॥

वेदितुः स्वरूपत्वे ब्रह्मणो मा भूद्विषयत्वम् । स्वरूपत्वे मानाभावात् । अतिरिक्तस्य विषयत्वे किमनुपपन्नमित्याशङ्क्याऽऽह—सर्वस्य हीति । यदिशब्दप्रयोगे किं कारणम्

दहरमेवापि नूनम् । त्वं वेत्थ ब्रह्मणो रूपं

रिव दग्धुमग्नेः। न चान्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत्स्याद्ब्रह्म । "नान्योऽतोऽस्ति विज्ञातृ" इत्यन्यो विज्ञाता प्रतिषिध्यते । तस्मात्सुष्ठु वेदाहं ब्रह्मेति प्रतिपत्तिर्मिथ्यैव । तस्माद्युक्तमेवाऽऽहाऽऽचार्यो यदीत्यादि । यदि कदाचिन्मन्यसे सुवेदेति सुष्ठु वेदाहं ब्रह्मेति । कदाचिद्यथाश्रुतं दुर्विज्ञेयमपि क्षीणदोषः सुमेधाः कश्चित्प्रतिपद्यते कश्चिन्नेति साशङ्कमाह यदीत्यादि । दृष्टं च " य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म " इत्युक्ते प्राजापत्यः पण्डितोऽप्यसुरराड् विरोचनः स्वभावदोषवशादनुपपद्यमानमपि विपरीतमर्थं शरीरमात्मेति प्रतिपन्नः । तथेन्द्रो देवराड् सकृद्द्विरुक्तं चाप्रतिपद्यमानः स्वभावदोषक्षयमपेक्ष्य चतुर्थे पर्याये प्रथमोक्तमेव ब्रह्म प्रतिपन्नवान् । लोकेऽप्येकस्माद्गुरोः शृण्वता काश्चिद्यथावत्प्रतिपद्यते काश्चिदयथावत्काश्चिद्विपरीतं काश्चिन्न प्रतिपद्यते किमु वक्तव्यमतीन्द्रियमात्मतत्त्वम् । अत्र हि विप्रतिपन्नाः सदसद्वादिनस्तार्किकाः सर्वे । तस्मादविदितं ब्रह्मेति सुनिश्चितोक्तमपि विषमप्रतिपत्तित्वाद्यदि मन्यस इत्यादि साशङ्कं वचनं युक्तमेवाऽऽचार्यस्य । दहरमल्पमेवापि नूनं त्वं वेत्थ जानीषे ब्रह्मणो रूपम् । किमनेकानि ब्रह्मणो रूपाणि महान्त्यर्भकाणि च येनाऽऽह दहरमेवेत्यादि । बाढम् । अनेकानि हि नामरूपोपाधिकृतानि ब्रह्मणो रूपाणि न स्वतः । स्वतस्तु " अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् " इति शब्दादियिः सह रूपाणि प्रतिषिध्यन्ते । ननु येनैव धर्मेण यद्दृश्यते तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषेण निरूपणं तदेव तस्य रूपं स्यादत उच्यते । चैतन्यं पृथि-

मित्यत आह—कदाचिदिति । अक्षिणि शरीरस्य प्रतिच्छाया दृश्यत इति प्रसिद्धवदुपदेशाच्छरीरमात्मेति प्रतिपन्नः । छायाया व्यभिचारित्वं बुद्ध्वेत्यर्थः । सकृदिति । "य एषोऽक्षिणि पुरुषो दृश्यते" इत्येकवारमुक्तम् , "य एष स्वप्ने महीयमानश्चरति" इति द्वितीयेनोक्तम् , " तद्यत्रैतत्सुप्तः समस्तः संपन्नः " इति त्रिरुक्तमप्यात्मानमप्रतिपद्यमान इन्द्रो ब्रह्मचर्येणाधर्मादिदोषक्षयमपेक्ष्य चतुर्थे पर्याये " एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य " इत्यत्र प्रथमपर्यायोक्तमेव ब्रह्म प्रतिपन्नवानित्यर्थः । अर्भकाणि चेति । अल्पानि । न स्वतो रूपमस्ति ब्रह्मण इत्युक्तं तदाक्षिपति—ननु येनैवेति । केन तर्हि विशेषेण ब्रह्मणो निरूपणमित्याकाङ्क्षायां चैतन्यरूपेणेत्याह—चैतन्यमिति । भूतानां समस्तानां व्यस्तानां

१ क. ख. घ. ङ. ट. दभ्रमे°। २ ग. घ. ट. दभ्रमे°। ३ घ. ङ. झ. ट. °नाहं द°। ४ क. ख. ग. घ. संप्रस°।

यदस्य त्वं यदस्यं देवेष्वथ नु मीमाꣳस्यमेव ते

व्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति । तथा श्रोत्रादीनामन्तःकरणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति । ब्रह्म रूप्यते चैतन्येन । तथा चोक्तम्—"विज्ञानमानन्दं ब्रह्म" "विज्ञानघन एव" "सत्यं ज्ञानमनन्तम्" "प्रज्ञानं ब्रह्म" इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु । सत्यमेवं तथाऽपि तदन्तःकरणदेहेन्द्रियोपाधिद्वारेणैव विज्ञानादिशब्दैर्निर्दिश्यते तदनुकारित्वाद्देहादिवृद्धिसंकोचच्छेदादिषु नाशेषु च न स्वतः । स्वतस्त्वविज्ञातं विजानतां विज्ञातमविजानतामिति स्थितं भविष्यति । यदस्य ब्रह्मणो रूपमिति पूर्वेण संबन्धः । न केवलमध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपत्वमल्पं वेत्थ यदप्यधिदैवतोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं देवेषु वेत्थ त्वं तदपि नूनं दहरमेव वेत्थेति मन्येऽहम् । यदध्यात्मं यदधिदैवं तदपि च देवेषूपाधिपरिच्छिन्नत्वाद्दहरत्वान्न निवर्तते । यत्तु विध्वस्तसर्वोपाधिविशेषं शान्तमनन्तमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म न तत्सुवेद्यमित्यभिप्रायः । यत एवमथ नु तस्मान्मन्वेऽद्यापि मीमांस्यं विचार्यमेव ते तव ब्रह्म । एवमाचार्योक्तः शिष्य एकान्त उपविष्टः समाहितः सन्यथोक्तमाचार्येणाऽऽगममर्थतो

वा देहाकारपरिणतानां चैतन्यं धर्मो न भवतीति बहिरनुपलम्भात्तद्धर्मत्वे रूपादिवत्तत्साधकत्वाभावप्रसङ्गाच्च । तथा श्रोत्रादीनामपि भौतिकत्वाविशेषाच्चैतन्यं धर्मो न भवतीति पारिशेष्यात्स्वतन्त्रचैतन्यं ब्रह्मणो रूपम् । तत्र श्रुतिसंमतिमाह—तथा चोक्तमिति । सत्यमेवं चैतन्यं पारमार्थिकं ब्रह्मरूपं श्रुतितात्पर्यगम्यं तथाऽपि यदुक्तं ब्रह्मणो रूपं कथं नास्तीति तदुपाधिद्वारेणैव ब्रह्मणः शब्देन निरूपणं निर्देशनं न स्वत इत्यभिप्रेत्यान्तःकरणाद्यभिव्यक्तिमुपलभ्य हि यदुपाध्यभिव्यक्तिनिमित्तं चैतन्यं तद्ब्रह्मेति निर्दिश्यत इत्यर्थः । ननूपाधिरुपाहितसंबद्धो भवति चैतन्यस्य त्वसङ्गस्य कथं देहादिरुपाधिरित्याशङ्क्याऽऽह—तदनुकारित्वादित्यादिना । यथा जले कम्पमाने सविता कम्पत इव भिद्यमाने भिद्यत इवेति मिथ्यातद्धर्मभागित्वात्सवितुर्जलमुपाधिरित्युच्यते न तु संबन्धाद्दूरस्थयोः संयोगाद्ययोगात् । तद्वद्देहादेर्बुद्धिसंकोचच्छेदादिषु देहादिषु नाशेषु चैतन्यस्य मिथ्यादेहधर्मभागित्वाद्देहादेरुपाधित्वमभिधीयत इत्यर्थः । ननु न स्वतश्चैतन्यतया निरूप्यते ब्रह्म कथं तर्हि तदनुभव इत्याशङ्क्याऽऽह—स्वतस्त्विति । अविषयतयैव विषयानुपरक्तचित्स्फुरणं ब्रह्मानुभव इत्यर्थः । तर्कतश्चेति । वेद्यत्वे घटादिवदनात्मत्वादिप्रसङ्गादित्यादितर्कैत आत्मनो वेद्यं ब्रह्म न भवत्येवेति

---

१ ङ. अ. °स्य च दे° । २ क. ख. °त्वं तदपि चोपाधि° ।

मन्ये विदितम् ॥ ९ ॥ १ ॥ नाहं मन्ये सुवेदेति नो न वेदेति वेद च । यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ १० ॥ २ ॥ यस्यामतं तस्य मतं

विचार्य तर्कतश्च निर्धार्य स्वानुभवं कृत्वाऽऽचार्यसकाशमुपगम्योवाच-मन्येऽहमधेदानीं विदितं ब्रह्मेति ॥ ९ ॥ १ ॥

कथमिति । शृणुत । नाहं मन्ये सुवेदेति नैवाहं मन्ये सुवेद ब्रह्मेति । नैव तर्हि विदितं त्वया ब्रह्मेत्युक्त आह—नो न वेदेति वेद च । वेद चेति चशब्दान्न वेदं च । ननु विप्रतिषिद्धं नाहं मन्ये सुवेदेति नो न वेदेति वेद चेति । यदि न मन्यसे सुवेदेति । कथं मन्यसे वेद चेति । अथ मन्यसे वेदेचेति । कथं न मन्यसे सुवेदेति एकं वस्तु येन ज्ञायते तेनैव तदेव वस्तु न सुविज्ञायत इति विप्रतिषिद्धं संशयविपर्ययौ वर्जयित्वा । न च ब्रह्म संशयितत्वेन ज्ञेयं विपरीततत्वेन वेति नियन्तुं शक्यम् । संशयविपर्ययौ हि सर्वत्रानर्थकरत्वेन नैव प्रसिद्धौ । एवमाचार्येण विचाल्यमानोऽपि शिष्यो न विचचाल । "अन्यदेव तद्विदितादथो अविदितादधि" इत्याचार्योक्तागमसंप्रदायबलादुपपत्त्यनुभवबलाच्च जगर्ज च ब्रह्मविद्यायां दृढनिश्चयतां दर्शयन्नात्मनः । कथमित्युच्यते । यो यः कश्चिन्नोऽस्माकं सब्रह्मचारिणां मध्ये तदुक्तं वचनं तत्त्वतो वेद स तद्ब्रह्म वेद । किं पुनस्तद्वचनमित्यत आह—नो न वेदेति वेद चेति । यदेवान्यदेव तद्विदितादथो अविदितादधीत्युक्तं वस्त्वनुमानानुभवाभ्यां संयोज्य निश्चितं वाक्यान्तरेण नो न वेदेति वेद चेत्यवोचदाचार्यबुद्धिसंवादार्थं मन्दबुद्धिग्रहणव्यपोहार्थं च । तथा च गर्जितमुपपन्नं भवति यो नस्तद्वेदेति ॥ १० ॥ २ ॥

शिष्याचार्यसंवादात्मतिर्निर्दिष्टस्य स्वेन रूपेण श्रुतिः समस्तसंवादानिर्दिदिक्षमर्थमेव बोधयति—यस्यामतमित्यादिना । यस्य ब्रह्मविदोऽमतमविज्ञातमविदितं ब्रह्मेति मतमभिप्रायो निश्चयस्तस्य मतं ज्ञातं सम्यग्ब्रह्मेत्यभिप्रायः ।

निर्धार्याज्ञानसंशयाद्यभावेन स्वानुभवं कृत्वेत्यर्थः ॥ ९ ॥ १ ॥

आचार्यवचनादन्यदेव वचनं शिष्य उवाचेति नाऽऽशङ्कनीयमित्याह—यदेवान्यदेवेति । तथा चेत्याचार्यबुद्धिसंवादे सत्यर्थान्तरानभिधाने सतीत्यर्थः ॥ १० ॥ २ ॥

---

१ घ. ङ. नाहम्°। २ ख. ङ. °त्वं न°। ३ च. ञ. °णव्यामोहा°। ४ क. ख. ग. घ. ङ. छ. °निवर्त्य स्वे°। ५ क. ख. निवृत्त°।

मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ११ ॥३॥ प्रतिबोधविदितं मत-

---

यस्य पुनर्मतं ज्ञातं विदितं मया ब्रह्मेति निश्चयो न वेदैव स न ब्रह्म विजानाति सः । विद्वद्विदुषोर्यथोक्तौ पक्षावव्यवधारयति—अविज्ञातममतमविदितमेव ब्रह्म विजानतां सम्यग्विदितवतामित्येतत् । विज्ञातं विदितं ब्रह्माविजानतामसम्यग्दर्शिनामिन्द्रियमनोबुद्धिष्वेवाऽऽत्मदर्शिनामित्यर्थः । न त्वत्यन्तमेवाव्युत्पन्नबुद्धीनाम् । न हि तेषां विज्ञातमस्माभिर्ब्रह्मेति मतिर्भवति । इन्द्रियमनोबुद्ध्युपाधिष्वात्मदर्शिनां तु ब्रह्मोपाधिविवेकानुपलम्भाद्बुद्ध्याद्युपाधेश्च विज्ञातत्वाद्विदितं ब्रह्मेत्युपपद्यते भ्रान्तिरित्यतोऽसम्यग्दर्शनपूर्वपक्षत्वेनोपन्यस्यते विज्ञातमविजानतामिति । अथवा हेत्वर्थ उत्तरार्धोऽविज्ञातमित्यादिः ॥ ११ ॥ ३ ॥

अविज्ञातं विजानतामित्यवधृतम् । यदि ब्रह्मात्यन्तमेवाविज्ञातं लौकिकानां ब्रह्मविदां चाविशेषः प्राप्तः । अविज्ञातं विजानतामिति च परस्परविरुद्धम् । कथं तु तद्ब्रह्म सम्यग्विदितं भवतीत्येवमर्थमाह—प्रतिबोधविदितं बोधं बोधं प्रति विदितम् । बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते । सर्वे प्रत्यया विषयी भवन्ति यस्य स आत्मा सर्वबोधान्प्रतिबुध्यते सर्वप्रत्ययदर्शी चिच्छक्ति-

---

अथवा हेत्वर्थ इति । लोके शुक्त्यादितत्त्वं विजानतां यतोऽन्यस्तं रूप्याद्यविज्ञातं भवति । अजानतामेव त्वन्यस्तं विज्ञातं भवतीति प्रसिद्धम् । तथा ब्रह्मणि ज्ञेयत्वसाध्यस्तत्त्वादेव तत्त्वविदो न ज्ञातं ब्रह्म पश्यन्तीत्यर्थः ॥ ११ ॥ ३ ॥

ज्ञातब्रह्मत्वादर्शने ब्रह्मास्मीति कथं व्यवहरतीति चेत्किमनयेष्टकावाहकानां रत्नपेटकचिन्तया ज्ञातस्य व्यवहाराङ्गत्वं वदतोऽपि वस्तुपकाशस्य व्यवहाराङ्गत्वस्येष्टत्वाद्ब्रह्मतत्त्वज्ञाततानपेक्षकत्वादित्यव्युत्पन्नव्युत्पादनाय चोद्यमुद्भावयति—अविज्ञातमित्यादिना । नीलपीताद्याकाराणां बुद्धिविकाराणां जडानां यच्चैतन्यव्याप्तत्वेनाजडवदवभासस्तं साक्षिणमुपलक्ष्य सोऽहमात्मा ब्रह्मेतिमहावाक्यादविषयतयैव यो वेत्ति स ब्रह्मविदुच्यते । तेन नाविशेषप्रसङ्गादिचोद्यावकाश इत्याह—प्रतिबोधविदितमिति । प्रत्ययेष्वविशिष्टतयाऽनुगतरूपेणेत्यर्थः । येन चित्स्वरूपेणाहमत्र साक्षी तस्य सर्वत्राविशे-

---

१ ग. ङ. °शेषप्राप्तेरवि° । २ ग. घ. च. ज. ङ. °षया भ° ।

स्वरूपमात्रः प्रत्ययैरेव प्रत्ययेष्वविशिष्टतया लक्ष्यते नान्यद्द्वारमात्मनो विज्ञानायातः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा तदा तन्मतं तदा तत्सम्यग्दर्शनमित्यर्थः । सर्वप्रत्ययदर्शित्वे चोपजननापायवर्जितदृक्स्वरूपता नित्यत्वं विशुद्धस्वरूपत्वमात्मत्वं निर्विशेषतैकत्वं च सर्वभूतेषु सिद्धं भवेत् । लक्षणभेदाभावाद्द्वयोर्न्न इव घटगिरिगुहादिषु । विदिताविदिताभ्यामन्यद्ब्रह्मेत्यागमवाक्यार्थः । एवं परिशुद्ध एवोपसंहृतो भवति । "दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता" इति हि श्रुत्यन्तरम् । यदा पुनर्बोधक्रियाकर्तेति बोधक्रियालक्षणेन तत्कर्तारं विजानातीति बोधलक्षणेन विदितं प्रतिबोधविदितमिति व्याख्यायते । यथा यो वृक्षशाखाश्चालयति स वायुरिति तद्वत् । तदा बोधक्रियाशक्तिमानात्मा द्रव्यं न बोधस्वरूप एव । बोधस्तु जायते विनश्यति च । यदा बोधो जायते तदा बोधक्रियया सह विशेषः । यदा बोधो नश्यति तदा नष्टबोधो द्रव्यमात्रं निर्विशेषः । तत्रैवं सति विक्रियात्मकः सावयवोऽनित्योऽशुद्ध इत्यादयो दोषा न परिहर्तुं शक्यन्ते । यदपि काणादानात्ममनःसंयोगजो बोध आत्मनि समवैति । अत आत्मनि बोद्धृत्वं नतु विक्रियात्मक आत्मा । द्रव्यमात्रस्तु भवति घट इव रागसमवायी । अस्मिन्पक्षेऽप्यचेतनं द्रव्यमात्रं ब्रह्मेति "विज्ञानमानन्दं ब्रह्म" इत्याद्याः श्रुतयो बाधिताः स्युः । आत्मनो निरवयवत्वेन प्रदेशाभावान्नित्यसंयुक्त-

---

षान्नैकस्मिन्नेव देहेऽहं साक्षी भेदोत्पत्त्यादीनां च साक्ष्यगतत्वेन साक्षिण एकत्वनित्यत्वादिकमपि सिध्यतीत्याह—सर्वप्रत्ययदर्शित्वे चेति । विदितत्वाविदितत्वयोः साक्ष्यगतत्वेन तदन्यत्वमप्यस्मिन्पक्षे संभवतीत्याह—विदिताविदिताभ्यामन्यदिति । एकदेशिव्याख्यानमुद्भाव्य दूषयति—यदा पुनरित्यादिना । अग्निसंयोगाद्घटलोहित्यवन्मनःसंयोगादसमवायिकारणादात्मन्यचेतने चैतन्यमुत्पद्यत इत्येतन्न केवलं श्रुतिविरुद्धमसंभावितं चेत्याह—आत्मनो निरवयवत्वेनेति । प्रदेशवता प्रदेशवतो लोके संयोगो दृष्टः । आत्मनो निष्प्रदेशत्वान्मनसा संयोगो न संभवतीत्युक्तं तदयुक्तम् । युगपत्सर्वमूर्तसंयोगित्वं सर्वगतत्वमात्मनस्ततो मनसः संयोगोऽपीति चेत्तत्राऽऽह—नित्येति । ग्रहणकालादन्यकाल एव स्मृतीना क्रमेणोत्पत्तिरिति नियमो वैशेषिकस्य नोपपद्यते ग्रहणकालेऽपि स्मृत्युत्पत्तिप्रसङ्गाच्च संस्कारवदात्ममनःसंयोगस्याविशेषादित्यर्थः । सर्वगतत्वं च सर्वावयवधानमात्रं न तु संयोगित्वं कल्पनीयमित्याह—संसर्गधर्मित्वं चेति । न्यायाविरुद्धमित्युक्तं तत्स्फुट-

---

+ च. पुस्तके कल्पनीयमित्याहेत्यस्य स्थाने कल्पनीयमिति चेदाहेत्यधो लिखितः पाठः ।

---

१ घ. ङ. °क्षणं भे° । २ क. ख. °न्दं ब्रह्मा ब्र° । ३. क. ख. च. ञ. °मुपपद्य° ।

स्वाच्च मनसः स्मृत्युत्पत्तिनियमानुपपत्तिरपरिहार्या स्यात्। संसर्गधर्मित्वं चाऽऽत्मनः श्रुतिस्मृतिन्यायविरुद्धं कल्पितं स्यात्। "असङ्गो न हि सज्जते" "असक्तं सर्वभृत्" इति श्रुतिस्मृती द्वे। न्यायश्च गुणवद्गुणवता संसृज्यते नातुल्यजातीयम्। अतो निर्गुणं निर्विशेषं सर्वविलक्षणं केनचिदप्यतुल्यजातीयेन संसृज्यत इत्येतन्न्यायाविरुद्धं भवेत्। तस्मान्नित्यात्मुविज्ञानस्वरूपज्योतिरात्मा ब्रह्मेत्ययमर्थः सर्वबोधबोद्धृत्व[1] आत्मनः सिध्यति नान्यथा। तस्मात्प्रतिबोधविदितं मतमिति यथाव्याख्यात एवार्थोऽस्माभिः। यत्पुनः स्वसंवेद्यता प्रतिबोधविदितामित्यस्य वाक्यस्यार्थो वर्ण्यते। तत्र भवति सोपाधिकत्वं आत्मनो बुद्ध्युपाधिस्वरूपत्वेन भेदं परिकल्प्याऽऽत्मनाऽऽत्मानं वेत्तीति संव्यवहारः। "आत्मैवाऽऽत्मानं पश्यति" "स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम" इति। ननु निरुपाधिकस्याऽऽत्मन एकत्वे स्वसंवेद्यता परसंवेद्यता वा संभवति। संवेदनस्वरूपत्वात्संवेदनान्तरापेक्षा च न संभवति। यथा प्रकाशस्य प्रकाशान्तरापेक्षाया न संभवस्तद्वत्। बौद्धपक्षे स्वसंवेद्यतायां तु क्षणभङ्गुरत्वं निरात्मकत्वं च विज्ञानस्य स्यात्। न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्। "नित्यं विभुं सर्वगतम्" "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयः" इत्याद्याः श्रुतयो बाध्येरन्[3]। यत्पुनः प्रतिबोधशब्देन निर्निमित्तो बोधः प्रतिबोधो यथा

यति—न्यायश्चेति। एकदेशिव्याख्यानान्तरमनूद्य दूषयति—यत्पुनरित्यादिना। यद्वेद्यं तद्वेदितुर्वेदनाच्च भिन्नं यथा घटादीति व्याप्तिविरोधात्स्वसंवेद्यत्वं वास्तवं नोपपद्यते ततो बुद्ध्यादावात्ममारोप्याऽऽत्मना तस्य वेद्यत्वं वाच्यमिति निरुपाधिकस्वरूपस्थितिर्न स्यादित्याह—तत्र भवति सोपाधिकत्वं इति। काणादस्य स्वसंवेद्यत्वानङ्गीकारबलात्परवेद्यत्वं प्रसज्जत इत्यपि न वाच्यमित्याह—संवेदनस्वरूपत्वादिति। बौद्धेन स्वसंवेद्यं विज्ञानमिष्टं तव किं न स्यादित्यत आह—बौद्धपक्ष इति। प्रत्यक्षस्य वर्तमानावभासकत्वात्क्षणान्तरविशिष्टे स्वात्मनि क्षणान्तरविशिष्टं तदेव विज्ञानं प्रत्यक्षं न संभवति। अतः स्वात्मनि स्वयमेव विज्ञानं प्रत्यक्षं चेद्वर्तमानक्षणमात्रं सत्त्वं स्यात्। स्वसंवेद्यत्वेन साक्षिणोऽनङ्गीकारान्निरात्मत्वं च स्यादेव तच्छ्रुतिविरुद्धमित्यर्थः। प्रतिबोधवाक्यस्यार्थान्तरं शङ्कते—यत्पुनरिति। ब्रह्माहमस्मीति चिन्तयतो यावच्चेतोव्यापृतिस्तावत्संप्रज्ञातसमाधिर्निवृत्ते चेतोव्यापारे यः परमानन्दसा-

---

१ घ. ङ. झ. °द्धृत्वमात्म°। २ क. ङ. झ. °त्वमात्म°। ३ ङ. ट. निर्णीतो वा°। ४ क. ख. च. ञ. °त्वमिति। ५ क. ख. °त्यग्ब्रह्माभिव्यक्तस्य न°।

ममृतत्वं हि विन्दते ।

सुप्तस्येत्यर्थं परिकल्पयति । सकृद्विज्ञानं प्रतिबोध इत्यपरे । निर्निमित्तः सानिमित्तः सकृद्वाऽसकृद्वा प्रतिबोध एव हि सः । अमृतत्वममरणभावं स्वात्मन्यवस्थानं मोक्षं हि यस्माद्विन्दते लभते यथोक्तात्प्रतिबोधात्प्रतिबोधविदितात्मकात्तस्मात्प्रतिबोधविदितमेव मतमित्यभिप्रायः । बोधस्य हि प्रत्यगात्मात्मविषयं च मतममृतत्वे हेतुः । न ह्यात्मनोऽनात्मत्वममृतत्वं भवत्यात्मत्वादात्मनोऽमृतत्वं निर्निमित्तमेव । एवं मर्त्यत्वमात्मनो यदविद्ययाऽनात्मत्वम-

क्षात्कारः सौषुप्तानन्दसाक्षात्कारवत्सोऽसंप्रज्ञातसमाधिः प्रतिबोध उच्यते । तदुक्तं वार्तिककृता—" अपरायत्तबोधो हि निदिध्यासनमुच्यते " इति । अथवाऽक्रियब्रह्मात्मत्वानुभवे सति प्रमातृत्वानुपपत्तौ पुनर्ज्ञानासंभवात्सद्योमुक्तिकारणं सकृद्विज्ञानं प्रतिबोध उच्यते ।

सकृत्प्रवृत्त्या मूढ्राति क्रियाकारकरूपभृत् ।
अज्ञानमागमज्ञ नं साङ्कत्यं नास्त्यतोऽनयोः " ॥ इति ।

पक्षद्वयेऽप्यरुचिमाह—निर्निमित्त इति । आयमाशयः—न तावदविद्यानिवर्तकस्याऽऽगन्तुकस्य बोधस्य निर्मित्तत्वं संभवति । कार्यस्य सनिमित्तत्वव्याप्तेः । सौषुप्तस्यापि न निर्निमित्तत्वमविद्यायाः पूर्वपूर्वनिरोधावस्थासंस्कारोद्भूततादृशवृत्त्याभिव्यक्तचैतन्यस्य तत्र सुखसाक्षात्कारोपगमात् । अत एव वृत्तिविशिष्टस्य विनाशे स्मरणमुपपद्यते । अत्रापि तर्ह्यावृत्तिसंस्कारप्रचयान्निवृत्तेऽपि चित्ते ब्रह्माभिव्यक्तं स्यादिति चेन्न । तथा सत्यप्रमात्वेन विनष्टपुत्रापरोक्षादिवाविद्यानिवृत्तिर्न स्यात् । शाब्दज्ञानसंवादात्प्रमात्वे परतन्त्रत्वप्रसङ्गः शब्दमूलत्वात्प्रमात्वेन निर्निमित्ततेति प्रवृत्तफलकर्मप्रतिबन्धाद्वर्तमानप्रमातृत्वाभासानिवृत्तेरसकृद्बोधोऽपि संभवतीति पक्षद्वयेऽपि नाऽऽदरः । सर्वथाऽपि परमात्मा प्रतिबोध एव बोधं प्रति बोधं प्रति साक्षितया भातीति । लक्ष्यपदार्थविवेचनपूर्वकं महावाक्योत्थं परमात्माऽस्मीति ज्ञानमेव सम्यग्ज्ञानं यस्मात्तत्त एवामृतत्वं लभत इत्याह—अमृतत्वमिति । उक्तमर्थं संक्षिप्याऽऽह—बोधस्य हीति । बुद्धिपरिणामस्य सर्वस्य मानकं प्रत्यक्चैतन्यं परमात्मा न भवति किंतु ब्रह्माण्डाद्बहिःस्थितस्तत्प्राप्तिश्च मोक्ष इत्याशङ्क्याऽऽह—न हीति । अनात्मप्राप्तेः कर्मफलवदनित्यत्वेनामृतत्वप्रसिद्धिर्न स्यादित्यर्थः । यद्युक्तदोषपरिहारायौपाधिकभेदेन भिन्नत्वं ब्रह्मणः स्वतस्त्वात्मत्वमेवेति मन्यसे तत्राऽऽह—आत्मत्वादिति । ब्रह्मण आत्मत्वादेवाऽऽत्मनोऽमृतत्वं स्वभावत एव सिद्धम् । तर्हि विद्याया आन-

१ च ञ. °गात्मविषयत्वं म° । २ क. ख. °त्मत्वादात्मनोऽमृ° । ३ ग. घ. ङ. ट. °त्तत्त्वात् । ए° । ४ क. ख. च. ज °त्तकर्मफलप्र° ।

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्
॥ १२ ॥ ४ ॥ इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टिः । भूतेषु भूतेषु

तिपत्तिः । कथं पुनर्यथोक्तयाऽऽत्मविद्ययाऽमृतत्वं विन्दत इत्यत आह—आत्मना स्वेन स्वरूपेण विन्दते लभते वीर्यं बलं सामर्थ्यं धनसहायमन्त्रौषधितपोयोगकृतं वीर्यं मृत्युं न शक्नोत्यभिभवितुमनित्यवस्तुकृतत्वात् । आत्मविद्याकृतं तु वीर्यमात्मनैव विन्दते नान्येनेत्यतोऽनन्यसाधनत्वादात्मविद्यावीर्यस्य तदेव वीर्यं मृत्युं शक्नोत्यभिभवितुम् । यत एवमात्मविद्याकृतं वीर्यमात्मनैव विन्दतेऽतो विद्ययाऽऽत्मविषयया विन्दतेऽमृतम्, " नायमात्मा बलहीनेन लभ्यः " इत्याथर्वणे । अतः समर्थो हेतुः, अमृतत्वं हि विन्दत इति ॥ १२ । ४ ॥

कष्टा खलु सुरनरतिर्यक्प्रेतादिषु संसारदुःखबहुलेषु प्राणिनिकायेषु जन्मजरामरणरोगादिसंप्राप्तिरज्ञानादत इहैव चेन्मनुष्योऽधिकृतः समर्थः सन्यद्यवेदीदात्मानं यथोक्तलक्षणं विदितवान्यथोक्तेन प्रकारेण । अथ तदस्ति सत्यं मनुष्यजन्मन्यस्मिन्नविनाशोऽर्थवत्ता वा सद्भावो वा परमार्थता वा सत्यं विद्यते । न * चेदिहावेदीदिति । न चेदिह जीवंश्चेदधिकृतोऽवेदीन्न विदितवांस्तदा महती दीर्घाऽनन्ता विनष्टिर्विनाशनं जन्मजरामरणादिप्रबन्धाविच्छेदलक्षणा संसारगतिस्तस्मादेवं गुणदोषौ विजानन्तो ब्राह्मणा भूतेषु भूतेषु सर्वभूतेषु स्थावरेषु चरेषु चैकमात्मतत्त्वं ब्रह्म विचित्य विज्ञाय

र्थक्यं प्राप्तमित्याशङ्क्याऽऽह—एवं मर्त्यत्वमिति । अविद्यया देहाद्यात्मत्वप्रतिपत्तिरिति यत्तदात्मनो मर्त्यत्वं तन्निवृत्तिर्विद्याफलमित्यर्थः । वीर्यं विद्याकृतमुक्तं मुक्तत्वे दार्ढ्यं तच्च स्वाभाविकमेव मुक्तत्वं वास्तवम् । सर्वशरीराद्यसंसर्गित्वान्नभोवन्निरवयवत्वादेव । ततश्च नित्यमुक्त एवाहमित्यवष्टम्भो विद्याकृतं बलमित्यर्थः ॥ १२ ॥ ४ ॥

उत्तरवाक्यस्यापेक्षितमर्थमाह—कष्टा खल्विति । लौकिकमपि सत्यम् । चिरं जीवनं धनवत्त्वम् । सद्भावः साधुभावः ख्यातिः । एतदपि सर्वं ब्रह्मविदो भवतीति

* अत्र यद्यपि सर्वेष्वादर्शपुस्तकेषु न चेदवेदीदित्येवोपलभ्यते तथाऽपि मूले न चेदिहावेदीदिति वर्ततेऽतस्तथैव प्रतीकस्यापि ग्रहीतुं युक्तत्वान्न चेदिहावेदीदित्येव स्थापितम् ।

विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति
॥ १३ ॥ ५ ॥
इति द्वितीयः खण्डः ॥ २ ॥

ब्रह्म ह देवेभ्यो विजिग्ये

साक्षात्कृत्य धीरा धीमन्तः प्रेत्य [1]व्यावृत्य ममाहंभावलक्षणादविद्यारूयादस्माल्लोकादुपरम्य सर्वात्मैकत्वभावमद्वैतमापन्नाः सन्तोऽमृता भवन्ति ब्रह्मैव भवन्तीत्यर्थः । " स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति " इति श्रुतेः ॥ १३ ॥ ५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ केनोपनिषत्पदभाष्ये द्वितीयः खण्डः ॥ २ ॥

ब्रह्म ह देवेभ्यो विजिग्ये " अविज्ञातं विजानतां विज्ञातमविजानताम् " इत्यादिश्रवणाद्यदस्ति तद्विज्ञातं प्रमाणैर्यन्नास्ति तदविज्ञातं शशविषाणकल्पमत्यन्तमेवासदृष्टम् । तथेदं ब्रह्माविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति तदर्थेयमाख्यायिकाऽऽरभ्यते । तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देव ईश्वराणामपीश्वरो दुर्विज्ञेयो देवानां जयहेतुरसुराणां पराजयहेतुस्तत्कथं नास्तीत्येतस्यार्थस्यानुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते । अथवा ब्रह्मविद्यायाः स्तुतये । कथं ब्रह्मविज्ञानाद्धयग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुस्ततोऽप्यतितरामिन्द्र इति । अथवा दुर्विज्ञेयं ब्रह्मेत्येतत्प्रदर्श्यते । येनाग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेन्द्रो देवानामीश्वरोऽपि सन्निति वक्ष्यमाणोपनिषद्विधिपरं वा सर्वं ब्रह्मविद्याव्यतिरेकेण प्राणिनां कर्तृत्वाद्यभिमानो मिथ्येत्येतद्दर्शनार्थं वाऽऽख्यायिका । यथा देवानां जयाद्यभिमानस्तद्वादिति । ब्रह्म यथोक्तलक्षणं परं ह किल देवेभ्योऽर्थाय विजिग्ये जयं लब्धवद्देवानामसुराणां च

स्तुत्यर्थमुच्यते । परमार्थतो ब्रह्मरूपस्थितिस्तु फलमवश्यं भवतीत्यर्थः ॥ १३ ॥ ५ ॥
इति द्वितीयः खण्डः ॥ २ ॥

उत्तरग्रन्थस्य प्रतीकमादाय तात्पर्यमाह–ब्रह्मेत्यादिना । अभिप्रेतं तात्पर्यमाह–वक्ष्यमाणेति । उत्तमाधिकारिगोचरमविषयं ब्रह्मात्मताज्ञानं पूर्वत्रोक्तमुत्तरत्र तु मन्दाधिकारिगोचरं सगुणब्रह्मोपासनं वक्ष्यते । तत्परं वक्ष्यमाणं सर्ववाक्यजातं स्पष्ट-

1 क. ख. ग. घ. ङ. व्यावर्त्य ।

तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ १४ ॥ १ ॥ तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमिति ॥ १५ ॥ ॥ २ ॥ तेऽग्निमब्रुवञ्जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ १६ ॥ ३ ॥

संग्रामेऽसुरान्जित्वा जगदरातीनीश्वरसेतुभेत्तुन्देवेभ्यो जयं तत्फलं च प्रायच्छज्जगतः स्थेम्ने । तस्य ह किल ब्रह्मणो विजये देवा अग्न्यादयोऽमहीयन्त महिमानं प्राप्तुवन्तस्तदाऽऽत्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितुः प्राणिनां सर्वशक्तेर्जगतः स्थितिं चिकीर्षोरयं जयो महिमा चेत्यजानन्तस्ते देवा ऐक्षन्तेक्षितवन्तोऽग्न्यादिस्वरूपपरिच्छिन्नात्मकृतोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमाऽग्निवाय्विन्द्रत्वादिलक्षणो जयफलभूतोऽस्माभिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरकृत इत्येवं मिथ्याभिमानेक्षणवताम् ॥ १४ ॥ १ ॥

तद्ध किलैषां मिथ्येक्षणं विजज्ञौ विज्ञातवद्ब्रह्म । सर्वेक्षितृ हि तत्सर्वभूतकरणप्रयोक्तृत्वादेवानां च मिथ्याज्ञानमुपलभ्य मैवासुरवद्देवा मिथ्याभिमानात्पराभवेयुरिति तदनुकम्पया देवान्मिथ्याभिमानापनोदनेनानुगृह्णीयामिति तेभ्यो देवेभ्यो ह किलार्थाय प्रादुर्बभूव स्वयोगमाहात्म्यनिर्मितेनात्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रियगोचरे प्रादुर्बभूव । तत्प्रादुर्भूतं ब्रह्म न व्यजानत नैव विज्ञातवन्तो देवाः । किमिदं यक्षं पूज्यं महद्भूतमिति ॥ १५ ॥ २ ॥

ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवोऽग्निमब्रुवन्नागामिणं जातवेदसं सर्वज्ञकल्पमब्रुवन्नुक्तवन्तो हे जातवेद, एतदस्मद्गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्व त्वं नस्तेजस्वी किमेतद्यक्षमिति । तथाऽस्त्विति

विधिदर्शनात् । अतोऽत्रैव तात्पर्यमर्थान्तरतात्पर्यप्रदर्शनं तु संभावनामात्रेणेति द्रष्टव्यम् । ईश्वरत्य सेतवो मर्यादा वर्णाश्रमादिधर्मास्तद्भेदकान् । जगतः स्थेम्ने स्थैर्याय स्वयोगमाहात्म्यनिर्मितेन सत्त्वरजस्तमसां त्रयाणां गुणानां योगो युक्तिर्घटनं माया तन्माहात्म्ये(न निर्मितं ते)नेत्यर्थः ॥ १४ ॥ १ ॥ १५ ॥ २ ॥

तदभ्यद्रवत्तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ १७ ॥ ४ ॥ तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वं दहेयं यदिदं पृथिव्यामिति ॥ १८ ॥ ५ ॥ तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ १९ ॥ ६ ॥ अथ वायुमब्रुवन्वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ २० ॥ ७ ॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवी-

---

तद्यक्षमभ्यद्रवत्तत्प्रतिगतवानग्निः । तं च गतवन्तं पिपृच्छिषु तत्समीपेऽप्रगल्भत्वात्तूष्णींभूतं तद्यक्षमभ्यद्रव(वद)दग्निं प्रत्यभाषत कोऽसीति । एवं ब्रह्मणा पृष्टोऽग्निरब्रवीदग्निर्वा अग्निनामाऽहं प्रसिद्धो जातवेदा इति च नामद्वयेन प्रसिद्धतयाऽऽत्मानं श्लाघयन् । इत्येवमुक्तवन्तं ब्रह्मावोचत्तस्मिन्नेवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यमिति । सोऽब्रवीदिदं जगत्सर्वं दहेयं भस्मी कुर्याम् । यदिदं स्थावरादि पृथिव्यामिति । पृथिव्यामित्युपलक्षणार्थं यतोऽन्तरिक्षस्थमपि दह्यत एवाग्निना । तस्मा एवमभिमानवते ब्रह्म तृणं निदधौ पुरोऽग्नेः स्थापितवद्ब्रह्मैतत्तृणमात्रं ममाग्रतो दह न चेदस्य दग्धुं समर्थो मुञ्च दग्धृत्वाभिमानं सर्वत्रेत्युक्तस्तत्तृणमुपप्रेयाय तृणसमीपं गतवान्सर्वजवेन सर्वोत्साहकृतेन वेगेन गत्वा न शशाक नाशकद्दग्धुं स जातवेदास्तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञस्तत एव यक्षादेव तूष्णीं देवान्प्रति निवर्तते निवृत्तः प्रतिगतवान् । नैतद्यक्षमशकं शक्तवानहं विज्ञातुं विशेषतो यदेतद्यक्षमिति ॥ १६ ॥ ३ ॥ १७ ॥ ४ ॥ १८ ॥ ५ ॥ १९ ॥ ६ ॥

अथ वायुमित्यथानन्तरं वायुमब्रुवन्हे वायवेतद्विजानीहीत्यादि समानार्थं पूर्वेण । वानाद्गमनाद्गन्धनाद्वायुः । मातर्यन्तरिक्षे श्वयतीति

तृतीयखण्डशेषभाष्यं स्पष्टमतो न विवृतमिति ॥ १६ ॥ ३ ॥ १७ ॥ ४ ॥ १८ ॥ ५ ॥ १९ ॥ ६ ॥

---

१ क. ख. ग. घ. च. °गत्वा सर्वे° ।

न्मातरिश्वा वा अहमस्मीति ॥ २१ ॥ ८ ॥ तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वमाऽददीय यदिदं पृथिव्यामिति ॥ २२ ॥ ॥ ९ ॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकाऽऽदातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ २३ ॥ १० ॥ अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति । तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥२४॥ ११ ॥ स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमाꣳ हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति ॥ २५ ॥ १२ ॥

इति तृतीयः खण्डः ॥ ३ ॥

मातरिश्वा । इदं सर्वमप्याददीय गृह्णीयाम् । यदिदं पृथिव्यामित्यादि समानमेव ॥ २० ॥ ७ ॥ २१ ॥ ८ ॥ २२ ॥ ९ ॥ २३ ॥ १० ॥

अथेन्द्रमिति । अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहीत्यादि पूर्ववत् । इन्द्रः परमेश्वरो मघवान्खलवस्त्वात्तथेति तदभ्यद्रवत्तस्मादिन्द्रादात्मनमीपं गतात्तद्ब्रह्म तिरोदधे तिरोभूतमिन्द्रस्येन्द्रत्वाभिमानोऽतितरां निराकर्तव्य इत्यतः संवादमात्रमपि नादाद्ब्रह्मेन्द्राय तद्यक्षं यस्मिन्नाकाश आकाशप्रदेश आत्मानं दर्शयित्वा तिरोभूतमिन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाश आत्सीत्स इन्द्रस्तस्मिन्नेवाऽऽकाशे तस्थौ । किं तद्यक्षमिति ध्यायन्न निववृतेऽग्न्यादिवत्तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्योमारूपिणी प्रादुरभूत्स्त्रीरूपा । स इन्द्रस्तामुमां बहुशोभमानां सर्वेषां हि शोभमानानां शोभनतमां विद्यां तदा बहुशोभमानेति विशेषणमुपपन्नं भवति । हैमवतीं हेमकृताभरणवतीमिव बहुशोभमानामित्यर्थः । अथवोमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा तामुपजगाम । इन्द्रस्तां होमां किलोवाच पप्रच्छ ब्रूहि किमेतद्दर्शयित्वा तिरोभूतं यक्षमिति ॥ २४ ॥११॥ २५ ॥ १२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ केनोपनिषद्भाष्ये तृतीयः खण्डः ॥ ३ ॥

॥ २० ॥ ७ ॥ २१ ॥ ८ ॥ २२ ॥ ९ ॥ २३ ॥ १० ॥ २४ ॥ ११ ॥ २५ ॥ १२ ॥

इति तृतीयः खण्डः ॥ ३ ॥

+ अत्राऽऽददीयमिति सानुस्वारः पाठ उपलभ्यते । स च छान्दसो लेखकप्रमादाद्वा बोध्यः ।

* सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदांचकार ब्रह्मेति ॥ २६ ॥ ॥ १ ॥ तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत्प्रथमो विदांचकार ब्रह्मेति ॥ २७ ॥ २ ॥ तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदांचकार ब्रह्मेति ॥ २८ ॥ ३ ॥

सा ब्रह्मेति होवाच ह किल ब्रह्मण ईश्वरस्यैव विजय ईश्वरेणैव जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये यूयं महीयध्वं महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्तु युष्माकमयमस्माकमेवायं विजयोऽस्माकमेवायं महिमेति। ततस्तस्मादुमावाक्याद्धैव विदांचकार ब्रह्मेतीन्द्रोऽवधारणात्ततो हैवेति न स्वातन्त्र्येण ॥ २६ ॥ १ ॥

यस्मादग्निर्वाय्विन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना सामीप्यमुपगतास्तस्मादैश्वर्यगुणैरतितरामिव शक्तिगुणादिमहाभाग्यैरन्यान्देवानतितरामतिशयेन शेरत इवैते देवाः। इवशब्दोऽनर्थकोऽवधारणार्थो वा। यदग्निर्वायुरिन्द्रस्ते हि देवा यस्मादेनद्ब्रह्म नेदिष्ठमन्तिकतमं प्रियतमं पस्पृशुः स्पृष्टवन्तो यथोक्तैर्ब्रह्मणः संवादादिमकारैस्ते हि यस्माच्च हेतोरेनद्ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्येतद्विदांचक्रुरित्येतद्ब्रह्मेति ॥ २७ ॥ २ ॥

यस्मादग्निश्चाथ अपीन्द्रवाक्यादेव विदांचक्रतुरिन्द्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्मेत्यतस्तस्माद्वा इन्द्रोऽतितरामतिशयेन शेत इवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श यस्मात्स ह्येनत्प्रथमो विदांचकार ब्रह्मेत्युक्तार्थं वाक्यम् ॥ २८ ॥ ॥ ३ ॥

॥ २६ ॥ १ ॥ २७ ॥ २ ॥ २८ ॥ ३ ॥

---

* ग. घ. क. च. छ. ज. ञ. ट. पुस्तकेषु सेति पदं नास्ति।

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन्न्य-
मीमिषदा३ इत्यधिदैवतम् ॥ २९ ॥ ४ ॥ अथा-
ध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्य-
भीक्ष्णं संकल्पः ॥ ३० ॥ ५ ॥

तस्य प्रकृतस्य ब्रह्मण एष आदेश उपमोपदेशो निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेश इत्युच्यते । किं तद्यदेतत्प्रसिद्धं लोके विद्युतो व्यद्युतद्विद्योतनं कृतवदित्येतदनुपपन्नमिति । विद्युतो विद्योतनमिति कल्प्यते । आ इत्युपमार्थे । विद्युतो विद्योतनमिवेत्यर्थः । " यथा सकृद्वि-द्युतम् " इति श्रुत्यन्तरे च दर्शनाद्विद्युदिव हि सकृदात्मानं दर्शयित्वा तिरो-भूतं ब्रह्म देवेभ्यः । अथवा विद्युतस्तेज इत्यध्याहार्यम् । व्यद्युतद्विद्योतितवत्, आ इव । विद्युतस्तेजः सकृद्विद्योतितवदिवेत्यभिप्रायः । इतिशब्द आदेश-प्रतिनिर्देशार्थ इत्ययमादेश इति । इच्छब्दः समुच्चयार्थः । अयं चापरस्त-स्याऽऽदेशः । कोऽसौ । न्यमीमिषत् । यथा चक्षुर्न्यमीमिषन्निमेषं कृतवत् । स्वार्थे णिच् । उपमार्थ एवाऽऽकारः चक्षुषो विषयं प्रति प्रकाशातिरोभाव इव चेत्यर्थः । इत्यधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम् ॥ २९ ॥ ॥ ४ ॥

अथानन्तरमध्यात्मं प्रत्यगात्मविषय आदेश उच्यते । यदेतद्गच्छतीव च मन एतद्ब्रह्म द्यौकत इव विषयी करोतीव यथाऽनेन मनसैतद्ब्रह्मोपस्मरति समीपतः स्मरति साधकोऽभीक्ष्णं भृशं संकल्पश्च मनसो ब्रह्मविषयो

विद्युतः सकाशाद्विद्योतनं कृतवदित्यनुपपन्नं ब्रह्मणः स्वयंज्योतिष्ट्वात्पराधीनप्रका-शानुपपत्तेर्विद्युत्संबन्धि द्योतनं कृतवदित्यनुपपन्नमन्याश्रयस्य विद्योतनस्यान्यकर्तृ[क]-त्वानुपपत्तेरतो यथाश्रुतासंभवादन्यत्र तात्पर्यं वक्तव्यमित्यर्थः । प्रतिनिर्देशार्थ इति । परामर्शार्थः । चक्षुषो निमेषणं द्रुतं भवतीति प्रसिद्धं तद्वद्ब्रह्मणि क्षिप्रकारित्वं सृष्ट्यादौ प्रतिबन्धाभावेनाऽऽयासाभावेन च द्रुतकारित्वं धर्मोऽधिदैवतम् । यद्धचेयं ब्रह्म तद्यथा विद्युतः प्रकाशो युगपद्दिश्यव्यापकस्तथा निरतिशयज्योतीरूपं द्रुतं सकलसृष्ट्यादि-कारि पारमैश्वर्यसंपन्नमित्युपमानोपदेशेनोक्तम् ॥ २९ ॥ ४ ॥

अधुना प्रत्यगात्मतया ब्रह्मणो यथाऽभिव्यक्तिः स्यात्तथोपदिश्यत इत्याह—अथा-नन्तरमिति । एतत्प्रकृतं ज्योतीरूपं ब्रह्म प्रति मदीयं मनो गच्छद्वर्तत इति चिन्तये-दिति य उपदेशः स आध्यात्मिकोऽभीक्ष्णं पौनःपुन्येन मम मनसः संकल्पो ब्रह्मविषय

१ क. ख. 'वेनोपासनाभा' ।

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ३१ ॥ ॥ ६ ॥ उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ३२ ॥ ७ ॥

मनउपाधिकत्वाद्धि मनसः संकल्पस्मृत्यादिप्रत्ययैरभिव्यज्यते ब्रह्मविषयीक्रियमाणं इव चातः स एष ब्रह्मणोऽध्यात्मादेशो विद्युन्निमेषणवदधिदैवतं द्युतं प्रकाशनधर्म्यध्यात्मं च मनः प्रत्ययसमकालाभिव्यक्तधर्मीत्येष आदेशः। एवमादिश्यमानं हि ब्रह्म मन्दबुद्धिगम्यं भवतीति ब्रह्मण आदेशोपदेशः। नाहि निरुपाधिकमेव ब्रह्म मन्दबुद्धिभिराकलयितुं शक्यम् ॥ ३० ॥ ५ ॥

किंच तद्ब्रह्म ह किल तद्वनं नाम तस्य वनं तद्वनं तस्य प्राणिजातस्य प्रत्यगात्मभूतत्वाद्वननीयं संभजनीयमतस्तद्वनं नाम प्रख्यातं ब्रह्म तद्वनमिति यतस्तस्मात्तद्वनमित्यनेनैव गुणाभिधानेनोपासितव्यं चिन्तनीयमिति। अनेन नाम्नोपासकस्य फलमाह—स यः कश्चिदेवमेवोक्तं ब्रह्मैव यथोक्तगुणं वेदोपास्तेऽभि हैनमुपासकं सर्वाणि भूतान्यभिसंवाञ्छन्ति ह प्रार्थयन्त एव यथा ब्रह्म। एवमनुशिष्टः शिष्य आचार्यमुवाच ॥ ३१ ॥ ६ ॥

उपनिषदं रहस्यं यच्चिन्त्यं भो भगवन्ब्रूहीत्येवमुक्तवति शिष्य आहाऽऽचार्यः। उक्ताऽभिहिता ते तवोपनिषत्। का पुनः सेत्याह—ब्राह्मीं ब्रह्मणः परमात्मन इयं तां परमात्मविषयत्वादतीतविज्ञानस्य वावैव त उपनिषदमब्रूमेत्युक्तामेव परमात्मविद्यामुपनिषदमब्रूमेत्यवधारयत्युत्तरार्थम्। परमात्मविषयामुपनिषदं श्रुतवत उपनिषदं भो ब्रूहीति पृच्छतः शिष्यस्य कोऽभिप्रायः। यदि तावच्छ्रुतस्यार्थस्य प्रश्नः कुतस्ततः पिष्टपेषणवत्पुनरुक्तोऽन-

---

एवेति ध्यायतः प्रत्यग्भूतब्रह्माभिव्यक्तिः स्यादित्याह—मनउपाधिकत्वाद्धीति। उक्तमर्थं संक्षिप्याऽऽह—विद्युन्निमेषणवदिति। सगुणब्रह्मोपासनमैश्वर्यफलकमुक्तम्। तत्र विरक्त उत्तमाधिकारी परमरहस्यं पृच्छतीत्याह—एवमनुशिष्ट इति ॥ ३० ॥ ९ ॥ ३१ ॥ ६ ॥

परमरहस्यं श्रोत्रस्य श्रोत्रमित्यादिनोक्तमेवोत्तरार्थमित्युत्तरग्रन्थेन विद्याप्राप्त्युपायविधानार्थमुक्ता विद्या निरपेक्षेवेत्यवधारयति। अवधारणार्थत्वं प्रतिवचनस्य चोद्यमुखेन स्फुटयति—परमात्मविषयामित्यादिना। किं पूर्वोक्तोपनिषच्छेषतयाऽन्यदपे-

---

१ च, ज. ट. ड. °णमिव। २ क. ख. °पेक्ष्यते।

र्थकः प्रश्नः स्यादथ सावशेषोक्तोपनिषत्स्यात्ततस्तस्याः फलवचनेनोपसंहारो न युक्तः प्रेत्यास्माल्लोकादमृता भवन्तीति। तस्मादुक्तोपनिषच्छेषविषयोऽपि प्रश्नोऽनुपपन्न एवानवशेषितत्वात्। कस्तर्ह्यभिप्रायः प्रष्टुरित्युच्यते। किं पूर्वोक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तरापेक्षा। अथ निरपेक्षैव। सापेक्षा चेदपेक्षितविषयामुपनिषदं ब्रूहि। अथ निरपेक्षा चेदवधारय पिप्पलादवन्नातः परमस्तीत्येवमभिप्रायः। एतदुपपन्नमाचार्यस्यावधारणवचनमुक्ता त उपनिषदिति। ननु नावधारणमिदं यतोऽन्यद्वक्तव्यमित्याह तस्यै तपो दम इत्यादि सत्यं वक्तव्यमुच्यत आचार्येण नतूक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तराभिप्रायेण वा। किंतु ब्रह्मविद्याप्राप्त्युपायाभिप्रायेण वेदैस्तदङ्गैश्च सह पाठेन समीकरणात्तपःप्रभृतीनाम्। न हि वेदानां शिक्षाद्यङ्गानां च साक्षाद्ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वा सहपठितानामपि यथायोग्यं विभज्य विनियोगः स्यादिति चेद्यथा सूक्तवाकानुमन्त्रणमन्त्राणां यथादेवतं विभागस्तथा तपोदमकर्मसत्यादीनां ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वेति कल्प्यते। वेदानां तदङ्गानां चार्थप्रकाशकत्वेन कर्मात्मज्ञानोपायत्वमित्येवं ह्ययं विभागो युज्यतेऽर्थसंबन्धोपपत्तिसामर्थ्यादिति चेत्। नायुक्तेः। न ह्ययं विभागो घटनां प्राञ्चति। न हि सर्वक्रियाकारकफलभेदबुद्धितिरस्कारिण्या ब्रह्मविद्यायाः शेषापेक्षा सहकारिसाधनसंबन्धो वा युज्यते।

क्षते। शेषशब्देन फलोपकार्यङ्गं विवक्षितम्। सहकारिशब्देनानुपसर्जनमपि समुच्चयार्हं विवक्षितम्। एवं शिष्याभिप्रायमुपवर्ण्य समाधानमाह—एतदुपपन्नमिति। विद्याङ्गत्वहीनैः सह पाठात्तपःप्रभृतीनां विद्याङ्गत्वं नास्तीत्युक्तम्। तत्र योग्यतावशेन शेषशेषिभावः सहपाठस्त्वार्किंचित्कर इति शङ्कते—सहपठितानामपीति। "अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृत। अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽकाताम्" इत्यादिनैव सूक्तवाकेन सर्वयागसमाप्तौ देवतानुमन्त्रणं क्रियते। तत्र यद्यप्यस्मिन्सूक्तवाके बह्व्यो देवताः पठ्यन्ते तथाऽपि यस्मिन्यागे या देवताऽऽहूता तस्या एव विसर्जने योग्यतावशादस्य सूक्तवाकस्य यथा विनियोगस्तथा तपःप्रभृतीनामेव विद्याशेषत्वेन विनियोगो भविष्यतीत्यर्थः। भवेत्सूक्तवाकस्य विनियोगो योग्यतासंभवात्। न कर्मणां विद्याविरुद्धत्वेन योग्यतायां अयोग्यत्वादि-

---

१ क. °पदस्ततस्त°। २ क. ख. °म्। वेदवेदाङ्गैः शि°। ३ क. ख. ग. ङ. च. ज्ञ. ञ, °त्यागे°। ४ क. ख. ङ. च. ज्ञ. ञ. यस्मिंस्त्यागे।

तस्यै तपो दमः कर्मेति प्रतिष्ठा

सर्वविषयव्यावृत्तप्रत्यगात्मविषयनिष्ठत्वाच्च ब्रह्मविद्यायास्तत्फलस्य च निःश्रेयसस्य,

मोक्षमिच्छन्सदा कर्म त्यजेदेव ससाधनम् ।
त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥ [इति] ।

तस्मात्कर्मणां सहकारित्वं कर्मशेषापेक्षा वा न ज्ञानस्योपपद्यते । ततोऽसदेव सूक्तवाकानुमन्त्रणवद्यथाद्योगं विभाग इति । तस्मादवधारणार्थतैव प्रश्नप्रतिवचनस्योपपद्यते । एतावत्येवेयमुपनिषदुक्ताऽन्यनिरपेक्षाऽमृतत्वाय ॥ ३२ ॥ ७ ॥

यामिमां ब्राह्मीमुपनिषदं तवाग्रेऽब्रूमेति तस्यै तस्या उक्तायाः उपनिषदः प्राप्त्युपायभूतानि तपआदीनि । तपः कायेन्द्रियमनसां समाधानम् । दम उपशमः । कर्माग्निहोत्रादि । एतैर्हि संस्कृतस्य सत्त्वशुद्धिद्वारा तत्त्वज्ञानोत्पत्तिर्दृष्टा ह्यमृदितकल्मषस्योक्तेऽपि ब्रह्मण्यप्रतिपत्तिर्विपरीतप्रतिपत्तिश्च यथेन्द्रविरोचनप्रभृतीनाम् । तस्मादिह वाऽतीतेषु वा बहुषु जन्मान्तरेषु तपआदिभिः कृतसत्त्वशुद्धेर्ज्ञानं समुत्पद्यते यथाश्रुतम् ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति मन्त्रवर्णात् । " ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः " इति स्मृतेः । इतिशब्द उपलक्षणप्रदर्शनार्थः । इत्येवमाद्यन्यदपि ज्ञानोत्पत्तेरुपकारकममानित्वमदम्भित्वमित्याद्युपदर्शितं भवति । प्रतिष्ठा पादौ पादाविवास्यास्तेषु हि सत्सु प्रतितिष्ठति ब्रह्मविद्या प्रवर्तते पद्भ्यामिव पुरुषः । वेदाश्चत्वारः

दित्याह—नायुक्तेरिति । विद्याया विषयपर्यालोचनया फलपर्यालोचनया च नास्ति तत्त्वतः संबन्धयोग्यता प्रत्युत कर्मणामनुपयोगात्कर्मणां त्यागे एव मुमुक्षुणा कर्तव्य त्याह—सर्वविषयेति । सर्वेभ्य उत्पाद्यादिभ्यः कर्मगोचरेभ्यो व्यावृत्तो यः प्रत्यगात्मा स एव ब्रह्मरूपेण विद्याया व्यावर्तको विषयस्तन्निष्ठत्वाद्विद्यायास्तत्फलस्य च कर्मवैलक्षण्यादित्यर्थः ॥ ३२ ॥ ॥ ७ ॥

छन्दापेक्षितं यच्छन्दं पूरयति—यामिमामिति । प्राग्निः सगुणविषया निर्गु-

वेदाः सर्वाङ्गानि(णि) सत्यमायतनम् ॥ ३३ ॥
॥ ८ ॥ यो वा एतामेवं वेदापहत्य पाप्मानम[न]-
न्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति
॥ ३४ ॥ ९ ॥

इति चतुर्थः खण्डः ॥ ४ ॥

==========

सर्वाणि चाङ्गानि शिक्षादीनि षट् कर्मज्ञानप्रकाशकत्वाद्वेदानां तद्रक्षणार्थत्वा-दङ्गानां प्रतिष्ठात्वम् । अथवा प्रतिष्ठाशब्दस्य पादरूपकल्पनार्थत्वाद्वेदास्त्विन्द्रियाणि सर्वाङ्गानि(णि) शिरआदीनि । अस्मिन्पक्षे शिक्षादीनां वेदग्रहणेनैव ग्रहणं कृतं प्रत्येतव्यम् । अङ्गिनि गृहीतेऽङ्गानि गृहीतान्येव भवन्ति । तदायतनत्वादङ्गानाम् । सत्यमायतनं यत्र तिष्ठत्युपनिषत्तदायतनं सत्यमिति । अमायिताऽकौटिल्यं वाङ्मनःकायानां तेषु ह्याश्रयति विद्या येऽमायाविनः साधवः । नासुरप्रकृतिषु मायाविषु । "न येषु जिह्ममनृतं न माया च" इति श्रुतेः । तस्मात्सत्यमायतनमिति कल्प्यते । तपआदिष्वेव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्वज्ञापनार्थम् ।

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राच्च सत्यमेकं विशिष्यते ॥ इति स्मृतेः ॥३३॥८॥

यो वा एतां ब्रह्मविद्यां केनेषितमित्यादिना यथोक्तामेवं महाभागां ब्रह्म ह देवेभ्य इत्यादिस्तुतां सर्वविद्याप्रतिष्ठां वेदामृतत्वं हि विन्दत इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगमयते—अपहत्य पाप्मानमविद्याकामकर्मलक्षणं संसारबीजं विधूयानन्तेऽपर्यन्ते । स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत् । अनन्त इति विशेषणान्न त्रिविष्टपे । अनन्तशब्द औपचारिकोऽपि स्यादित्यत आह—ज्येय इति । ज्येये ज्यायसि सर्वमहत्तरे स्वात्मनि मुख्य एव प्रतितिष्ठति । न

णब्रह्मात्मविषया चेत्यर्थः । पादरूपकल्पनेति । प्रसिद्धपादसामान्यस्य कल्पितत्वादितरैरप्यङ्गैः कल्पनारूपैर्भवितव्यमित्यर्थः । तस्यै तपो दमः कर्मेत्यत्रत्येतिशब्दस्योपलक्षणार्थत्वात्सत्यमपि संग्रहीतव्यं कथं पृथगुच्यत इत्याशङ्क्याऽऽह—तपआदिष्वेवेति ॥ ३३ ॥ ८ ॥

सगुणविद्यायाः क्रममुक्त्यर्थत्वात्क्रमेण प्राप्यं यत्कैवल्यं निर्गुणविद्याफलं तत्पूर्वोक्तमिहोपसंहियत इत्याह—यो वा एतामित्यादिना ॥ ३४ ॥ ९ ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ।

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो
बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं
माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरो-
दनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि
निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।
ॐ शान्तिः शान्तिः शान्तिः ॥

इति सामवेदीयतलवकारोपनिषत्समाप्ता ॥

पुनः संसारमापद्यत इत्यभिप्रायः ॥ ३४ ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये चतुर्थः खण्डः ॥ ४ ॥

समाप्तमिदं श्रीमच्छंकराचार्यविरचितं तलवकारोपनिषदप-
रपर्यायकेनोपनिषत्पदभाष्यम् ।

योऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धो बोधाम्बुधिः साक्षात्सोऽहं नित्योऽमयः प्रभुः ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यश्रीमदानन्द-
ज्ञानकृतौ श्रीमच्छांकरतलवकारोपनिषदपरपर्यायकेनोपनिष-
त्पदभाष्यटिप्पणं संपूर्णम् ॥

ॐ तत्सद्ब्रह्मणे नमः ।

आनन्दगिरिकृतटीकासंवलितशांकरवाक्यभाष्योपेता ।

केनोपनिषत् ।

—:⊙:—

अथ शांकरभाष्यम् ।

समाप्तं कर्मात्मभूतप्राणविषयं विज्ञानं कर्म चानेकप्रकारम् । ययोर्विकल्पसमुच्चयानुष्ठानाद्दक्षिणोत्तराभ्यां सृतिभ्यामावृत्त्यनावृत्ती भवतः । अत ऊर्ध्वं फलनिरपेक्षज्ञानकर्मसमुच्चयानुष्ठानात्कृतात्मसंस्कारस्योच्छिन्नात्मज्ञानप्रतिबन्धकस्य द्वैतविषयदोषदर्शिनो निर्ज्ञातावशेषबाह्यविषयत्वात्संसारबीजम-

---

अथाऽऽनन्दगिरिकृता टीका ।

प्रयत्नाद्यन्तरेणैव मनआदेः प्रवर्तकम् ।
विदिताविदितान्यत्वसिद्धं ब्रह्माहमद्वयम् ॥

केनेषितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो व्याख्यायापि न तुतोष भगवान्भाष्यकारः शारीरकैर्न्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानश्रुत्यर्थसंग्रहकैर्वाक्यैर्व्याचिख्यासुः पूर्वकाण्डेन संबन्धमभिधित्सुः पूर्वकाण्डार्थं संक्षेपतो दर्शयति—**समाप्तमिति** । कर्मणामात्मभूत आश्रयभूतः प्राणस्तस्य शुद्धत्वादिगुणविशिष्टस्योपासनं पूर्वत्रातिवृत्तं कर्म च नित्यनैमित्तिकाद्यनेकप्रकारमविदुषामतिक्रान्तमित्यर्थः । ताभ्यां ज्ञानकर्मभ्यामेव मोक्षसिद्धेर्न मुमुक्षोः पृथगुपनिषदारम्भेतिशङ्कानिरासाय ज्ञानकर्मणी विशिनष्टि—**ययोरिति** । ज्ञानमनादृत्य कर्मण एव निरपेक्षसाधनतयाऽनुष्ठानं विकल्पस्ततश्चन्द्रमण्डलं प्राप्याऽऽवर्तते केवलस्य ज्ञानस्य कर्मसमुच्चितस्य वाऽनुष्ठानाद्ब्रह्मलोकं प्राप्य स्थित एव तस्माच्चाऽऽवर्तत इत्यापेक्षिक्यनावृत्तिर्भवति न पुनरात्यन्तिकी । कृतकत्वपरिच्छेदाभ्यामनित्यत्वानुमानात् । अतः संसारफलकमेव कर्मकाण्डमित्यर्थः । अस्त्वयं कर्मकाण्डार्थस्तथाऽपि नियतपूर्वोत्तरभावानुपपत्तिलभ्यः कथं हेतुहेतुमद्भावः संबन्धः कर्मकाण्डेन ज्ञानकाण्डस्येत्याकाङ्क्षायामाह—**अत ऊर्ध्वमिति** । कामिनाऽनुष्ठितं कर्म यद्यपि संसाराय भवति तदेव तु निष्कामेणानुष्ठितं सत्त्वशुद्धये स्यात् । शुद्धसत्त्वस्य चानात्मज्ञानाभिमुख्यं न जायते । अनात्माभिनिवेशस्यानर्थसाधनतयाऽवधारितत्वादात्मविषयैव जिज्ञासा जायते । जिज्ञासोश्चाऽऽत्मनिरूपणायो-

ज्ञानमुच्छित्सतः प्रत्यगात्मविषयजिज्ञासोः केनेषितमित्यात्मस्वरूपतत्त्व-विज्ञानायायमध्याय आरभ्यते । तेन च मृत्युपदमज्ञानमुच्छेत्तव्यं तत्तन्त्रो हि संसारो यतः । अनधिगतत्वादात्मनो युक्ता तदधिगमाय तद्विषया जिज्ञासा । कर्मविषये चानुक्तिः । तद्विरोधित्वात् । अस्य विजिज्ञासितव्य-स्याऽऽत्मतत्त्वस्य कर्मविषयेऽवचनं कस्मादिति चेदात्मनो हि यथावद्वि-ज्ञानं कर्मणा विरुध्यते । निरतिशयब्रह्मस्वरूपो ह्यात्मा विजिज्ञापयिषितः । " तदेव ब्रह्म त्वं विद्धि नेदं यदिदम् " इत्यादिश्रुतेः । नहि स्वाराज्येऽभि-षिक्तो ब्रह्मत्वं गमितः कंचन × नमितुमिच्छत्यतो ब्रह्मास्मीति संबुद्धो न कर्म कारयितुं शक्यते । नह्यात्मानमवगम्यार्थं ब्रह्म मन्यमानः प्रवृत्तिं प्रयोज-जनवतीं पश्यति । न च निष्प्रयोजना प्रवृत्तिरतो विरुध्यत एव कर्मणा ज्ञानम् । अतः कर्मविषयेऽनुक्तिर्विज्ञानविशेषविषयैव जिज्ञासा । कर्मानारम्भ

पनिषदारभ्यत इति हेतुहेतुमद्भाव इत्यर्थः । आत्मस्वरूपब्रह्मतत्त्वविज्ञानायायमध्याय आरभ्यते चेत्किं तेन विज्ञानेन फलं स्यादित्यत आह—तेन चेति । यतोऽन्वयव्य-तिरेकाभ्यामज्ञानतन्त्रा संसारप्रसिद्धिस्तदुच्छेदेनाऽऽत्यन्तिकसंसारोच्छेदः फलमित्यर्थः । मृत्युकारणमात्माज्ञानमुच्छेत्तुमिच्छत आत्मजिज्ञासा जायत इत्युक्तम् । तदसत् । अहं-प्रत्ययेनैवाऽऽत्मनोऽधिगतत्वादधिगते जिज्ञासानुपपत्तेरित्याशङ्क्याऽऽह—अनधिग-तत्वादिति । अहंप्रत्ययस्य मनुष्यत्वादिसमानाधिकृतस्य व्यतिरिक्तात्मप्रमापकत्वाभि-द्धेर्वादिना विप्रतिपत्तिदर्शनाच्च युक्ता जिज्ञासेत्यर्थः । तथाऽपि कर्मकाण्डे देहव्यतिरिक्त-स्याऽऽत्मनो विध्यपेक्षितत्वेन निरूपितत्वात्पुनर्जिज्ञासानुपपत्तौ कथं जिज्ञासोरुपनिषद्-रभ्यत इत्याशङ्क्याऽऽह—कर्मविषय इति । अस्ति देहादिव्यतिरिक्तः परलोकसंबन्ध्यात्मे-त्येतावदेव स्वर्गकामादिचोदनाभिरपेक्षितं नतु ब्रह्मात्मतत्त्वं तस्य कर्मविरुद्धत्वात्ततस्तज्जि-ज्ञासा युक्तेत्यर्थः । संग्रहवाक्यं विवृणोति—अस्येत्यादिना । निरतिशयब्रह्मस्वरूप आ-त्मोपनिषदि विजिज्ञापयिषितोऽस्तु । कथमेतावता कर्मणा विरोध इत्याकाङ्क्षायामाह—न-हीति । देवताराधनरूपो हि यागो ब्रह्मविच्च सर्वदेवतात्मभूतः पशुभावाच्च व्यावृत्तः कथं दे-वतां प्रणमेदित्यर्थः । ब्रह्मात्मतत्त्वज्ञानं कर्मविरुद्धं चेत्तर्हि श्रुत्या ब्रह्मात्मत्वोपदेशेनार्थात्क-र्म कर्तव्यमित्याजयिषितमित्यननुष्ठानमेव प्रसज्येतातो जिज्ञासाहेतुत्वेनाभिमतः कर्मकाण्डेन सं-बन्धोऽसंगत इत्याशङ्क्यामुद्भाव्याभिहितं संबन्धं समर्थयति—कर्मानारम्भ इत्यादिसूत्रेण ।

× इडागमश्चिन्त्यः ।

---

१ क. ख. ङ. °मेवात्मार्थं ।

इति चेन्न । निष्कामस्य संस्कारार्थत्वात् । यदि ह्यात्मविज्ञानेनाऽऽत्माविद्याविषयत्वात्परित्यजयिषितं कर्म ततः " प्रक्षलनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् " इत्यनारम्भ एव कर्मणः श्रेयानरूपफलत्वादायासबहुलत्वात्तत्त्वज्ञानादेव च श्रेयःप्राप्तेरिति चेत्सत्यम् । एतदविद्याविषयं कर्मालपफलत्वादिदोषवद्बन्धरूपं च सकामस्य । " कामान्यः कामयते " " इति तु कामयमानः " इत्यादिश्रुतिभ्यः । न निष्कामस्य । तस्य तु संस्कारार्थान्येव कर्माणि भवन्ति तन्निर्वर्तकाश्रयप्राणविज्ञानसहितानि । " देवयाजी श्रेयानात्मयाजी वा " इत्युपक्रम्याऽऽत्मयाजी तु करोति " इदं मेऽनेनाङ्गं संस्क्रियते " इति संस्कारार्थमेव कर्माणीति वाजसनेयके ।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्

इत्यादिस्मृतेश्च । प्राणादिविज्ञानं च केवलं कर्मसमुच्चितं वा सकामस्य प्राणात्मप्राप्त्यर्थमेव भवति । निष्कामस्य त्वात्मज्ञानप्रतिबन्धनिर्मार्ष्टयै भवति । आदर्शनिर्मार्जनवत् । उत्पन्नात्मविद्यस्य त्वनारम्भो निरर्थकत्वात् ।

उत्पत्तिविधिविहितानां कर्मणां संस्कारार्थत्वे प्रमाणमाह—देवयाजी श्रेयानित्यादिना । फलकामनया देवान्यो यजते स किं श्रेयानुताऽऽत्मशुद्ध्यर्थमेव स्वर्गाद्यासङ्गं हित्वा यो यजते स आत्मयाजी श्रेयानिति प्रश्नं कृत्वाऽऽत्मयाजी श्रेयानिति निरूपितं शतपथे कामानुपघातसहितं मे ममाङ्गमनेन कर्मणा संस्क्रियत इति संस्कारार्थत्वेनैव करोति न कामवशग इत्यर्थः । ब्राह्मी ब्रह्मज्ञानार्हा । क्रियते तनुरिति । तनुस्थ आत्मा लक्ष्यते । ननु प्राणाद्युपासनं प्राणादिभावप्राप्त्यर्थमेव, " तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति " इति श्रुतेः । कथमुक्तं कर्मनिर्वर्तकाश्रयप्राणोपासनसहितानि कर्माणि संस्कारार्थानीति तत्राऽऽह—प्राणादिविज्ञानं चेति । विविदिषावाक्येन(ण) यज्ञाद्युपलक्षितस्य सर्वस्य कर्मण आत्मज्ञानार्थत्वेन विनियुक्तत्वादुपासनस्य च मानसकर्मत्वादात्मज्ञानप्रतिबन्धकस्य कल्मषस्य निबर्हणद्वारेण स्यादात्मज्ञानार्थत्वमित्यर्थः । अज्ञाभिप्रायेण सप्रयोजनत्वात्तं प्रत्यनारम्भप्रसङ्ग आश्रयहीन इत्युक्तम् । ज्ञान्यभिप्रायेण त्वनिष्टापादनस्येष्टापादनरूपत्वात्प्रसङ्गस्याऽऽभासत्वमाह—उत्पन्नात्मविद्यस्येति । न केवलं श्रुतिप्रामाण्यादेव विवेकिनः कर्मानारम्भः साध्यसिद्धौ साधनं नाऽऽद्रियत इति लौकिकन्यायाच्च कर्मानारम्भः सिद्ध इत्यर्थः । ज्ञानफले कैवल्येऽनुपयोगाच्च ज्ञानिनः कर्मानारम्भ इष्ट इत्याह—

हरिः ॐ केनेषितं पतति प्रेषितं मनः ।

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ इति ।

" क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः संन्यास एवात्यरेचयत् " इति " त्यागेनैके " " नान्यः पन्था विद्यते " इत्यादिश्रुतिभिश्च न्यायाच्च । उपायभूतानि हि कर्माणि संस्कारद्वारेण ज्ञानस्य ज्ञानेन त्वमृतत्वप्राप्तिः, " अमृतत्वं हि विन्दते " " विद्यया विन्दतेऽमृतम् " इत्यादिश्रुतिस्मृतिभ्यश्च । नहि नद्याः पारगो नावं न मुञ्चति यथेष्टदेशगमनं प्रति स्वातन्त्र्ये सति । नहि स्वभावसिद्धं वस्तु सिषाधयिषति साधनैः स्वभावसिद्धश्चाऽऽत्मा तथा नाऽऽपिपायिषितः, आत्मत्वे सति नित्याप्तत्वात् । नापि विचिकारयिषितः, आत्मत्वे सति नित्यत्वादविकारित्वादविषयत्वादमूर्तत्वाच्च । श्रुतेश्च " न वर्धते कर्मणा " इत्यादि । स्मृतेश्च " अविकार्योऽयमुच्यते " इति । न च संचिकीर्षितः । " शुद्धमपापविद्धम् " इत्यादिश्रुतिभ्यः । अनन्यत्वाच्च । अन्येनान्यत्संस्क्रियते, न चाऽऽत्मनोऽन्यभूता क्रियाऽस्ति, न च स्वेनैवाऽऽत्मना स्वमात्मानं संचिकीर्षेत् । न च वस्त्वन्तराधानं नित्यप्राप्तिर्वा वस्त्वन्तरस्य नित्या । नित्यत्वं चेष्टं मोक्षस्य । अत उत्पन्नाविद्यस्य कर्मारम्भोऽनुपपन्नः । अतो व्यावृत्तबाह्यबुद्धेरात्मविज्ञानाय केनेषितमित्याद्यारम्भः । प्रवृत्तिलिङ्गाद्विशेषार्थः प्रश्न उपपन्नः । रथादीनां हि चेतनावदधिष्ठितानां प्रवृत्तिर्दृष्टा नानधिष्ठितानाम् । मनआदीनां चाचेतनानां प्रवृत्तिर्दृश्यते । तद्धि लिङ्गं चेतनाव-

---

नहि स्वभावसिद्धमित्यादिना । उत्पत्तिराप्तिर्विकृतिः संस्कृतिश्चेति चतुर्विधं क्रियाफलं स्वरूपावस्थाने कैवल्ये न संभवतीत्युक्तम् । यदि च परमानन्दगुणस्याऽऽत्मन्याधानं ब्रह्माण्डाद्बहिःस्थितब्रह्मप्राप्तिर्वा जीवस्य कैवल्यं कल्प्यते तर्ह्यनित्यत्वं दुर्वारमित्याह—न च वस्त्वन्तराधानमिति । एवमुपनिषदारम्भं संभाव्य वाक्यस्यार्थं संगृह्णाति—प्रवृत्तिलिङ्गादिति । शिष्याचार्ययोः प्रश्नप्रतिवचनरूपा श्रुतिः सुखप्रतिपत्त्यर्था प्रवृत्ता तत्र प्रश्नः किं ज्ञातेऽज्ञाते वेति चोद्यनिरासाय सामान्यतो ज्ञातेऽपि विशेषतश्चाज्ञाते संभवति विकल्पकरणवदिति सूत्रितमेतद्विवृणोति—रथादीनां हीति । मनआदीनामेव चेतनत्वादचेतनप्रवृत्तित्वादित्यसिद्धो हेतुरिति नाऽऽ-

---

१ क. ख. घ. ङ. ञ. सूचितं ।

केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥ श्रोत्रस्य श्रोत्रं

तोऽधिष्ठातुरस्तित्वे । करणानि हि मनआदीनि नियमेन प्रवर्तन्ते । तन्नासति चेतनावत्यधिष्ठातर्युपपद्यते । तद्विशेषस्य चानधिगमाच्चेतनावत्सामान्ये चाधिगते विशेषार्थः प्रश्न उपपद्यते । केनेषितं केनेष्टं कस्येच्छामात्रेण मनः पतति गच्छति स्वविषये नियमेन व्याप्रियत इत्यर्थः । मनुतेऽनेनेति विज्ञाननिमित्तमन्तःकरणं मनः प्रेषितमिवेत्युपमार्थः । नत्विषितप्रेषितशब्दयोरर्थोऽिह संभवतः । न हि शिष्यानिव मनआदीनि विषयेभ्यः प्रेषयत्यात्मा विविक्तनित्यचित्स्वरूपतया तु निमित्तमात्रं प्रवृत्तौ नित्यचिकित्साधिष्ठातृवत् । प्राण इति नासिकाभवः । प्रकरणात् । प्रथमत्वं चलनक्रियायाः प्राणनिमित्तत्वात्स्वतो विषयावभासमात्रं करणानां प्रवृत्तिः । चलिक्रिया तु प्राणस्यैव मनआदिषु । तस्मात्प्राथम्यं प्राणस्य प्रैति गच्छति युक्तः प्रयुक्त इत्येतत् । वाचो वदनं किंनिमित्तं प्राणिनां चक्षुःश्रोत्रयोश्च को देवः प्रयोक्ता । करणानामधिष्ठाता चेतनावान्यः स किंविशेषेण इत्यर्थः ॥ १ ॥

श्रोत्रस्य श्रोत्रमित्यादिप्रतिवचनं निर्विशेषस्य निमित्तत्वार्थम् । विक्रियादिविशेषरहितस्याऽऽत्मनो मनआदिप्रवृत्तौ निमित्तत्वमित्येतच्छ्रोत्रस्य श्रोत्र-

---

शङ्कनीयमित्याह—करणानि हीति । अन्यत्रमना अभूवं नादर्शमित्यादिलोकानुभवान्मनआदीनां करणत्वं सिद्धं ततः प्रदीपवदचेतनत्वं सिद्धमित्यर्थः । इच्छामात्रेणेति प्रयत्नाद्यभावो लक्ष्यते नत्विच्छास्तित्वं निर्विकारतायां विवक्षितत्वात् । प्रेषितमिवेतिवशब्दाध्याहारेण किमिति व्याख्यातम् । यथा राज्ञ इच्छामात्रेण काचिद्भृत्यप्रवृत्तिः काचिच्च वागादिव्यापारेण तद्वदिह किं न स्यादित्याशङ्क्याऽऽह—नात्विति । साक्षिण्यस्य सर्वस्यानित्यतयाऽवधारितत्वान्निष्क्रियं वस्तु पितृच्छिषितं ततो नार्थभेदः संभवतीत्यर्थः । विषयेभ्य इति । विषयग्रहणार्थं नित्यचिकित्सायामधिष्ठातुश्चकोरस्य संनिधिमात्रेण यथा राजभोजनादिप्रभृत्तिनिमित्तत्वं तद्वदित्यर्थः । प्रकरणादिति । करणसंनिधानादित्यर्थः ॥ १ ॥

प्रश्नवचनवाक्यार्थसंग्रहं विवृणोति—विक्रियादीत्यादिना । मनआदीनां यः प्रवर्तकः स किंविशेष इति प्रश्नस्य निर्विशेषतैव विशेष इत्युत्तरम् । क्रियाया गुणस्य संबन्धस्य वा विशेषस्य व्यावर्तकधर्मस्य दर्शयितुमशक्यत्वात्क्रियादिमत्त्वे घटादिवदनात्मप्रसङ्गादतो निर्विशेषचैतन्यात्मकोऽहमित्येवं ज्ञानं सम्यग्ज्ञानम् । न चाभावेन सद्धर्मत्वप्रसङ्गः । अस्य पृथक्सत्त्वाभावात्स्वरूपेण स्वकारकत्वादित्युक्तम् । अन्यत्र यदि

मित्यादिप्रतिवचनस्यार्थः । अनुगमात्तदनुगतानि ह्यत्रास्मिन्नर्थेऽक्षराणि। कथं शृणोत्यनेनेति श्रोत्रं तस्य शब्दावभासकत्वं श्रोत्रत्वम् । शब्दोपलब्धृरूपतयाऽवभासकत्वं न स्वतः श्रोत्रस्याचिद्रूपत्वात् । आत्मनश्च चिद्रूपत्वात् । यच्छ्रोत्रस्योपलब्धृत्वेनावभासकत्वं तदात्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युच्यते । यथा क्षत्रस्य क्षत्रं यथा वोदकस्यौष्ण्यमग्निनिमित्तमिति दग्धुरप्युदकस्य दग्धाऽग्निरुच्यते । उदकमपि ह्यग्निसंगोगादग्निरुच्यते । तद्वदनित्यं यत्संयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि । उदकस्येव दग्धृत्वमनित्यं हि तत्र तत्। यत्र तु नित्यमुपलब्धृत्वमग्नाविवौष्ण्यं स नित्योपलब्धिस्वरूपत्वाद्दग्धेवोपल-

---

शोक्त्यादिवत्कोऽपि विशेषोऽभविष्यत्तदा तमवक्ष्यत् । श्रुतिस्तूपलक्षणवृत्त्यैव प्रतिवचनं ब्रुवाणा निर्विशेषत्वं मन्यत इति श्रुत्यक्षरानुसारादृग्यत इत्याह—अनुगमादिति । निर्विशेषत्ववाचकपदाभावात्कथं निर्विशेषेऽक्षरानुगम इत्याह—कथमिति । निर्विशेषस्य वाचकशक्त्या वाक्यार्थत्वाभावेऽप्युपलक्षणवृत्त्या भविष्यतीत्यभिप्रेत्य श्रोत्रशब्दस्य तावन्मुख्यार्थमाह—शृणोतीति । शब्दावभासकत्वं स्वशक्त्यैव भविष्यति श्रोत्रस्य कथं तस्य शब्दावभासकत्वेनाऽऽत्मोपलक्षयितव्य इत्याकाङ्क्षायामाह—शब्दोपलब्धृरूपतयेति । शक्तिः सतः प्रकाशमानस्यैव वाच्या नासतोऽप्रकाशमानस्य नरविषाणायमानत्वेन शक्तिमत्त्वानुपपत्तेः । सत्ता प्रकाशश्चाऽऽत्मरूपं तद्भेदे मानाभावादत उपलब्धृतादात्म्येनैव श्रोत्रस्यावभासकत्वमुपलब्धृतादात्म्येनेति यद्युपलब्धोपलक्ष्यते तर्ह्युपलब्धुरप्यवभासकत्वमन्याधीनमित्यनवस्था प्राप्नोतीत्याशङ्क्याऽऽह—आत्मनश्चेति। स्वप्रकाशत्वादुपलब्धुः सत्ताप्रतीत्योरनन्यायत्तत्वान्नानवस्थेत्यर्थः । भवत्वेवमनवस्थाभावः । तथाऽपि कथं श्रोत्रस्य श्रोत्रमित्यात्मोच्यत इत्याशङ्क्याऽऽह—यच्छ्रोत्रस्येति । तदात्मनिमित्तत्वादिति । तस्याऽऽत्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युपलक्ष्यते निर्विशेषं चैतन्यमात्रमित्यर्थः । यथा क्षत्रस्येति । क्षत्रजातिनियामकं कर्म क्षत्रमित्युच्यते यथेत्यर्थः । यदि श्रोत्रादिसाक्ष्यात्माऽस्ति कथं लोकायतिकादेः श्रोत्रादिष्वेवोपलब्धृत्वव्यवहार इत्याशङ्क्याऽऽह—उदकमपीति । तद्वदुपलब्धृसंबन्धाच्छ्रोत्रादिष्वुपलब्धृत्वव्यवहार इत्यर्थः । भवन्मते तर्हि नित्योपलब्धिस्वभाव आत्मेति श्रोत्रादेः करणत्वं न स्यात् । क्रियायां हि करणोपेक्षेत्याकाङ्क्षायामाह—अनित्यं यदिति । प्रमातुर्यत्संबन्धादनित्यमुपलब्धृत्वं भवति बुद्धिपरिणामैस्तच्छ्रोत्रादिकरणं बुद्धिवृत्त्यपेक्षया भवतीत्यर्थः । श्रोत्रादिसंगते प्रमातर्यनित्योपलब्धृत्वसंभवेऽपि तवासङ्गस्य साक्षिणः कथमुपलब्धृत्वव्यपदेश इत्याशङ्क्याऽऽह—यत्र त्विति। उक्तमर्थं संक्षिप्याऽऽह-श्रोत्रा-

---

१ क. °ते तथे° ।

मनसो मनो यद्वाचो ह वाचं स उ प्राण-
स्य प्राणश्चक्षुषश्चक्षुः । अतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥

ब्धोच्यते । श्रोत्रादिषु श्रौतृत्वाद्युपलब्धिरनित्या नित्या चाऽऽत्मन्यतः श्रोत्रस्य श्रोत्रमित्याद्यक्षराणामर्थानुगमादुपपद्यते निर्विशेषस्योपलब्धिस्वरूपस्याऽऽत्मनो मनआदिप्रवृत्तिनिमित्तत्वमिति । मनआदिष्वेवं यथोक्तम् । वाचो ह वाचं प्राणस्य प्राण इति विभक्तिद्वयं सर्वत्रैव द्रष्टव्यम् । कथं पृष्टत्वात्स्वरूपनिर्देशः प्रथमयैव च निर्देशः । तस्य च ज्ञेयत्वात्कर्मत्वमिति द्वितीया । अतो वाचो ह वाचं प्राणस्य प्राण इत्यस्मात्सर्वत्रैव विभक्तिद्वयम् । यदेतच्छ्रोत्राद्युपलब्धिनिमित्तं श्रोत्रस्य श्रोत्रमित्यादिलक्षणं नित्योपलब्धिस्वरूपं निर्विशेषमात्मतत्त्वं बु[तद्बु]द्ध्वाऽतिमुच्यानवबोधनिमित्ताध्यारोपिताद्बुद्ध्यादिलक्षणात्संसारान्मोक्षणं कृत्वा धीरा धीमन्तः प्रेत्यास्माल्लोकाच्छरीरात्प्रेत्य वियुज्यान्यस्मिन्नप्रतिसंधीयमाने निर्निमित्तत्वादमृता भवन्ति । सति ह्यज्ञाने कर्माणि शरीरान्तरं प्रतिसंदधत आत्मावबोधे तु सर्वकर्मारम्भनिमित्ताज्ञानाविपरीतविद्याग्निविप्लुष्टत्वात्कर्मणामित्यनारम्भेऽमृता एव भवन्ति । शरीरादिसंतानाविच्छेदप्रतिसंधानाद्यपेक्षयाऽध्यारोपितमृत्युवियोगात्पूर्वमप्यमृताः सन्तो नित्यात्मस्वरूपत्वादमृता

दिष्विति । श्रोत्रादिषु निमित्तेषु सत्सु श्रोत्रादिलक्षते प्रमातरि श्रौतृत्वादिरूपोपलब्धिरित्युपलब्धृत्वमित्यर्थः । मनसो मन इत्यादिष्वेवमतिदिशति—मनआदिष्वेवमिति । न्यायसामान्याद्यथोक्तं व्याख्यानं द्रष्टव्यम् । नहि मनसो मनस्त्वं वाचो वाक्त्वं वा स्वातन्त्र्येण संभवति, अन्यस्तत्वादतोऽधिष्ठानसत्ताप्रकाशाभ्यामेव सत्ताप्रकाशत्वं मनआदेः। तच्चाधिष्ठानं निर्विशेषमेवोपलक्षयितव्यम् । विशेषत्वेऽध्यस्तत्वप्रसङ्गादिति भावः। विभक्तिद्वयनिर्देशतात्पर्यमाह—वाचो हेत्यादिना । मनआदेः प्रवर्तकः किंस्वभाव इति पृष्टत्वात्स्वरूपनिर्देशः कर्तव्यः । स च प्रथमया । "निर्देशे प्रथमा प्रोक्ता" इति स्मरणादित्यर्थः । अतिमुच्य धीरा इत्युत्तरं वाक्यं साध्याहारं योजयति—यदेतदित्यादिना । एतद्बुद्ध्वाऽमृता भवन्तीति संबन्धः । तादात्म्येनाध्यारोपितो यो बुद्ध्यादिरनवबोधनिमित्तः संसारस्ततो मोक्षणं तादात्म्याध्यासनिवृत्तिर्दृष्टं फलम् । अमृता भवन्तीति विदेहमुक्तिरदृष्टं फलमित्यर्थः । कर्मणां संबन्धानुपपत्तिरिति शेषः । निमित्ताभावाच्छरीरान्तराद्यनारम्भेऽमृता भवन्तीति प्रयोगादागन्तुकत्वममृतत्वस्येतिशङ्कानिवृत्त्यर्थमाह—शरीरादीति । अनादिभवपरम्परया शरीर्यासं परस्ताच्च भविष्यामीति शरी-

१ क. ज. ञ. श्रौत्रत्वा° । २ क. ख. छ. ञ. ज. बोधितः स° । ३ घ. श्रोत्रत्वा° ।

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि ।

भवन्तीत्युपवर्ण्यते ॥ २ ॥

न तत्र चक्षुर्गच्छतीत्युक्तेऽपि पर्यनुयोगे हेतुरस्तीति । श्रोत्रस्य श्रोत्रमित्येवमादिनोक्तेऽप्यात्मतत्त्वेऽतिपन्नत्वात्सूक्ष्मत्वहेतोर्वस्तुनः पुनः पुनः पर्यनुयुयुक्षाकारणमाह—न तत्र चक्षुर्गच्छतीति । तत्र श्रोत्राद्यात्मभूते चक्षुरादीनि वाक्चक्षुषोः सर्वेन्द्रियोपलक्षणार्थत्वान्न विज्ञानमुत्पादयन्ति । सुखादिवत्तर्हि गृह्येतान्तःकरणेनेत आह —नो मनः । न सुखादिवन्मनसो विषयस्तत् । इन्द्रियाविषयत्वात् । न विद्मो न विजानीमोऽन्तःकरणेन यथैतद्ब्रह्म मनआदिकरणजातमनुशिष्यादनुशासनं कुर्यात्प्रवृत्तिनिमित्तं भवेच्चेथाऽविषयत्वान्न विद्मो न विजानीमः। अथवा श्रोत्रादीनां श्रोत्रादिलक्षणं ब्रह्म विशेषेण दर्शयेत्युक्त आचार्य आह—न शक्यते दर्शयितुं कस्मान्न तत्र चक्षुर्गच्छतीत्यादि पूर्ववत्सर्वमत्र तु विशेषो यथैतदनुशिष्यादिति । यथैतदनुशिष्यात्प्रतिपादयेत् । अन्योऽपि शिष्यानितोऽन्येन विधिनेत्यभिप्रायः । सर्वथाऽपि ब्रह्म बोधयेत्युक्त आचार्य आह—अन्यदेव तद्विदितादथो अविदितादधीत्यागमम् । विदिताविदिताभ्यामन्यत्वम् ।

रादिसंतानाविच्छेदस्य प्रतिसंधानं धर्माध्यविकारित्वाध्यासः कामादिदोषकल्पनं चैतस्मादध्यारोपितो यो मृत्युस्तद्वियोगापेक्षयाऽमृतत्वस्य भवनमौपचारिकमित्यर्थः ॥२॥

न तत्र चक्षुर्गच्छतीति वाक्यार्थं संगृह्णाति—आचार्येणोक्तेऽपि तत्त्वे शिष्यस्याप्रतिपत्तेर्हेतोः पर्यनुयोगे हेतुर्न तत्र चक्षुर्गच्छतीति । एतद्विवृणोति—श्रोत्रस्य श्रोत्रमित्यादिना । आत्मा नेन्द्रियविषयोऽभौतिकत्वाच्छशविषाणवत् । मनश्चेन्द्रियं प्रसिद्धं ततस्तस्याप्यविषय इत्याह—इन्द्रियाविषयत्वादिति । न विद्मो न विजानीम इत्याद्यभ्यासः सर्वथाऽन्तःकरणाविषयत्वख्यापनार्थः। आक्षेपपरतया व्याख्याय शङ्कोत्तरत्वेन व्याचष्टे—अथवेत्यादिना। इत उपलक्षणप्रकारादन्येन प्रकारेण न शक्यते दर्शयितुं क्रियागुणादिविशेषशून्यत्वादित्यर्थः । आगममित्युपदेशपारम्पर्यमाहेति संबन्धः । आगमस्यार्थमाह—विदिताविदिताभ्यामन्यत्वमिति । अन्यदात्मनो विदितमविदितं वा स्यादतो विदितत्वाविदितत्वनिषेधेनाऽऽत्मनोऽन्यत्र ब्रह्मत्वं विदुषां विनिवर्त्याऽऽत्मा-

---

१ ग. ङ. ञ. °त्तं यथा भवेत्तदवि° । च, °त्तं यथा भ° । २ ख. घ. च. छ. °त्तदवि° ।

यो हि ज्ञाता स एव सः । सर्वात्मकत्वात् । अतः सर्वात्मनो ज्ञातुर्ज्ञानान्तराभावाद्विदितादन्यत्वम् । " स वेत्ति वेद्यं न च तस्यास्ति वेत्ता " इति च मन्त्रवर्णात् । " विज्ञातारमरे केन विजानीयात् " इति च वाजसनेयके । अपि च व्यक्तमेव विदितं तस्मादन्यदित्यभिप्रायः । यद्विदितं व्यक्तं तद्व्यविषयत्वादल्पं सविरोधं ततोऽनित्यमत एवानेकत्वादशुद्धमत एव तद्विलक्षणं ब्रह्मेति सिद्धम् । अस्तु तर्ह्यविदितम् । न विज्ञानानपेक्षत्वात् । यद्ध्यविदितं तद्विज्ञानापेक्षमविदितविज्ञानाय हि लोकप्रवृत्तिः । इदं तु विज्ञानानपेक्षं कस्माद्विज्ञानस्वरूपत्वात् । न हि यस्य यत्स्वरूपं तत्तेनान्यतोऽपेक्ष्यते । न च स्वत एवापेक्षा । अनपेक्षमेव सिद्धत्वात् । प्रदीपः स्वरूपाभिव्यक्तौ न प्रकाशान्तरमन्यतोऽपेक्षते स्वतो वा यद्ध्यनपेक्षं तत्स्वत एव सिद्धं प्रकाशात्मकत्वात्प्रदीपस्यापेक्षितोऽप्यनर्थकः स्यात् । प्रकाशे विशेषाभावात् । नहि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीपप्रकाशोऽर्थवान् । न चैवमात्मनोऽन्यत्र विज्ञानमस्ति येन स्वरूपविज्ञानेऽप्यपेक्ष्यते । विरोध इति चेन्नान्यत्वात् । स्वरूपविज्ञाने विज्ञान-

---

ब्रह्मेत्युपदिष्टं भवतीत्यर्थः । विदितान्यत्वे युक्तिमाह—यो हीत्यादिना । विदितान्यत्ववचनस्थाऽऽर्थिकमर्थमाह—अपि चेति । कार्याद्व्यावृत्तिः सिध्यतीत्यर्थः । आत्मा यद्यप्यन्यतो विज्ञानं नापेक्षते तथाऽपि स्वग्राहकत्वात्स्वस्मादेव विज्ञानमपेक्षते तेन विज्ञानानपेक्षत्वमसिद्धमित्याशङ्क्याऽऽह—न च स्वत एवेति । स्वभावतयाऽनपेक्षमेव सिद्धत्वादपेक्षाशब्दार्थो न घटते स्वग्राहकत्वं चासिद्धं स्ववृत्तिविरोधादित्यर्थः । विज्ञानं सजातीयानपेक्षं प्रकाशत्वात्प्रदीपवदित्यनुमानमभिप्रेत्य दृष्टान्तमाह—नहीति । तमोध्वस्तये ह्यालोकापेक्षा तदभावश्चाऽऽलोके स्वत एव सिद्ध इत्यर्थः । प्रदीपस्य तैजसस्य तैजसान्तरानपेक्षत्वेऽपि विजातीयप्रकाशस्य ज्ञानस्यापेक्षा स्वव्यवहारेऽपि दृष्टा तथा ब्रह्मणोऽपि विजातीयज्ञानापेक्षा भविष्यतीति न च वाच्यमित्याह—न चैवमात्मन इति । ब्रह्मणोऽन्यस्य सर्वस्याज्ञानात्मकत्वाद्ब्रह्मनसंभावनैव नास्त्यन्यत्र ततो न विजातीयज्ञानापेक्षमपि ब्रह्मेत्यर्थः । ज्ञानानपेक्षत्वे लौकिकानुभवाविरोधं शास्त्रविरोधं चोद्भाव्य परिहरति—विरोध इति चेन्नान्यत्वादिति । सूत्रस्थ पूर्वपक्षभागं विभजते—स्वरूपविज्ञान इत्यादिना । विज्ञानानपेक्षत्वं ब्रह्मणोऽभाणि । सापेक्षत्वं जीवशब्दवाच्यस्योपाधिविशिष्ट-

---

१ ख. ग. घ. ङ. °काशं प्रदी° ।

स्वरूपत्वाद्विज्ञानान्तरं नापेक्षत इत्येतदसत्। दृश्यते हि विपरीतज्ञानमात्मनि सम्यग्ज्ञानं च न जानाम्यात्मानमिति श्रुतेश्च "तत्त्वमसि" "आत्मानमेवावेत्" "एतं वै तमात्मानं विदित्वा" इति च। सर्वत्र श्रुतिष्वात्मविज्ञाने विज्ञानान्तरापेक्षत्वं दृश्यते तस्मात्प्रत्यक्षश्रुतिविरोध इति चेन्न। कस्मात्। अन्यो हि स आत्मा बुद्ध्यादिकार्यकरणसंघाताभिमानसंतानाविच्छेदलक्षणोऽविवेकात्मको बुद्ध्यवभासप्रधानश्चक्षुरादिकरणो नित्यचित्स्वरूपात्मान्तःसारो यत्रानित्यं विज्ञानमवभासते। बौद्धप्रत्ययानामाविर्भावतिरोभावधर्मकत्वाच्चद्धर्मतयैव विलक्षणमपि चावभासते। अन्तःकरणस्य मनसोऽपि मनोऽन्तर्गतत्वात्सर्वान्तरश्रुतेः। अन्तर्गतेन नित्यविज्ञानस्वरूपेणाऽऽकाशवदप्रचालितात्मनाऽन्तर्गर्भभूतेन बाह्यो बुद्ध्यात्मा तद्विलक्षणोऽर्चिर्भिरिवाग्निः प्रत्ययैराविर्भावतिरोभावधर्मकैर्विज्ञानाभासरूपैरनित्यैरनित्यविज्ञान आत्मा सुखी दुःखीत्यभ्युपगतो लौकिकैरतोऽन्यो नित्यविज्ञानस्वरूपादात्मनः। तत्र हि विज्ञाना-

---

स्यानुभूयतेऽतो भिन्नविषयत्वान्न विरोध इत्याह—न कस्मादित्यादिना। बुद्ध्यादौ कार्यकरणसंघाते य आत्माभिमानसंतानोऽनादिभवपरम्पराप्रापितस्तस्याविच्छेदरूपमनिर्वाच्यमज्ञानलक्षणं चिह्नं यस्य चित्प्रतिबिम्बस्य स तथोक्तः। चित्तन्त्रं ह्यनिर्वाच्यमज्ञानं चैतन्यमवच्छिद्य स्वावच्छिन्ने यथास्वरूपावभासं प्रतिबध्य मौढ्याद्यध्यासहेतुर्भवति। तस्मादविवेकात्मको जीव इत्युच्यते बुद्धेरन्तःकरणस्य यथा यथा नीलपीताद्याकारावभासा जायन्ते तथा तथा चित्प्रतिबिम्बः प्रमातृत्वादिरूपेण भातीति तत्प्रधानोऽध्यस्तस्य विशिष्टस्य तत्सत्तयैव सत्त्वाद्विशिष्टान्तर्निविष्टो य आत्मा नित्यचित्स्वरूपः स एव सारो यस्मिन्स तथोक्तः। बुद्धिपरिणामरूपाणां नीलपीतादिप्रत्ययानामुत्पन्नविनाशवत्त्वात्तदुपरक्तरूपेणानित्यं चैतन्यं यत्रावभासते सोऽन्यो जीवः। सर्वाण्येतानि जीवविशेषणान्यन्यत्वस्फुटीकरणार्थानि न केवलमनित्यत्वम्। विशिष्टोपाधिरूढतया विज्ञानस्य तद्धर्मतयैवावभासते मनुष्योऽहं जानामीति प्रतिशरीरं विलक्षणमपि चैतन्यमवभासते विशिष्टभेदादित्यर्थः। परमार्थतः कीदृशं चैतन्यं यस्य विशिष्टधर्मतावभासते तत्राऽह—अन्तःकरणस्येति। ननु विशेषणसंबन्धात्स्वरूपे समारोपितो विशिष्टो भाति तस्य मिथ्यात्वात्कथमात्मत्वव्यवहारास्पदत्वं तत्राऽऽह—अन्तर्गतेनेति। विशिष्टान्तर्गतेन चित्स्वरूपेण तादात्म्याद्धाम्न इत्यनात्माऽपि बुद्धिविशिष्ट आत्मेत्युपगतो लौकिकैरिति संबन्धः। अत इत्युक्तधर्मवत्त्वादस्तु नित्यविज्ञानाद्विलक्षणो जीवः। कथमेतावता विरोधः परिहृत इत्याकाङ्क्षायामाह—

---

१ क. ख. ङ. ञ. यत्र नि°। २ घ. ङ. बुद्ध्यात्मा। ३ क. घ. ङ. ञ. °पेण वि°। ४ क. ख. ङ. ञ. °मेवा°।

वेत्ता विपरीतज्ञानत्वं चोपपद्यते न पुनर्नित्यविज्ञाने । तत्त्वमसीति बोधोपदेशो नोपपद्यत इति चेत् । आत्मानमेवावेदित्येवमादीनि च नित्यबोधात्मकत्वात् । न ह्यादित्योऽन्येन प्रकाश्यतेऽतस्तदर्थबोधोपदेशोऽनर्थक इति चेन्न । लोकाध्यारोपापोहार्थत्वात् । सर्वात्मनि हि नित्यविज्ञाने बुद्ध्याद्यनित्यधर्मा लोकैरध्यारोपिता आत्माविवेकतस्तदपोहार्थो बोधोपदेशो बोधात्मनः । तत्र च

तत्र हीति । एवं लोकानुभवविरोधे परिहृतेऽपि शास्त्रविरोधो न परिहृत इत्याह—तत्त्वमसीति । विशिष्टस्य मिथ्यात्वाद्ब्रह्मास्मीत्यनुभवायोगान्मोक्षार्हत्वायोगाच्च तत्त्वमसीत्युपदेशो न घटते चेत्तर्हि ब्रह्मण एवोपदेशोऽस्त्वित्याशङ्क्याऽऽह—आत्मानमेवावेदिति । एवमादीनि वाक्यानि ब्रह्मोपदेशपक्षे न संगच्छन्ते तज्जनितफलाभावादित्यर्थः । विशिष्टस्य निरुपाधिकस्य च ब्रह्मण उपदेशासंभवेऽप्युपाधिविशिष्टचिस्वरूपजीवपदलक्ष्यस्य वैशिष्ट्यद्वारेणोपदेशो भविष्यति फलं तस्याऽऽरोपितबन्धनिवृत्तिरित्याह—न । लोकेति । ननु लोकशब्देनाऽऽत्मोच्यतेऽनात्मा वा । नाऽऽद्यः । आत्मनोऽधिष्ठानतयाऽध्यासकर्तृत्वासंभवाच्चैत्रो हि शुक्तिकायां रजतमध्यस्यति न शुक्तिकैव । अध्यासकर्तृत्वे चाऽऽत्मनः प्रागेवाध्यासात्कर्तृत्वं वाच्यम् । कर्तृत्वस्य प्राग्भावनियमात्तदा चानिर्मोक्षप्रसङ्गः । कर्तृत्वस्याध्यासत्वे च न कर्तृत्वमात्मनस्तद्विषयकर्तृत्वान्तराभावात् । भावे चानवस्थानात् । न द्वितीयः । जडत्वादनात्मनोऽध्यासकर्तृत्वानुपपत्तेः । चेतनो हि देवदत्तोऽध्यस्यतीति प्रसिद्धम् । अथ जडस्याध्यासकर्तृत्वं नाम भ्रान्त्याश्रयत्वं यद्यपि न संभवति तथाऽपि भ्रान्तिनिमित्तत्वं दृष्टं जपाकुसुमादेः । न तस्य सत्यस्योपाधित्वसंभवाद्भाष्यकारमते च जडस्य सर्वस्याध्यात्मकत्वादध्यासहेतुत्वं न संभवति तस्मादसंबद्धमिदं भाष्यं लोकाध्यारोपापोहार्थत्वादिति । लोकशब्देनाहंकारादय उच्यन्ते । तेषां व्यावहारिकसत्यत्वस्यार्थक्रियासमर्थत्वेनाभ्युपगमात् । स्वधर्मारोपनिमित्तत्वेनोपाधित्वसंभवात्परमार्थसत्यस्यैवोपाधित्वमित्यस्मान्नेति दृष्टान्तासंभवादहंकारादयश्च चित्तन्त्रानाद्यनिर्वाच्याविद्यामयमूलसूक्ष्मविकारा अविद्यावच्छिन्न एव चैतन्ये निपतन्ति । उपाधिविकाराणामुपहिते पक्षपातिताया दर्शनात् । यथा जलचलनादीनाम् । तस्मान्नासंगतं भाष्यम् । ननु बोधात्मनो नाबोधः समञ्जसः । प्रकाशाप्रकाशयोर्विरोधप्रसिद्धेः । बोधोऽपि च बोधात्मनो न समञ्जसः । निर्विकारत्वात् । कथं बोधात्मनो बोधोपदेशः सार्थकस्तत्राऽऽह—तत्र चेति । बोधादन्यस्याबोधात्मकत्वेनाबोधाश्रयत्वं न समञ्जसम् । आत्माश्रयत्वप्रसङ्गादनिवृत्तिप्रसङ्गाच्च तस्य बोधासंभवात् । तस्माद्बोधात्मन एवाबोधः समञ्जसः । परिशेषाद्विरोधश्चासिद्धः साक्षिवेद्यत्वात् । बोधोऽपि तत्रैव समञ्जसो घटादेर्बोद्धृत्वा-

---

१ क. ख. घ. ङ. °तृत्वं वाच्यं कर्तृत्वस्य प्राग्भावा°।

बोधाबोधौ समञ्जसौ । अन्यनिमित्तत्वादुदक इवौष्ण्यमग्निनिमित्तम् । राज्यहनी इवाऽऽदित्यनिमित्ते लोके नित्यावौष्ण्यप्रकाशाद्यन्यादित्ययोरन्यत्र भावाभावयोर्निमित्तत्वादनित्यविवोपचर्येते । धक्ष्यत्यग्निः प्रकाशयिष्यति सवितेति तद्वत् । एवं च सुखदुःखबन्धमोक्षाद्यध्यारोपो लोकस्य तदपेक्ष्य तत्त्वमस्यात्मानमेवावेदित्यात्मबोधोपदेशेन श्रुतयः केवलमध्यारोपापोहार्थाः । यथा सवितासौ प्रकाशयत्यात्मानमिति तद्वत् । बोधाबोधकर्तृत्वं च नित्यबोधात्मनि । तस्मादन्यदाविदितात् । अधिशब्दश्चान्यार्थे । यद्वा यद्धि यस्यार्थे तत्ततोऽन्यत्सामर्थ्याद्यथाऽधि भृत्यादीनां राजा । अव्यक्तमेवाविदितं ततोऽन्यदित्यर्थः । विदितमविदितं च व्यक्ताव्यक्ते

प्रसिद्धेः । चिद्व्याप्त एव बुद्धिपरिणामे बोधशब्दव्युत्पत्तेः परिणाम्यन्तःकरणोपहितस्य बोधात्मनो बोधवत्त्वं समञ्जसमित्यर्थः । सामञ्जस्ये हेत्वन्तरमाह—अन्यनिमित्तत्वादिति । अन्यत्राहंकारादिसंघाते वादिनां लौकिकानां च बौधाबोधौ प्रसिद्धौ तौ चाऽऽत्मबोधाबोधसंबन्धादित्यात्मनो मुख्यौ बोधाबोधौ । यत्संबन्धादन्यत्र यदुपचर्यते तत्तत्र मुख्यं यथाऽग्निसंबन्धादुदकस्यौष्ण्यमुपचारेणाग्नौ तन्मुख्यमित्यर्थः । आत्मनिमित्तौ चेदन्यत्र बोधाबोधौ तर्हि निमित्तत्वादात्मनो व्यापारवत्त्वप्रसङ्गस्तत्राऽऽह—राज्यहनी इवेति । यथाऽऽदित्यसंनिध्यसंनिधिमात्रनिमित्ते लोके राज्यहनी भवतः । नह्यादित्यः कंचन स्वापयत्युत्थापयति वा । अतो निमित्तत्वं न व्यापारवत्त्वाविनाभूतमित्यर्थः । नन्वात्मनि बोधस्य नित्यत्वे कथं कालावच्छेदव्यवहारः प्राग्ज्ञासिषं शास्त्रार्थमिदानीं च जानामि पुनर्ज्ञास्यामीति तत्राऽऽह दृष्टान्तम्—नित्यावौष्ण्यप्रकाशाविति । तद्वद्विषयस्य कालावच्छिन्नत्वेन कालावच्छेदव्यवहारः स्वरूपेण नित्येऽपि बोधे न विरुध्यत इत्यर्थः । आत्मनि बोधाबोधयोः सामञ्जस्ये किं सिद्धमित्यत आह—एवं चेति । आगन्तुकविषयसंबन्धात्तदुपरक्तरूपेण बोधस्याऽऽगन्तुकत्वेऽपीदानीं मया स्वात्मा बुध्यत इति नित्यबोधात्मनि कथं बोधकर्तृत्वव्यपदेश इत्याशङ्क्याऽऽवरकापनयस्याऽऽगन्तुकत्वेन भविष्यतीत्याह—यथा सवितासाविति । यस्मादन्योपाधिकमात्मनि बोधकर्तृत्वम् । स्वतः पुनर्विज्ञानानपेक्षत्वमेव । तस्माद्विज्ञानापेक्षत्वादविदितादन्यत्वं सिद्धम् । कथमन्यत्वविवक्षायामधिशब्दः संगच्छते तत्राऽऽह—अधिशब्दश्चेति । निपातानामनेकार्थत्वाल्लक्षणया चेत्यर्थः । अविदितादन्यत्वस्याऽऽर्थिकमर्थमाह—अव्यक्तमेवेति । विदितं न भवत्यविदितं च न भवतीत्येकैकनिषेधस्य तात्पर्यमुक्त्वा समुदायार्थमाह—विदितमविदितं चेति । व्याचचक्षिरे

---

१ क. 'धिगतं त' । ख. ग. 'धिगतं ततोऽ' ।

इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥
यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं
विद्धि नेदं यदिदमुपासते ॥ ४ ॥

कार्यकारणत्वेन विकल्पिते ताभ्यामन्यद्ब्रह्म विज्ञानस्वरूपं सर्वविशेषप्रत्यस्तमितमित्ययं समुदायार्थः। अत एवाऽऽत्मत्वान्न हेय उपादेयो वा। अन्यद्धयन्येन हेयमुपादेयं वा। न तेनैव तद्यस्य कस्यचिद्धेयमुपादेयं वा भवति। आत्मा च ब्रह्म सर्वान्तरात्मत्वादविषयमतोऽन्यस्यापि न हेयमुपादेयं वा। अन्याभावाच्च। इति शुश्रुम पूर्वेषामित्यागमोपदेशः। व्याचचक्षिर इत्यस्वातन्त्र्यं तर्कप्रतिषेधार्थम्। ये नस्तद्ब्रह्मोक्तवन्तस्ते नित्यमेवाऽऽगमं ब्रह्मप्रतिपादकं व्याख्यातवन्तो न पुनः स्वबुद्धिप्रभवेन तर्केणोक्तवन्त इत्यागमपारम्पर्याविच्छेदं दर्शयति विद्यास्तुतये। तर्कस्त्वनवस्थितो भ्रान्तोऽपि भवतीति ॥ ३ ॥

यद्वाचेतिमन्त्रानुवादो दृढप्रतीतेः। अन्यदेव तद्विदितादिति। योऽयमागमार्थो ब्राह्मणोक्तोऽस्यैव द्रढिम्ने मन्त्रा यद्वाचेत्यादयः पठ्यन्ते। यद्ब्रह्म वाचा शब्देनानभ्युदितमनभ्युक्तमप्रकाशितमित्येतत्। येन वागभ्युद्यत इति वाक्प्रकाशहेतुत्वोक्तिः। येन प्रकाश्यत इति वाचोऽभिधानस्याभिधेयप्रकाशकत्वस्य हेतुत्वमुच्यते ब्रह्मणः। उक्तं च केनेषितां वाचमिमां वदन्ति यद्वाचो ह वाचमिति। तदेव ब्रह्म त्वं विद्धीत्यविषयत्वेन ब्रह्मण आत्मन्यवस्थापनार्थ आम्नायः। यद्वाचाऽनभ्युदितं वाक्प्रकाशनिमित्तं चेति ब्रह्मणोऽविषयत्वेनावस्त्वन्तरजिघृक्षां निवर्त्य स्वात्मन्येवावस्थापयत्याम्नायस्तदेव ब्रह्म त्वं विद्धीति यत्नत उपरमयति। नेदमित्युपास्यप्रतिषेधाच्च ॥ ४ ॥

इत्यस्वातन्त्र्यं तर्कप्रतिषेधार्थमित्येतत्सूत्रं विवृणोति—ये नस्तदिति ॥ ३ ॥

यद्वाचेतिमन्त्रानुवादो दृढप्रतीतेरिति सूत्रमेतद्विभजते—अन्यदेवेत्यादिना। येन वागभ्युद्यत इत्यनेन वाक्प्रकाशे हेतुत्वोक्तिर्ब्रह्मणः क्रियत इति योजना। एतत्सूत्रं विवृणोति—येनेत्यादिना। तदेव ब्रह्म त्वं विद्धीत्याद्याम्नाय आत्मन्येव बुद्धेरवस्थापनार्थ उपसंहारार्थः। अविषयत्वेन ब्रह्मणोऽतिरिक्तस्वरूपेण वेद्यत्वासंभवादिति योजना। एतत्सूत्रं विभजते—यद्वाचेत्यादिना ॥ ४ ॥

यन्मनसा न मनुते येनाऽऽहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥

इति प्रथमः खण्डः ॥ १ ॥

यदि मन्यसे सुवेदेति दहरमेवापि नूनम् । त्वं

यन्मनसेत्यादि समानम् । मनो मतमिति । येन ब्रह्मणा मनोऽपि विषयीकृतं नित्यविज्ञानस्वरूपेणेत्येतत् । सर्वकरणानामविषयं तानि च सव्यापाराणि सविषयाणि नित्यविज्ञानस्वरूपावभासतया येनावभास्यन्त इति श्लोकार्थः । " क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति " इति स्मृतेः । " तस्य भासा " इति चाऽऽथर्वणे । येन प्राण इति । क्रियाशक्तिरप्यात्मविज्ञाननिमित्तेत्येतत् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

इति प्रथमः खण्ड ॥ १ ॥

यदि मन्यसे सुवेदेति शिष्यबुद्धिविचालना गृहीतस्थिरतायै । विदिताविदिताभ्यां निवर्त्य बुद्धिं शिष्यस्य स्वात्मन्यवस्थाप्य तदेव ब्रह्म त्वं विद्धीति स्वाराज्येऽभिषिच्योपास्यप्रतिषेधेनाथास्य बुद्धिं विचाल-

---

मन्त्रसमुदायस्यार्थमाह—सर्वकरणानामित्यादिना । यत्सर्वकरणानामविषयं येन निर्विशेषेण सर्वाणि करणानि भास्यन्ते तद्ब्रह्मैव त्वं ततोऽतिरिक्तज्ञानाय यत्नो न कर्तव्य इति यत्नोपरम एव लक्ष्यते । विद्धीत्यनेनातिरिक्तं मा विद्धीत्यभिप्रायः ॥५॥ ६ ॥ ७ ॥ ८ ॥

इति प्रथमः खण्डः ॥ १ ॥

यदि मन्यसे सुवेदेत्यनेन वाक्येन शिष्यबुद्धिविचालना क्रियते स्थूणानिखननन्यायेन गृहीतस्य दार्ढ्यार्थम् । एतत्संग्रहवाक्यं विवृणोति—विदिताविदिताभ्यामित्यादिना । अल्पमेव ब्रह्मणो रूपं नूनं त्वं वेत्थेति को मन्यत इत्याकाङ्क्षाया-

---

१ ख. ग. घ. दभ्रमे°।

वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु
मीमाꣳस्यमेव ते मन्ये विदितम् ॥ ९ ॥ १ ॥

यति यदि मन्यसे सुवेदाहं ब्रह्मेति त्वं ततोऽल्पमेव ब्रह्मणो रूपं वेत्थ त्वमिति नूनं निश्चितं मन्यत इत्याचार्यः । सा पुनर्विचालना किमर्थेत्युच्यते-पूर्वगृहीते वस्तुनि बुद्धेः स्थिरतायै । देवेष्वपि सुवेदाहमिति मन्यते यः सोऽप्यस्य ब्रह्मणो रूपं दहरमेव वेत्ति नूनम् । कस्मात् । अविषयत्वात्कस्यचिद्ब्रह्मणः । अथवाऽल्पमेवास्याऽध्यात्मिकं मनुष्येषु देवेषु च । आधिदैविकमस्य ब्रह्मणो यद्रूपं तदिति संबन्धः । अथ न्विति हेतुर्मीमांसायाः । यस्माद्दहरमेव सुविदितं ब्रह्मणो रूपमन्यदेव तद्विदितादित्युक्तत्वात्सुवेदेति च मन्यसेऽतोऽल्पमेव वेत्थ त्वं ब्रह्मणो रूपं यस्मादथ नु तस्मान्मीमांस्यमेवाद्यापि ते तव ब्रह्म विचार्यमेव यावद्विदितावेदितप्रतिषेधागमार्थानुभव इत्यर्थः । मन्ये विदितमिति शिष्यस्य मीमांसानन्तरोक्तिः प्रत्ययत्रयसंगतेः । सम्यग्वस्तुनिश्चयाय विचालितः शिष्य आचार्येण मीमांस्यमेव त इति चोक्त एकान्ते समाहितो भूत्वा विचार्य यथोक्तं सुपरिनिश्चितः सन्नाहाऽऽगमाचार्यात्मानुभवप्रत्ययत्रयस्यैकविषयत्वेन संगत्यर्थम् । एवं हि सुपरिनिष्ठिता विद्या सफला स्यान्नानिश्चितेति न्यायः प्रदर्शितो भवति । मन्ये विदितमिति परि-

माह—मन्यत इत्याचार्य इति । यदिति । यादृशमस्य ब्रह्मणो रूपं त्वममंस्थास्तादृशं देवेष्वपि यो मन्यते सोऽपि दहरमेव नूनं मन्यत इति योजना । अथ न्विति हेतुर्मीमांसाया इति संग्रहवाक्यं विवृणोति—यस्मादित्यादिना । प्रतिवचनस्यार्थं संगृह्णीतं विवृणोति—सम्यगित्यादिना । विचार्येति । मथा विदितं ब्रह्मेति किं प्रतिवचनं ददाम्युतावेदितमिति वा । नाऽऽद्यः । आचार्यागमप्रत्ययविरोधाद्वेदनविषयतया च घटवदब्रह्मत्वप्रसङ्गाद्वेदितृत्वेन मम विकारित्वापातात्च । न द्वितीयः । गोपालादिभ्योऽविशेषप्रसङ्गात्तूष्णीमवस्थाने वाऽप्रतिभाप्रसङ्गादिति विचार्यैकैकपक्षदोषपरिजिहीर्षया[2] विदितमविदितं चेति समुच्चितं वक्ष्मि । अज्ञानसंशयाद्यभावाद्विदितं वेदनविषयत्वाभावाच्चाविदितमिति सुपरिनिश्चितः सन्प्रतिवचनमाहेत्यर्थः । प्रत्ययत्रयस्य संगतिः संघटनमेकस्मिन्विषये किमर्थमुच्यते । संवादाधीनं प्रामाण्यमिति तार्किकस्थितेर्निश्चयार्थम् । स्वतःप्रामाण्यपक्षे[3] त्वागमार्थे प्रत्ययान्तरसंवादस्तात्पर्यद्योतकः[4] । प्रतिबन्धनिरासेनोपचा-

१ क. ख. घ. च. ज्ञ. °स्य च दे° । २ छ. ज्ञ. °तं चेदं वि° । ३ क. ज्ञ. °पक्षत्वापग° । ४ घ. ञ. °तकप° ।

+ नाह मन्ये सुवेदेति नो न वेदेति वेद च ।

निष्ठितनिश्चितविज्ञानप्रतिज्ञाहेतूक्तेः ॥ ९ ॥ १ ॥

परिनिष्ठितं सफलं विज्ञानं प्रतिजानीत आचार्यात्मनिश्चययोस्तुल्यतायै । यस्माद्धेतुमाह–नाह मन्ये सुवेदेति । अहेत्यवधारणार्थो निपातो नैव मन्य इत्येतत् । यावदपरिनिष्ठितं विज्ञानं तावत्सुदेव सुष्ठु वेदाहं ब्रह्मेति विपरीतो मम निश्चय आसीत् । सोऽपजगाम भवद्भिर्विचालितस्य यथोक्तार्थमीमांसाफलभूतात्स्वात्मब्रह्मत्वनिश्चयरूपात्सम्यक्प्रत्ययाद्विरुद्धत्वात् । अतो नाह मन्ये सुवेदेति । यस्माच्च तन्नैव न वेदेति मन्य इत्यनुवर्तते । अविदितब्रह्मप्रतिषेधात् । कथं तर्हि मन्यस इत्युक्त आह–वेद च । चशब्दाद्वेद च न वेद चेत्यभिप्रायः । विदिताविदिताभ्यामन्यत्वाद्ब्रह्मणस्तस्मान्मया विदितं ब्रह्मेति मन्य इति वाक्यार्थः । अथवा वेद चेति नित्यविज्ञानब्रह्मस्वरूपतया नो न वेद वेदैव चाहं स्वरूपविक्रियाभावात् । विशेषविज्ञानं च पराध्यस्तं न स्वत

रेण निश्चयहेतुरिति सर्वस्य प्रतिवचनवाक्यस्य तात्पर्यमुक्त्वा मन्ये विदितमित्यादिना मन्ये विदितमित्येकदेशस्यार्थं संगृह्णाति ॥ ९ ॥ १ ॥

संगृहीतं स्फुटयति––परिनिष्ठितमित्यादिना । विरुद्धत्वादिति । विपरीतप्रत्ययस्य सम्यग्ज्ञानविरुद्धत्वात्तदुदयमात्राद्विपरीतप्रत्ययोऽपगत इत्यर्थः । न केवलं विपरीतप्रत्ययस्य संशयस्य वाऽभावान्मम निश्चितं विज्ञानमज्ञानाभावाच्चेत्याह–यस्मादिति । अथवा वेद चेत्यस्यान्योऽर्थः कथ्यते । यद्यनित्यमात्माविज्ञानं स्यात्तर्हि तस्य प्रागभावकाले प्रध्वंसाभावकाले वाऽज्ञानं संभाव्येत नतु तदस्ति । नित्यं हि विज्ञानं ब्रह्म मम स्वरूपं ततो नो न वेद । यदि च वेदनं मम विक्रिया भवेत्तदा विक्रियायाः कादाचित्कत्वात्कदाचिदहं वेदेति शङ्क्येत नतु तदस्ति । स्वरूपविज्ञानस्यान्यथात्वासंभवात्सदा वेदैवाहम् । यथा स्वाभाविकाचलतया पर्वतास्तिष्ठन्तीति व्यपदेशस्तद्वदित्यर्थः । स्वसत्तायां स्वयं प्रमेति स्वप्रकाशत्वमादाय व्याख्यातं चशब्दार्थमाह–विशेषविज्ञानं चेति । आगमाद्विचारसहकृताज्जातं ब्रह्मात्मकताज्ञमन्तःकरणपरिणामरूपं ब्रह्मास्मीति विशेषविज्ञानं तत्परेणान्तःकरणेनोपाधिनाऽऽत्मन्यध्यस्तं न परमार्थतो ज्ञानवत्त्व-

+ केनोपनिषत्पदभाष्यतो नाहं मन्य इति पाठः ।

१ घ. ङ. नाहं म° । २ क. ख. घ. च. छ. झ. ञ. °मित्ये° । ३ च. प्रमेति ।

यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ १० ॥
॥ २ ॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः ।

इति । परमार्थतो न च वेदेति यो नस्तद्वेद तद्वेदेतिपक्षान्तरनिरासार्थमाम्नाय-उक्तार्थानुवादात् । यो नोऽस्माकं मध्ये स एव तद्ब्रह्म वेद नान्यः । उपास्य-ब्रह्मवित्त्वात् । अतोऽन्यस्य यथाऽहं वेदेति वेद चेति पक्षान्तरे ब्रह्मवित्त्वं निरस्यते । कुतोऽयमर्थोऽवसीयत इत्युच्यते । उक्तानुवादादुक्तं ह्यनुवदति नो न वेदेति वेद चेति ॥ १० ॥ २ ॥

यस्यामतमिति श्रौतमाख्यायिकार्थोपसंहारार्थम् । शिष्याचार्योक्तिप्रत्युक्तिलक्षणयाऽनुभवयुक्तिप्रधानयाऽऽख्यायिकया योऽर्थः सिद्धः स श्रौतेन वचनेनाऽऽगमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते । यदुक्तं विदिता-दन्यद्वागादीनामगोचरत्वात् । मीमांसितं चानुभवोपपत्तिभ्यां ब्रह्म तत्त्वमेव ज्ञातव्यं कस्मात् । यस्यामतं यस्य विविदिषाप्रयुक्तप्रवृत्तस्य साधकस्यामतम-विज्ञातमविदितं ब्रह्मेत्यात्मतत्त्वनिश्चयफलावसानावबोधतया विविदिषा निवृ-त्तेत्यभिप्रायः । तस्य मतं ज्ञातं तेन विदितं ब्रह्म येनाविषयत्वेनाऽऽत्मत्वेन प्रतिबुद्धमित्यर्थः । स सम्यग्दर्शी यस्य विज्ञानानन्तरमेव ब्रह्मात्मभावस्वाव-सितत्वात्सर्वतः कार्याभावो विपर्ययेण मिथ्याज्ञानो[1] भवति । कथं मतं विदितं ज्ञातं मया ब्रह्मेति यस्य विज्ञानं स मिथ्यादर्शी विपरीतविज्ञानो विदितादन्यत्वाद्ब्रह्मणो न वेद स न विजानाति । ततश्च सिद्धमवैदिकस्य विज्ञानस्य मिथ्यात्वम् । अब्रह्मविषयतया निन्दितत्वात्तया कपिलकणभुगादिसमयस्यापि

मात्मन इति न वेद चेति[2] घटत इत्यर्थः । प्रकारान्तरेणापि ब्रह्मविज्ञानं संभवतीति-शङ्कानिरासार्थं वाक्यैकदेश इत्याह—यो नस्तद्वेद तद्वेदेति । इदं सूत्रवाक्यं विवृ-णोति—यो नोऽस्माकमिति । यो नोऽस्माकं मध्ये तद्विदितादविदितान्यत्वं वेदेति शेषः । यथाऽहं वेदातोऽन्येन प्रकारेण विदुष उपास्यब्रह्मवित्त्वादिति योजना । उक्ता-नुवादादिति । अभ्यासाख्यतात्पर्यलिङ्गदर्शनादविषयतयैव ब्रह्मविज्ञानं विवक्षित-मित्यर्थः ॥ १० ॥ २ ॥

यस्यामतमिति वाक्यार्थं संगृह्णीतं व्याख्याति—शिष्याचार्येत्यादिना । श्रौतमिति शिष्यस्याऽऽचार्यस्य चोक्तिर्न भवतीति ख्यापनार्थम् । तेन श्रौतेन वचनेन कथमुच्यत इत्याकाङ्क्षायामाह—यदुक्तमिति । यद्ब्रह्म विदितादन्यदुक्तमिति संबन्धः । गोपा-

१ क. ज्ञातो भ° । २ घ. च. छ ज्ञ. °ति । प्र° । ३ घ. छ. ज्ञ. °दान्ये° ।

अविज्ञातं विज्ञानतां विज्ञातमविजानतां ॥ ११ ॥ ३ ॥ प्रतिबोधविदितं मत-

---

विदितब्रह्मविषयत्वादनवस्थिततर्कजन्यत्वाद्विविदिषानिवृत्तेश्च मिथ्यात्वमिति। स्मृतेश्च—

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः ॥

इति विपरीतमिथ्याज्ञानयोर्नेष्टत्वादिति । अविज्ञातं विजानतां विज्ञातमविजानतामिति पूर्वहेतूक्तिरनुवादस्याऽऽनर्थक्यात् । अनुवादमात्रेऽनर्थकं वचनमिति पूर्वोक्तयोर्यस्यामतमित्यादिना ज्ञानाज्ञानयोर्हेत्वर्थत्वेनेदमुच्यते । अविज्ञातमविदितमात्मत्वेनाविषयतया ब्रह्म विजानतां यस्मात्तस्मात्तदेव ज्ञानं यतेषां विज्ञातं विदितं व्यक्तमेव बुद्ध्यादिविषयं ब्रह्माविजानतां विदिताविदितव्यावृत्तमात्मभूतं नित्यविज्ञानस्वरूपमात्मस्थमविक्रियममृतमजरमभयमनन्यत्वादविषयमित्येवमविजानताम् । बुद्ध्यादिविषयात्मतयैव नित्यं विज्ञातं ब्रह्म । तस्माद्विदिताविदितव्यक्ताव्यक्तधर्माध्यारोपेण कार्यकारणभावेन सविकल्पमयथार्थविषयत्वात् । शुक्तिकादौ रजताद्यध्यारोपणज्ञानवन्मिथ्याज्ञानं तेषाम् ॥ ११ ॥ ३ ॥

प्रतिबोधविदितं तमिति । क्विप्प्रत्ययानामात्मावबोधद्वारत्वाद्बोधं

लादीनामिवाऽऽत्मतत्त्वं न विवक्षितं किंतु ब्रह्मण आत्मत्वफलावसानो योऽवबोधो यस्य स तथोक्तस्तस्य भावस्तत्ता तथा बुभुत्सा निवृत्ता । विचार्यमाणे ब्रह्मण आत्मत्वेन पर्यवसानादतिरिक्तमन्तव्याभावादमतमित्यर्थः । अविज्ञातं विजानतामित्युत्तरार्धस्यार्थं संगृहीतं विवृणोति—अनुवादमात्र इत्यादिना । हेत्वर्थत्वेनेति । अयमर्थः—पूर्वेषां ब्रह्म विजानतामविज्ञातत्वेनैव ब्रह्मणः प्रसिद्धत्वादिदानीमप्यविषयतया ज्ञानं सम्यग्ज्ञानं तथा पूर्वेषामविदुषां विज्ञातत्वेनैव ब्रह्मणः प्रसिद्धत्वादिदानीमपि विषयतया ज्ञानमसम्यग्ज्ञानमिति । बुद्ध्यादिविषयं सद्रूपतया बुद्धिरात्मा मन आत्मेन्द्रियमात्मेति विज्ञानं वेदबाह्यानां ब्रह्म बौद्धादीनां प्रसिद्धं तत इदानीमपि तन्मतानुसारिणां भ्रान्तानामेव बुद्ध्यादिविषयमनात्मरूपमात्मतयाऽभिमतमित्यर्थः ॥ ११ ॥ ३ ॥

केन द्वारेण तर्ह्यविषयतयाऽऽत्माऽवगम्यतामित्याकाङ्क्षायामाह—प्रतिबोधेति ।

---

१ घ. च. ज. °षयस्तद्बु° । २ घ. च. छ. ज. विज्ञातं ।

ममृतत्वं हि विन्दते । आत्मना विन्दते

प्रति बोधं प्रतीति वीप्सा सर्वप्रत्ययव्याप्त्यर्था । बौद्धा हि सर्वे प्रत्ययास्तप्तलोहवन्नित्यविज्ञानस्वरूपात्मव्याप्तत्वाद्विज्ञानस्वरूपावभासास्तदन्यावभासश्चाऽऽत्मा तद्विलक्षणोऽग्निवदुपलभ्यत इति तेन ते द्वारी भवन्त्यात्मोपलब्धौ । तस्मात्प्रतिबोधावभासप्रत्यगात्मतया यद्विदितं तद्ब्रह्म तदेव मतं ज्ञातं तदेव सम्यग्ज्ञानवत्प्रत्यगात्मविज्ञानं न विषयविज्ञानम् । आत्मत्वेन प्रत्यगात्मानमैक्षदिति च काठके । अमृतत्वं हि विन्दत इति हेतुवचनं विपर्यये मृत्युप्राप्तेः । विषयात्मविज्ञाने हि मृत्युः प्रारभत इत्यात्मविज्ञानममृतत्वनिमित्तमिति युक्तं हेतुवचनममृतत्वं हि विन्दत इति । आत्मज्ञानेन किममृतत्वमुत्पाद्यते । न । कथं तर्हि । आत्मना विन्दते स्वेनैव नित्यात्मस्वभावेना-

---

संग्रहवाक्यं विवृणोति—बोधं प्रतीत्यादिना । यथाऽस्मिञ्शरीरे बुद्धिपरिणामा जडा अपि चिद्व्याप्ततया संवेदनवद्वभासन्त इति संभाव्यते । जडानां स्वाभाविकप्रकाशानुपपत्तेः । तथा सर्वशरीरेषु बौद्धाः प्रत्यया यद्व्याप्ततया संवेदनवद्भासन्ते सोऽस्तीति संभाव्यते । एतदुक्तं भवति । श्रोतृशरीरावच्छिन्नबौद्धप्रत्ययसाक्ष्येकस्वभावः । तदितरसर्वशरीरावच्छिन्नबौद्धप्रत्ययसाक्ष्येकस्तदर्थः । चिन्मात्रे व्यावर्तकधर्मानुपलम्भाद्विभक्तत्वे चानात्मत्वादिदोषप्रसङ्गात्संभावितमेकत्वं तदेव ब्रह्म त्वमितिवाक्यजबुद्धिवृत्तावविषयतया प्रकाशते ब्रह्मास्मीति यस्मात्तानन्याज्जडानवभासयतीति तदन्यावभास आत्मा सर्वजडविलक्षणोऽवगन्तुं शक्यते तस्मादित्युपसंहारः । प्रतिबोधमवभासाश्चित्प्रतिबिम्बास्तेषां प्रत्यगात्मतयाऽव्यभिचरितस्वरूपेण बिम्बस्थानीयेनैकेन रूपेण यद्ब्रह्मवेदनं तत्सम्यग्दर्शनमित्यर्थः । विषयविज्ञानं सम्यग्ज्ञानं न भवतीत्यत्र हेतुमाह—आत्मत्वेनेति । ब्रह्मण आत्मत्वेन विषयत्वासंभवादित्यर्थः । अद्वयानन्दरूपस्य सर्वज्ञत्वादिधर्मकस्य ब्रह्मणः शास्त्रैकसमधिगम्यत्वात्तटस्थस्यापरोक्षत्वं न संभवति किंतु प्रत्यग्रूपेणैवेत्यभिप्रेत्य काठकेऽपि विशेषणमित्यर्थः । प्रत्यक्तयाऽपरोक्षब्रह्मज्ञानं तदेव सम्यग्ज्ञानमित्यत्र को हेतुरित्याशङ्क्याऽपरोक्षबन्धाध्यासस्य परोक्षज्ञानान्निवृत्त्यसंभवादपरोक्षज्ञानस्य च तन्निवर्तनेनामृतत्वसाधनत्वादित्युत्तरवाक्यार्थं संगृह्णाति—अमृतत्वं हीति । सूत्रं विभजते—विषयात्मेति । विषयेषु बुद्ध्यादिष्वात्मविज्ञाने विषयतया वा व्यतिरिक्तस्योपास्यतया ज्ञाने मृत्युः प्रारभते भयमिति प्रसिद्धं बुद्ध्यादिसंघातमात्मानं मन्यमानस्योपासकस्य च कर्तृत्वभ्रमानिवृत्तेः । " अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति " इत्यादिश्रुतिभ्यश्च । " तरति शोकमात्मवित् " इत्यादिश्रुतिषु चाऽऽत्मज्ञानममृतत्वनिमित्तं

वीर्यं विद्यया विन्दतेऽमृतम् ॥ १२ ॥ ४ ॥

मृतत्वं विन्दते । नाऽऽलम्बनपूर्वकम् । विन्दत इत्यात्मविज्ञानापेक्षम् । यदि हि विद्योत्पाद्यममृतत्वं स्यादनित्यं भवेत्कर्मकार्यवत् । अतो न विद्योत्पाद्यम् । यदि चाऽऽत्मनैवामृतत्वं विन्दते किं पुनर्विद्यया क्रियत इत्युच्यते । अनात्मविज्ञानं निवर्तयन्ती सा तन्निवृत्त्या स्वाभाविकस्यामृतत्वस्य निमित्तमिति कल्प्यते । यत आह—वीर्यं विद्यया विन्दते । वीर्यं सामर्थ्यमनात्माध्यारोपमायास्वान्तध्वान्तानाभिभाव्यलक्षणं बलं विद्यया विन्दते । तच्च किंविशिष्टम् । अमृतमविनाशि । अविद्याजं हि वीर्यं विनाशि । विद्यया ऽविद्याया बाध्यत्वात् । न तु विद्याया बाधकोऽस्तीति विद्याजममृतं वीर्यम् । अतो विद्याऽमृतत्वे निमित्तमात्रं भवति । " नायमात्मा बलहीनेन लभ्यः " इति चाऽऽथर्वणे । लोकेऽपि विद्याजमेव बलमभिभवति न शरीरादिसामर्थ्यं यथा हस्त्यादेः । अथवा प्रतिबोधविदितं मतमिति सकृदेवाशेषविपरीतनिरस्तसंस्कारेण स्वप्नप्रतिबोधवद्यद्विदितं

प्रसिद्धमित्यर्थः । नाऽऽलम्बनपूर्वकमिति । किंचिदुपास्यमालम्बनीकृत्य तदुपासनसाध्यतया न विन्दत इत्यर्थः । कथं तर्हि विन्दत इति प्रयोग इत्याकाङ्क्षायामाह—आत्मविज्ञानापेक्षमिति । आत्मविज्ञानेन मर्त्यत्वभ्रमनिवृत्तिमपेक्ष्यामृतत्वमुपचर्यत इत्यर्थः । मुख्यार्थे बाधमाह—यदि हीत्यादिना । अनात्मा विज्ञायते येन तदनात्मविज्ञानमनाद्यनिर्वाच्यमात्माज्ञानमित्यर्थः । पुनरज्ञानान्तरोदयेन बन्धशङ्कायां कथं सकृदज्ञाननिवृत्तिमात्रेणामृतत्वनिमित्तत्वं ज्ञानस्येत्याशङ्क्याऽऽह—यत आहेति । स्वस्यान्तोऽवच्छेदो भवति येन ध्वान्तेन तत्स्वान्तध्वान्तमनात्माध्यारोपो मनुष्यत्वाद्यभिमानः पारमेश्वरी शक्तिर्माया जीवत्वनिमित्तमज्ञानं स्वान्तध्वान्तम् । एतैः सर्वैरभिभवनीयो न भवत्यात्मा येन विद्याकृतेनातिशयेन तद्वीर्यं विद्वाल्लभते । पूर्वसिद्धस्याज्ञानादेर्नाशान्मायायाश्च स्वतो जीवबन्धकत्वाभावादभिनवस्याज्ञानस्योत्पत्तौ कारणाभावात् । प्रवृत्तफलकर्माक्षिप्तस्य चाज्ञानलेशस्य द्वैतावभासस्य च विद्वद्दर्शनभिभावकत्वादुर्बलत्वान्निश्चीयते सम्यग्ज्ञानस्यामृतत्वहेतुत्वमित्यर्थः । ननु विद्याजं चेत्कथमविनाशि कृतकस्य विनाशित्वनियमादित्याशङ्क्याऽऽह—न तु विद्याया इति । यावद्देहपातं जायमानो द्वैतावभासो विद्यया बाध्यत एव न मामभिभवितुं शक्नोतीत्यवष्टम्भो वीर्यं तस्याविनाशोऽमृतत्वं तत्कारणविद्याया अबाध्यत्वाभिप्रायेणोच्यते न स्वरूपनाशाभावाभिप्रायेणेत्यर्थः । प्रतिबोधपदस्य यौगिकमर्थं व्याख्याय रूढ्यभिप्रायेण व्याचष्टे—अथ वेति । अशेषतया विपरीतो निरस्तः संस्कारो येन

१ ख. ग. °नाश्यम्° ।

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती
विनष्टिः। भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लो-
कादमृता भवन्ति॥ १३ ॥ ५ ॥
इति द्वितीयः खण्डः ॥ २ ॥

तदेव मतं ज्ञातं भवतीति। अथवा गुरूपदेशः प्रतिबोधस्तेन वा विदितं मतमित्युभयत्र प्रतिबोधशब्दप्रयोगोऽस्ति। सुप्तप्रतिबुद्धो गुरुणा प्रतिबोधित इति। पूर्वं तु यथार्थम्॥ १२ ॥ ४ ॥

इह चेदवेदीदित्यवश्यकर्तव्यतोक्तिर्विपर्यये विनाशश्रुतेः। इह मनुष्य-जन्मनि सत्यवश्यमात्मा वेदितव्य इत्येतद्विधीयते। कथमिह चेदवेदीद्विदि-तवान्। अथ सत्यं परमार्थतत्त्वमस्त्यवाप्तं तस्य जन्म सफलमित्यभिप्रायः। न चेदिहावेदीन्न विदितवान्तथैव जन्म। अपि च महती विनष्टिर्महान्विनाशो जन्ममरणप्रबन्धाविच्छेदप्राप्तिलक्षणः स्याद्यतस्तस्मादवश्यं तद्विच्छेदाय ज्ञेय आत्मा। ज्ञानेन तु किं स्यादित्युच्यते—भूतेषु भूतेषु। चराचरेषु सर्वेष्वित्यर्थः। विचित्य पृथक्कृत्य निष्कृष्यैकमात्मतत्त्वं संसारधर्मैरस्पृष्टमात्मभावेनोपलभ्येत्यर्थः। अनेकार्थत्वाद्धातूनाम्। न पुनश्चित्वेति संभवति विरोधात्। धीराः धीमन्तो विवेकिनो विनिवृत्तबाह्यविषयाभिलाषाः। प्रेत्य मृत्वाऽस्माल्लोकाच्छरीरा-द्यनात्मलक्षणाद्व्यावृत्तममत्वाहंकाराः सन्त इत्यर्थः। अमृता अमरणधर्माणो नित्यविज्ञानामृतत्वस्वभावा एव भवन्ति॥ १३ ॥ ५ ॥
इति द्वितीयः खण्डः ॥ २ ॥

बोधेन स प्रतिबोधो युगपत्कृत्स्नाविद्यातत्कार्यनिवर्तकः सद्योमुक्तिहेतुरित्यर्थः। प्रतिबोधशब्दस्त्रेधा व्याख्यातस्तत्राऽऽद्यं व्याख्यानं युक्तमित्याह—पूर्वं त्विति। गुरूपदेशे सत्यपि प्रतिबोधव्यापकात्मानुसंधानं विनाऽपरोक्षावगमासंभवात्सद्योमुक्ते-श्चाशास्त्रीयत्वादित्यर्थः॥ १२ ॥ ४ ॥

इह चेदवेदीदित्यादिवाक्यार्थं संगृहीतं विवृणोति—इह मनुष्यजन्मनीत्यादिना। विरोधादिति। एकस्मिन्निरंशे चिन्मात्रे चयनस्योर्ध्वाधोदेशनिवेशनस्येष्टकाना-मिवासंभवादित्यर्थः॥ १३ ॥ ५ ॥
इति द्वितीयः खण्डः ॥ २ ॥

---

१ घ. च. छ. झ. °रथ°।

ब्रह्म ह देवेभ्य इति ब्रह्मणो दुर्विज्ञेयतोक्तिर्यत्नाधिक्यार्था । समाप्ता ब्रह्मविद्या यदधीनः पुरुषार्थः । अत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यते । तद्विज्ञाने कथं नु नाम यत्नमधिकं कुर्यादिति । शमाद्यर्थो वाऽऽम्नायोऽभिमानशातनात् । शमादि वा ब्रह्मविद्यासाधनं विधित्सितं तदर्थोऽयमर्थवादाम्नायः । न हि शमादिसाधनरहितस्याभिमानरागद्वेषादियुक्तस्य ब्रह्मविज्ञाने सामर्थ्यमस्ति । व्यावृत्तबाह्यमिथ्याप्रत्ययग्राह्यत्वाद्ब्रह्मणः । यस्माच्चाग्न्यादीनां जयाभिमानं शातयति । ततश्च ब्रह्मविज्ञानं दर्शयत्यभिमानोपशमे । तस्माच्छमादिसाधनविधानार्थोऽयमर्थवाद इत्यवसीयते । सगुणोपासनार्थो वाऽपोदितत्वात् । नेदं यदिदमुपासत इत्युपास्यत्वं ब्रह्मणोऽपोदितमपोदितत्वादनुपास्यत्वे प्राप्ते तस्यैव ब्रह्मणः सगुणत्वेनाधिदैवमध्यात्मं चोपासनं विधातव्यमित्येवमर्थो वेत्यधिदैवतं तद्वनमित्युपासितव्यमिति हि वक्ष्यति । ब्रह्मेति परो लिङ्गात् । नह्यन्यत्र परादीश्वरान्नित्यसर्वज्ञात्परिभूयाग्न्यादींस्तृणं वज्रीकर्तुं सामर्थ्यमस्ति तन्न शशाक दग्धुमित्यादिलिङ्गाद्ब्रह्मशब्दवाच्य ईश्वर इत्यवसीयते । नह्यन्यथाऽग्निस्तृणं दग्धुं नोत्सहते वायुर्वाऽऽदातुम् । ईश्वरेच्छया तृणमपि वज्री भवतीत्युपपद्यते । तत्सिद्धिर्जगतो नियतप्रवृत्तेः । श्रुतिस्मृतिप्रसिद्धिभिर्नित्यसर्वविज्ञान ईश्वरे सर्वात्मनि सर्वशक्तौ

यः सुराणां जये हेतुरसुराणां पराजये ।
सत्त्वप्रधानया शक्त्या संपन्नः सोऽहमीश्वरः ॥

इति ब्रह्म हेत्याद्याख्यायिकायास्तात्पर्यं संगृहीतं विवृणोति—समाप्तेत्यादिना । तात्पर्यान्तरमाह—शमाद्यर्थो वेति । संग्रहवाक्यं विवृणोति—शमादि वेति । अभिप्रायान्तरमाख्यायिकायाः संगृह्णाति—सगुणोति । संगृहीतं विवृणोति—नेदमित्यादिना । कृत्स्नाख्यायिकायास्तात्पर्यमुक्त्वा ब्रह्मशब्दार्थमाह—ब्रह्मेति । परोलिङ्गादिति । एतद्व्याख्याति—नह्यन्यत्रेत्यादिना । कथं तर्हीश्वरसिद्धिरित्याकाङ्क्षायामाह—तत्सिद्धिरिति । ननु श्रुत्यादिभिरेवेश्वरे सिद्धे किमिति जगतो नियतप्रवृत्तिलिङ्गकानुमानं सूत्रितं तत्राऽऽह—श्रुतिस्मृतिप्रसिद्धिभिरिति । यावत्तर्केण संभवो नानुगृह्यते तावच्छास्त्रप्रतिपन्नोऽपीश्वरो न निश्चीयतेऽर्थवादत्वशङ्काप्रतिबन्धादतः शास्त्रार्थस्येश्वरस्य निश्चयाय नियमाय सामान्यतो दृष्टमनुमानं शास्त्रानुग्राहकरूपं सूत्रे-

---

१ क. °दिर्वेति ।

सिद्धेऽपि शास्त्रार्थनिश्चयार्थमुच्यते । तस्येश्वरस्य सद्भावसिद्धिः कुतो भवतीत्युच्यते । यदिदं जगद्देवगन्धर्वयक्षरक्षःपितृपिशाचादिलक्षणं द्युवियत्पृथिव्यादित्यचन्द्रग्रहनक्षत्रविचित्रं विविधप्राण्युपभोगयोग्यस्थानसाधनसंबन्धि तदत्यन्तकुशलशिल्पिभिरपि दुर्निर्माणं देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रममेतद्भोक्तृकर्मविभागज्ञप्रयत्नपूर्वकं भवितुमर्हति । कार्यत्वे सति यथोक्तलक्षणत्वात् । गृहप्रासादरथशयनासनादिवद्विपक्ष आत्मादिवत् । कर्मण एवेति चेत् । न परतन्त्रस्य निमित्तमात्रत्वात् । यदिद-

---

णोच्यते । एतद्व्याख्याति—तस्येश्वरस्येत्यादिना । अनादिप्रसिद्धकर्तृव्यतिरिक्तं जगद्धर्मीकृत्य यद्यपीश्वरः सिषाधयिषितस्तथाऽपि जगतो बहूनि विशेषणानि संसारिविलक्षणकर्तृसंभावनाय, नैयायिकास्तु व्याप्यस्य पक्षधर्मताबलाद्व्यापकविशेषः पक्षधर्मः सिध्यति ततः स्वतन्त्रमनुमानमीश्वरनिश्चायकमाहुः । तद्दूषणं प्रकटार्थे द्रष्टव्यम् । सामान्यतो दृष्टं रचयति । एतज्जगद्भोक्तृणां कर्मणां च विभागं यो जानाति तत्पूर्वकं भवितुमर्हतीति प्रतिज्ञा । अत्र जगन्निमित्तादृष्टनिष्पत्त्यर्थो यो जीवानां प्रयत्नस्तत्पूर्वकत्वं जगतः सिद्धमिति सिद्धसाधनत्वं वदतां निरीश्वरवादिनां निरासाय विशेषणं भोक्तृकर्मविभागज्ञेति । न हि जीवानामेते भोक्तारोऽस्मिन्देशे काले वाऽस्य कर्मफलस्येति विभागज्ञानं संभवति । विशेषानभिज्ञत्वादित्यर्थः । यथोक्तलक्षणत्वादिति । विचित्रत्वादित्युक्ते व्यभिचारः स्यात् । आत्मादिस्वभाववैचित्र्यस्य प्रयत्नपूर्वकत्वाभावात्तदर्थं कार्यत्वे सतीति विशेषणम् । कार्यत्वादित्युक्तेऽबुद्धिपूर्वकारिकार्ये विभागज्ञप्रयत्नपूर्वकत्वं नास्तीत्यनैकान्तिकत्वं स्यात्तदर्थं यथोक्तलक्षणत्वादिति । यद्विचित्रं तद्विभागज्ञप्रयत्नपूर्वकं यथा गृहादि । जानात्येव हि तक्षादिरयं गृहादिरस्य स्वामिनो द्रव्यदानादिपूर्वकं वाऽस्य निर्माणमित्थं चेति ततो न साध्यवैकल्यं यथाशब्दं हि साधनदूषणे । नाभिप्रायवशात् । विपक्षे व्यतिरेक आत्मादिवदित्युदाहरणम् । यद्विभागज्ञप्रयत्नपूर्वकं न भवति तद्विशिष्टकार्यमपि न भवति । यथाऽऽत्माकाशादीत्यन्वयव्यतिकरेकप्रयोग इत्यर्थः । विचित्रकार्यत्वमस्तु विभागज्ञप्रयत्नपूर्वकत्वं न भविष्यति किं बाधकं जगद्वैचित्र्यस्य कर्मवैचित्र्यादेव संभवादतः पक्ष एव साध्याभावशङ्कया शङ्कितविपक्षे वर्तमानो हेतुः शङ्कितव्यभिचार इत्यभिप्रेत्याऽऽह—कर्मण एवेति चेदिति । परिहरति—न परेति । कर्तृपरतन्त्रस्य कर्मणो निमित्तमात्रत्वात्स्वातन्त्र्येण निमित्तत्वासंभवात्कार्यवैचित्र्यस्य भङ्गप्रसङ्गो बाधकः कर्तारमन्तरेण । अतः पक्षे साध्याभावशङ्कानुपपत्तेर्न शङ्कितव्यभिचारित्वमिति भावः । संग्रहवाक्यस्य पूर्वपक्षभागं विवृणोति—यदिदमित्यादिना । यदिदमीश्वरवादिभिरपि

---

१ च. ज. °र्मविशेषवि° । २ ज. °गविशेषज्ञ° । ३ छ. झ. ञ. °ति । न क°।

नुपभोगवैचित्र्यं प्राणिनां तत्साधनवैचित्र्यं च देशकालनिमित्तानु-
रूपनियतप्रवृत्तिनिवृत्तिक्रमं च लब्ध नित्यसर्वज्ञकर्तृकम् । किं तर्हि कर्मण
एव तस्याचिन्त्यप्रभावत्वात्सर्वैश्च फलहेतुत्वाभ्युपगमात् । सति कर्मणः
फलहेतुत्वे किमीश्वराधिककल्पनयेति न नित्यस्येश्वरस्य नित्यसर्वज्ञशक्तेः
फलहेतुत्वं चेति चेत् । न कर्मण एवोपभोगवैचित्र्याद्युपपद्येत । कस्मात् ।
कर्तृतन्त्रत्वात्कर्मणः । चितिमत्प्रयत्ननिर्वृत्तं हि कर्म तत्प्रयत्नोपरमादुपरतं
सद्देशान्तरे कालान्तरे वा नियतनिमित्तविशेषापेक्षं कर्तुः फलं जनयिष्यतीति
न युक्तमनपेक्ष्यान्यदात्मनः प्रयोक्तृ कर्तैव फलकाले प्रयोक्तेति चेन्मया
निर्वर्तितोऽसि त्वां प्रयोक्ष्ये फलाय यदात्मानुरूपं फलमिति न देशकाल-
निमित्तविशेषानभिज्ञत्वात् । यदि हि कर्ता देशविशेषाभिज्ञः सन्स्वातन्त्र्येण
कर्म नियुञ्ज्याच्ततोऽनिष्टफलस्याप्रयोक्ता स्यात् । न च निर्निमित्तं तदनि-
च्छयाऽऽत्मसमवेतं तच्चर्मवद्विकरोति कर्म । नचाऽऽत्मकृतमकर्तृसमवेतमय-
स्कान्तमणिवदाकृष्टृ भवति प्रधानकर्तृसमवेतत्वात्कर्मणः । भूताश्रयामिति

वैषम्यनैर्घृण्यदोषपरिहाराय कर्मणो जगद्वैचित्र्यहेतुत्वमिष्टं तत्संपातिपन्नं विहायापूर्वं ईश्वरः
कल्प्यते धर्मो तस्य फलहेतुत्वं च धर्मः कल्पनीय इति गौरवं स्यादित्याह—न नित्य-
स्येश्वरस्येति । सति लाघवे गौरवं दूषणं स्यान्नेह तदस्तीत्यभिप्रेत्य सिद्धान्तं विवृ-
णोति—न कर्मण एवेत्यादिना । आत्मनोऽन्यं प्रवर्तकमनपेक्ष्य कर्म चेन्न फलं
जनयति तर्हि कर्ता जीव एव प्रयोजकोऽस्त्विति शङ्कित्वा परिहरति—कर्तैवेत्यादिना ।
अनिष्टफलभोगप्रियन्यथानुपपत्त्या कर्तुः कर्मनियोक्तृत्वं न संभवति चेत्तर्हि निर्नि-
मित्तमेव कर्म फलाकारेण परिणमत इति जरत्कर्ममीमांसकानां मतमाशङ्क्याऽऽह—
न च निर्निमित्तमिति । कर्तुरनिच्छया कर्म विकरोतीत्यत्र दृष्टान्ताभावाच्चर्मणोऽपि
विकारस्य सनिमित्तत्वादित्यर्थः । यच्च सौगतेनोच्यते फलकालपर्यन्तं कर्तुरवस्थाना-
भावान्न कर्तृसमवेतं कर्म किंतु क्षणिकविज्ञानेनाऽऽत्मना कृतं कदाचित्फलस्याऽऽ-
कृष्टृ भवति । यथाऽयस्कान्तो मणिः कदाचिच्चेतनेन प्रयुक्तोऽन्यदाऽपि लोहस्य प्रेरको
भवति तद्वदिति तत्राऽऽह—न चाऽऽत्मकृतमिति । करणादीनि कारकाणि यः प्रेर-
यन्करोति स प्रधानकर्ता । तत्समवेतं कर्म प्रसिद्धं तस्य च फलकालपर्यन्तं स्थायि-
त्वमेष्टव्यम् । अन्यथाऽकृताभ्यागमकृतविप्रणाशप्रसङ्गात्प्रत्यभिज्ञाप्रामाण्याच्चेत्यर्थः ।
लोकायतिकाभिप्रायमुद्भाव्य दूषयति—भूताश्रयमित्यादिना । आधुनिककर्ममीमांसकानां

---

१ घ. च. छ. झ. ञ. °निमि° ।

चेन्न साधनत्वात् । कर्तृक्रियायाः साधनभूतानि भूतानि क्रियाकालेऽनुभूतव्यापाराणि समाप्तौ च हलादिवत्कर्त्रा परित्यक्तानि न फलं कालान्तरे कर्तुमुत्सहन्ते न हि हलं क्षेत्राद्व्रीहीन्गृहं प्रवेशयति भूतकर्मणोश्चाचेतनत्वात्स्वतःप्रवृत्त्यनुपपत्तिः । वायुवदिति चेन्नासिद्धत्वात् । न हि वायोरचितिमतः स्वतःप्रवृत्तिः सिद्धा रथादिष्वदर्शनात् । शास्त्रात्कर्मण एवेति चेच्छास्त्रं हि क्रियातः फलसिद्धिमाह नेश्वरादेः स्वर्गकामो यजेतेत्यादि । न च प्रमाणाधिगतत्वादानर्थक्यं युक्तम् । न चेश्वरास्तित्वे प्रमाणान्तरमस्तीति चेत् । न दृष्टन्यायहानानुपपत्तेः । क्रिया हि द्विविधा दृष्टफलाऽदृष्टफला च । दृष्टफलाऽपि द्विविधाऽनन्तरफलाऽऽगामिफला च । अनन्तरफला गतिभुजिलक्षणा । कालान्तरफला च कृषिसेवादिलक्षणा । तत्रानन्तरफला फलापवर्गिण्येव कालान्तरफला तूत्पन्नप्रध्वंसिनी । आत्मसेव्याद्यधीनं हि कृषिसेवादेः फलं यतो न चोभयन्यायव्यतिरेकेण स्वतन्त्रं कर्म ततो वा फलं दृष्टम् । तथा च कर्मफलप्राप्तौ न दृष्टन्यायहानमुपपद्यते । तस्माच्छास्त्रान्ते यागादिकर्मणि नित्यः कर्तृकर्मफलविभागज्ञ ईश्वरः सेव्यादिवद्यागाद्यनुरूपफलदातोपपद्यते स

मतमुद्भावयति—शास्त्रादित्यादिना । यजेतेत्याख्यातपदात्सामान्येन समीहितसाधनं यागः प्रतीयते । कस्य समीहितस्य साधनमिति विशेषाकाङ्क्षायां स्वर्गकामपदसंनिधानात्काम्यमानस्वर्गसाधनत्वं यद्यप्यवगम्यते तथाऽपि क्षणिकस्य यागस्य कालान्तरीयस्वर्गसाधनत्वासंभवान्निष्फलत्वशङ्केत्याशङ्क्याऽऽह—न चेति । औषधपानादेः कर्मणः स्थायिसंस्कारद्वारेण कालान्तरीयारोग्यादिफलहेतुत्वप्रसिद्धेर्यागस्य श्रुतसाधनत्वनिर्वाहाय स्थाय्यवान्तरापूर्वं परिकल्प्यते तेन न त्वानर्थक्यं निर्दोषवाक्याधिगतत्वादित्यर्थः । श्रुतसाधनत्वसिद्ध्यन्यथानुपपत्त्या किमितीश्वर एव नेष्यते तत्राऽऽह—न चेश्वरेति । नेयमर्थापत्तिरीश्वरास्तित्वे प्रमाणमन्यथाऽप्युपपन्नत्वात् । न च मानान्तरमस्ति । तद्विषयश्रुत्यादेरर्थवादत्वादित्यर्थः । नापूर्वद्वारेण श्रुतनिर्वाहः कल्पनीयः । यद्धि यदवहितफलं कर्म तच्चैतन्यप्रयुक्तफलमिति दृष्टायां व्याप्तेर्हानिप्रसङ्गादतः श्रुतसाधनत्वसिद्ध्यन्यथानुपपत्त्येश्वरः फलदाता कल्पनीय इत्याह—न दृष्टेति । संग्रहवाक्यं विवृणोति—क्रिया हीत्यादिना । फलोदयेनापवर्गो नाशो यस्याः सा फलापवर्गिणी न फलदातारं पृथगपेक्षत इत्यर्थः । उत्पन्नप्रध्वंसिनीति । उत्पन्ना सती फलमदत्त्वैव प्रध्वंसते ततस्तत्र फलदातारं कालान्तरेऽपेक्षत इत्यर्थः । यागादिफलं कर्माद्यभिज्ञेन दीयमानं व्यवहितफलत्वात्सेवाफलवदित्याह—तस्माच्छास्त्रान्ते यागादीति । ननु जीवस्तावत्स्वोपभोगसाधननियन्ता, तस्यापीश्वरः फलदानेन नियन्ता

---

१ घ. च. छ. ञ, °त्वश्च° । २ घ. च. छ. ञ, °द्धयनु° । ३ घ. च. छ. ञ. °ता का° ।

चाऽऽत्मभूतः सर्वस्य सर्वक्रियाफलप्रत्ययसाक्षी नित्यविज्ञानस्वभावः संसारधर्मैरसंस्पृष्टः श्रुतेश्च । "न लिप्यते लोकदुःखेन बाह्यः" "जरामृत्युमत्येति" "विजरो विमृत्युः" । "सत्यकामः सत्यसंकल्प एष सर्वेश्वरः पुण्यं कर्म कारयति" । "अनश्नन्नन्यो अभिचाकशीति" । "एतस्य वा अक्षरस्य प्रशासने" इत्याद्या असंसारिण एकस्याऽऽत्मनो नित्यमुक्तस्य सिद्धौ श्रुतयः । स्मृतयश्च सहस्रशो विद्यन्ते । न चार्थवादाः शक्यन्ते कल्पयितुम् । अनन्ययोगित्वे सति विज्ञानोत्पादकत्वात् । न चोत्पन्नं विज्ञानं बाध्यते । अप्रतिषेधाच्च । न चेश्वरो नास्तीति निषेधोऽस्ति ।

चेदिष्यते तर्हि नियन्तुः स्वव्यतिरिक्तनियम्यत्वाङ्गीकारादीश्वरस्याप्यन्यो नियन्ता प्रसज्येत नियन्तृत्वाविशेषात् । अतोऽनवस्थाप्रसङ्गबाधितमनुमानमित्याशङ्क्याऽऽह—स चाऽऽत्मभूतः सर्वस्येति । कल्पितभेदमात्रेण नियम्यनियामकभावोपपत्तेर्न तात्त्विकभेदावकाशः । तात्त्विकभेदे[1]त्वे च घटादिवत्कार्यत्वादिप्रसङ्गस्ततोऽतिरिक्तनियम्यत्वव्याप्त्यभावान्नानवस्थाप्रसङ्ग इत्यर्थः । राजवदीश्वरः फलदाता चेत्तर्हि निग्रहानुग्रहकर्तृत्वाद्रागादिमान्स्यात्तत्राऽऽह—सर्वक्रियाफलेति । यथा लौकिकसाक्षी कस्यचिज्जयहेतुरन्यस्य पराजयहेतुरपि न रागादिमान्कथ्यते । यथोपलब्धभाषित्वात् । तथेश्वरः क्रियादिसाक्षी रागादिमान्न भविष्यति । अननुरूपादातृत्वात् । राजाऽप्यसाधून्दण्डयन्साधून्परिरक्षन्न रागादिमान्कथ्यत इति भावः । साक्षित्वे तर्हि(सती)श्वरस्येक्षणक्रिया स्यात्तत्राऽऽह—नित्येति । नित्यविज्ञानस्वभावस्यानिर्वाच्यविषयावच्छेदेन साक्षित्वं कल्पितमित्यर्थः । सर्वस्य जीवस्याऽऽत्मभूतश्चेदीश्वरस्तर्हि संसारधर्मैर्लिप्येत संसार्यभेदादित्याशङ्क्याऽऽह—संसारेति । न केवलमुपपत्तेरीश्वरसिद्धिः श्रुतेरपीत्युक्तं ताः श्रुतीरुदाहरति—न लिप्यत इत्यादिना । स्मृतयश्च—"यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते" । "समं सर्वेषु भूतेषु" । "ईश्वरः सर्वभूतानां" इत्याद्याः । यदुक्तमर्थवादत्वादप्रमाण्यं तत्राऽऽह—न चेति । ईश्वरविषयाणि वाक्यानि न कर्मविधिसंनिधिसमाम्नातानि । अतोऽनन्यशेषत्वे सति बोधकत्वात्स्वार्थे प्रमाणानि कर्मविधिवाक्यवदित्यर्थः । किंचार्थवादत्वेऽपि नाप्रामाण्यं पदसमन्वयबलेन जायमानस्य ज्ञानस्य बाधादर्शनात्स्वतःप्रामाण्यादस्य बाधायिता नोपपद्यत इत्याह—नचोत्पन्नमिति । इतश्च नाप्रामाण्यमित्याह-अप्रतिषेधाच्चेति । यथा द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेति प्रस्तुत्य नेति नेतीति परस्तात्प्रति

---

१ ग. घ. ङ. छ. झ. वाऽङ्क्ष° । २ घ. च. छ. °दत्वे । ३ घ. च. छ. झ. °पत्तिभिरी° । ४ ङ्ग. °तो नाल्पि° ।

प्राप्त्यभावादिति चेन्नोक्तत्वात् । न हिंस्यादितिवत्प्राप्त्यभावात्प्रतिषेधो नाऽऽरभ्यत इति चेन्न । ईश्वरसद्भावे न्यायस्योक्तत्वात् । अथवाऽप्रतिषेधादिति कर्मणः फलदान ईश्वरकालादीनां न प्रतिषेधोऽस्ति । न च निमित्तान्तरनिरपेक्षं केवलेन कर्त्रैव प्रयुक्तं फलदं दृष्टम् । न च विनष्टोऽपि यागः कालान्तरे फलदो भवति । सेव्यबुद्धिवत्सेवकेन सर्वज्ञेश्वरबुद्धौ तु संस्कृतायां यागादिकर्मणा विनष्टेऽपि कर्मणि सेव्यादिवेश्वरात्फलं कर्तुर्भवतीति युक्तम् । न तु पुनः पदार्था वाक्यशतेनापि देशान्तरे कालान्तरे वा स्वं स्वं स्वभावं जहति नहि देशकालान्तरेषु चाग्निरनुष्णो भवति । एवं कर्मणोऽपि कालान्तरे फलं द्विप्रकारमेवोपलभ्यते । बीजक्षेत्रसंस्कारपरिरक्षाविज्ञानवत्कर्त्रपेक्षफलं कृष्यादि विज्ञानवत्सेव्यबुद्धिसंस्कारापेक्ष-

---

षेधति नैवमीश्वरं प्रस्तुत्य प्रतिषेध उपलभ्यत इत्यर्थः । प्रतिषेधाभावः सत्त्वान्न भवति किंत्वप्राप्तत्वात् । यथा रागतः प्राप्ता भूताहिंसा निषिध्यते नैवमीश्वरस्य प्राप्तिरस्तीत्यन्यथासिद्धिमाशङ्क्य परिहरति—प्राप्तीत्यादिना । अप्रतिषेधादिति संग्रहवाक्यं प्रकारान्तरेण व्याचष्टे—अथवेति । स्वर्गकामो यजतेत्यादिशास्त्रं यागस्य फलदायिनीं शक्तिं द्योतयति न सहकार्यन्तरं निषेधयति । वाक्यभेदप्रसङ्गादित्यर्थः । इतश्च शास्त्रमयोगव्यवच्छेदकं वाच्यं नान्ययोगव्यवच्छेदकम् । स्वकचन्दनवनितादिनिमित्तनिरपेक्षस्य कर्मणः फलहेतुत्वानुपलम्भात् । अतो यथा मानान्तरसिद्धं स्वकचन्दनवनितादेर्निमित्तत्वमिष्टं तथेश्वरस्याप्येष्टव्यमित्याह—न च निमित्तान्तरनिरपेक्षमिति । इतश्चेश्वरः फलदाता वक्तव्यः प्रध्वस्तस्य यागस्य कारणत्वासंभवात् । नियतपूर्वक्षणसत्त्वं हि कारणत्वम् । न चापूर्वद्वारेणोपपद्यते । असति द्वारवति द्वारित्वानुपपत्तेः । न चौषधपानादिदृष्टान्तः । औषधाद्यवयवानां संस्कृतानां फलकालपर्यन्तमनुवर्तमानामामेव कालान्तरीयफलहेतुत्वादित्यभिप्रेत्याऽऽह—न च विनष्ट इति । कथं तर्हीश्वरोऽपि नष्टस्य फलदातोपपद्यते तत्राऽऽह—सेव्यबुद्धिवदिति । एतत्कर्मानेनानुष्ठितमिति कर्मणेश्वरस्य बुद्धावारोह एव कर्मणां संस्कारस्तद्वशाद्विनष्टेऽपि कर्मणीश्वरात्फलं युक्तम् । यथाऽनेनाहं सेवित इति सेव्यबुद्धौ संस्कृतायां कालान्तरे विनष्टायामपि सेवायां सेव्याद्राजादेः फलं भवति तद्वदित्यर्थः । यद्यपि लौकिकानां कर्मणां फलसाधनत्वं चेतनाधीनं दृष्टं तथाऽपि वैदिकस्य यागादेः फलं दातारं विनाऽपि वाक्यप्रामाण्याद्भविष्यतीति नाऽऽशङ्कनीयमित्याह—न तु पुनरिति । अन्वययोग्यानां पदार्थानां संसर्गबोधकमेव वाक्यं न तु तद्बलाददृष्टः पदार्थस्वभावस्त्यक्तुं शक्यत इत्यर्थः । बीजक्षेत्रयोः संस्कारस्तत्परिरक्षा

---

१ क. ख. घ. छ. झ. ञ. °कारणवादिनां । २ झ. फलं दृ° । ३ घ. °लक्ष्यते । ४ झ. °त्कर्त्रपेतफ° । ५ घ. छ. झ. ञ. °रवत्त्वात्° ।

फलं च सेवादि । यागादेः कर्मणस्तथाऽविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कालान्तरफलत्वात्कर्मदेशकालनिमित्तविपाकाविभागज्ञबुद्धिसंस्कारापेक्षं फलं भवितुमर्हति । सेवादिकर्मानुरूपफलज्ञसेव्यबुद्धिसंस्कारापेक्षफलस्येव । तस्मात्सिद्धः सर्वज्ञ ईश्वरः सर्वजन्तुबुद्धिकर्मफलविभागसाक्षी सर्वभूतान्तरात्मा । यत्साक्षादपरोक्षाद्य आत्मा सर्वान्तर इति श्रुतेः । स एव चात्राऽऽत्मा जन्तूनां नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता नान्यदतोऽस्ति विज्ञात्रित्याद्यात्मान्तरप्रतिषेधश्रुतेस्तत्त्वमसीति चाऽऽत्मत्वोपदेशात् । नहि मृत्पिण्डः काञ्चनात्मत्वेनोपदिश्यते । ज्ञानशक्तिकर्मोपास्योपासकशुद्धाशुद्धमुक्तामुक्तभेदादात्मभेद एवेति चेन्न । भेददृष्ट्यपवादात् । यदुक्तं संसारिण ईश्वरादनन्य इति। तन्नाकिं तर्हि भेद एव संसार्यात्मनाम् । कस्माच्छक्षणभेदादश्वमहिषवत् । कथं लक्षणभेद इत्युच्यते । ईश्वरस्य तावन्नित्यं सर्वविषयं ज्ञानं सवितृप्रकाशवत् । तद्विपरीतं संसारिणां खद्योतस्येव । तथैव शक्तिभेदोऽपि । नित्या सर्वविषया चेश्वरशक्तिर्विपरीतेतरस्य । कर्म च चित्स्वरूपात्मसत्तामात्रनिमित्तमीश्वरस्य । औष्ण्यस्वरूपद्रव्यसत्तामात्रनिमित्तदहनकर्मवत्। राजायस्कान्तप्रकाशकर्मवच्च स्वात्माविक्रियारूपम् । विपरीतमितरस्य। उपासीतेतिवचनादुपास्य ईश्वरो गुरुराजवत् । उपासकश्चेतरः शिष्यभृत्यवत् । अपहतपाप्मादिश्रवणान्नित्यशुद्ध ईश्वरः । पुण्यो वै पुण्येनेतिवचनाद्विपरीत इतरः । अत एव नित्यमुक्त एवेश्वरो नित्याशुद्धियोगात्संसारीतरः । अपि च

च तद्विज्ञानवान्यः कर्ता तदपेक्षफलं कृष्यादि दृष्टम् । सेवादिकं च विज्ञानवान्यः सेव्यस्तद्बुद्धिसंस्कारापेक्षं दृष्टम् । यथा यागादेः कर्मणः कालान्तरफलत्वादविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कर्मादिविभागज्ञकर्त्रपेक्षफलत्वं भवितुमर्हतीत्यर्थः । लौकिककर्मस्वनेकविधेष्वपि मध्ये सेवा यागादरेनुरूपो दृष्टान्त इत्यभिप्रेत्य पुनराह—सेवादीति । सेवादिकर्मानुरूपं फलं जानाति यः सेव्यस्तद्बुद्धौ यः संस्कारस्तदपेक्षफलत्व सेवादेर्यथा न स्वातन्त्र्यं तद्वदित्यर्थः । एवं तावन्निरीश्वरवादिनं प्रतीश्वरं प्रसाध्य सेश्वरवादिनामभिमतवास्तवभेदनिरासाय प्रक्रमते—स एवेति । जीव ईश्वराद्भिन्नस्तद्विरुद्धधर्माक्रान्तत्वात् । यो यद्विरुद्धधर्माक्रान्तः स ततो भिन्नः । यथाऽश्वान्महिष इत्यनुमानमुद्भाव्य तस्य भेदनिन्दानुपपत्त्यनुगृहीताभेदश्रुतिविरोधात्कालात्ययापादिष्टत्वमाह—ज्ञानशक्तीत्यादिना । संग्रहवाक्यं विवृणोति—यदुक्तमित्यादिना । स्वात्मनोऽविक्रियारूपं जगदुपादानादिलक्षणं कर्मेश्वरस्येत्यर्थः । दूषणान्तराभिधित्सयाऽनुवदति—

---

१ छ. ज्ञ. °शुद्धबुद्ध° । २ घ. च. छ. ज्ञ. ञ, °पेक्षयं फ° ।

यत्र ज्ञानादिलक्षणभेदोऽस्ति तत्र भेदो दृष्टः । यथाऽश्वमहिषयोस्तथा ज्ञानादिलक्षणभेदादीश्वरादात्मनां भेदोऽस्तीति चेन्न । कस्मात् । अन्योऽसावन्योऽहमस्मीति न स वेद ते क्षय्यलोका भवन्ति । मृत्योः स मृत्युमाप्नोतीति भेददृष्टिर्ह्यपोह्यते । एकत्वप्रतिपादिन्यश्च श्रुतयः सहस्रशो विद्यन्ते । यदुक्तं ज्ञानादिलक्षणभेदादित्यत्रोच्यते नानभ्युपगमात् । बुद्ध्यादिभ्यो व्यतिरिक्ता विलक्षणाश्चेश्वराद्भिन्नलक्षणा आत्मानो न सन्ति । एक एवेश्वरश्चाऽऽत्मा सर्वभूतानां नित्यमुक्तोऽभ्युपगम्यते । बाह्यश्चक्षुर्बुद्ध्यादिसमाहारसंताना[1]हंकारममत्वादिविपरीतप्रत्ययप्रबन्धाविच्छेदलक्षणो नित्यशुद्धबुद्धमुक्तविज्ञानात्मेश्वरगर्भो नित्यविज्ञानावभासश्चित्तचैत्यबीजबीजिस्वभावः कल्पितोऽनित्यविज्ञान ईश्वरलक्षणविपरीतोऽभ्युपगम्यते । यस्याविच्छेदे संसारव्यवहारः । विच्छेदे च मोक्षव्यवहारः । अन्यश्च मृत्प्रलेपवत्प्रत्यक्षप्रध्वंसो देवपितृमनुष्यादिलक्षणो भूतविशेषसमाहारो न पुनश्चतुर्थोऽन्यो भिन्नलक्षण ईश्वरादभ्युपगम्यते । बुद्ध्यादिकल्पितात्मव्यतिरेकाभिप्रायेण तु लक्षणभेदादित्याश्रयासिद्धो हेतुः । ईश्वरादन्यस्याऽऽत्मनोऽ-

---

यदुक्तमिति । जीवाः किं बुद्ध्यादिविशिष्टाश्चित्प्रतिबिम्बा धर्मित्वेन गृह्यन्ते किंवा देवमनुष्यादिशब्दवाच्याः सचितिका देहाः किंवा तृतीयो विलक्षणनिरुपाधिकभेदभिन्नश्चेतनः । आद्ये सिद्धसाधनत्वमाह—नानभ्युपगमादित्यादिना । चित्तं ज्ञानं चैत्याः सुखादयो बीजमविद्यादि बीजिशरीरं तत्स्वभावाविशिष्टस्य विशेषणतादात्म्यादित्यर्थः । यस्य विशिष्टरूपस्याविच्छेदे तत्प्रविष्टचित्स्वरूपस्य संसारव्यवहारो, यस्य च विच्छेदे प्रतिबिम्बरूपस्य बिम्बसंपत्त्या मोक्षव्यवहारो भवति स कल्पितरूपः पृथगभ्युपगम्यतेऽतः सिद्धसाधनमित्यर्थः । द्वितीयविकल्पेऽपि सिद्धसाधनत्वमाह—अन्यश्चेति । तृतीयविकल्पे बुद्ध्यादिकल्पितेभ्यो विशिष्टात्मभ्यो व्यतिरेकेण निरुपाधिकस्वरूपाभिप्रायेण पक्षीकरणे हेतुराश्रयासिद्धस्तादृशस्याऽऽश्रयस्य मानाविकलत्वादित्यर्थः । ईश्वरादन्य आत्मा नास्तीति वदता सर्वोपाधिस्थ ईश्वर एवाऽऽत्मेत्युक्तं भवति । तदा च बद्धत्वमुक्तत्वादिविरुद्धधर्मत्वं सुखदुःखादियोगश्चासङ्गस्य विरुद्धः प्रसज्येतेत्यतो वास्तवमसंसारित्वं कल्पितेन संसारित्वेन न विरुध्यत इति दर्शयितुं यस्य यस्यान्तःकरणादिविकारस्योदयादेः संनिधिमात्रेणाऽऽत्मा निमित्तं तस्य तस्य लोकैरहंकारादिभिर्विपरीतरूपस्याध्यारोपणादात्मनः संसारित्वमि-

---

१ क. ख. घ. च. छ. झ. ञ. °त्र विज्ञा° । २ क. छ. झ. °त्प्रलयव° । ३ ग. च. ञ. °नकलावि° । ४ छ. झ. ञ. °स्योदादे सं° ।

सत्त्वात् । ईश्वरस्यैव विरुद्धलक्षणत्वमयुक्तमिति चेत्सुखदुःखादियोगश्च । न । निमित्तत्वे सति लोकाविपर्ययाध्यारोपणात्सवितृवत् । यथा हि सविता नित्यप्रकाशरूपत्वाल्लोकाभिव्यक्त्यनभिव्यक्तिनिमित्तत्वे सति लोकदृष्टिविपर्ययेणोदयास्तमयाहोरात्रादिकर्तृत्वाध्यारोपभाग्भवत्येवमीश्वरे नित्यविज्ञानशक्तिरूपे लोकज्ञानापोहसुखदुःखस्मृत्यादिनिमित्तत्वे सति लोकविपरीतबुद्ध्याऽऽध्यारोपितं विपरीतलक्षणत्वं सुखदुःखादयश्च न स्वतः । आत्मदृष्ट्यनुरूपाध्यारोपाच्च । यथा घनादिविप्रकीर्णेऽम्बरे येनैव सवितृप्रकाशो न दृश्यते स आत्मदृष्ट्यनुरूपमेवाध्यस्यति सवितेदानीमिह न प्रकाशयतीति सत्येव प्रकाशेऽन्यत्र भ्रान्त्या । एवमिह बौद्धादिदृत्त्युद्भवाभिभवाकुलभ्रान्त्याऽध्यारोपितः सुखदुःखादियोग उपपद्यते । तत्स्मरणाच्च तस्यैवेश्वरस्यैव हि स्मरणम् । "मत्तः स्मृतिर्ज्ञानमपोहनं च" "नाऽऽदत्ते कस्यचित्पापम्" इत्यादि । अतो नित्यमुक्त एकस्मिन्सवितरीव लोकाविद्याध्यारोपितमीश्वरे संसारित्वम् । शास्त्रादिप्रामाण्यादभ्युपगतमसंसारित्वमित्यविरोध इति । एतेन प्रत्येकं ज्ञानादिभेदः प्रत्युक्तः । सौक्ष्म्यचैतन्यसर्वग-

---

त्याह—न । निमित्तत्वे सतीत्यादिना । ईश्वरे सुखाद्यारोप इत्युक्ते मायोपाधिके ब्रह्मणीश्वरशब्दवाच्ये सुखाद्यध्यासशङ्का स्यात्तन्निवृत्त्यर्थमाह—नित्यविज्ञानशक्तिरूप इति । यथाऽग्न्यादिशक्तिः शक्त्यन्तरमन्तरेण स्वस्वभावादेव कार्योत्पादनानुकूला तथा नित्यविज्ञानं स्वभावसंनिधिमात्रेणान्तःकरणादिप्रवृत्तिनिमित्तमिति शक्तिमयमुच्यते । तस्मिन्स्वातन्त्र्यादश्वरपदलक्ष्ये विरुद्धावेकधर्माध्यासो न विरुध्यत इत्यर्थः । लोकस्य ज्ञानापोहो विस्मरणम् । न स्वत इति । न परमार्थतो विरुद्धानेकधर्मवत्त्वमित्यर्थः । भ्रान्तस्य स्वदृष्ट्यनुरूपाध्यासारोपदर्शनाच्च नाध्यासो वस्तुक्षतिकर इत्याह—आत्मदृष्टीति । बौद्धादिवृत्तीनामुद्भवाभिभवाभ्यामाकुलस्य वैचित्र्यमापन्नस्य वृत्तीनामेवोद्भवाभिभवौ न तद्व्यापकचैतन्यस्येतिविवेकशून्यलोकस्य भ्रान्त्येति योजना । चैतन्यस्य ज्ञानसुखाद्युत्पादे निमित्तत्वं न केवलमन्वयव्यतिरेकसिद्धम् । तत्स्मरणाच्च भगवद्वाक्याच्च सिद्धमित्यर्थः । ईश्वरे संसारित्वमीश्वरः संसारीतिप्रसिद्ध्यभावाद्विशिष्टानुगतचित्स्वरूप इति व्याख्येयम् । एतेनेति । सिद्धसाधनत्वादिदूषणेन प्रतिशरीरज्ञानसुखादीनामाश्रयभेदस्तात्त्विकः प्रत्युक्तो मन्तव्यः । किंच व्यावर्तकधर्मवशाद्व्यावृत्तिः सिध्यति । सांख्यमते च पुरुषाणां चैतन्यमात्ररूपाणां न व्यावर्तको धर्मोऽस्ति । वैशेषिकमते त्वत्यन्तविशेषकल्पनाऽन्योन्याश्रयपराहता । अतो निर्विशेषत्वात्पुंसां न भेदस्तात्त्विक इत्याह—सौक्ष्म्येति । काश्चि-

---

१ ग. °गत्वा° । २ ग. च. ज. °क्तिरूपम्° । ३ ग, च. छ, ज, त्वन्यपि° ।

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये
देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं विज-
योऽस्माकमेवायं महिमेति ॥ १४ ॥ १ ॥

त्वाद्यविशेषे च भेदहेत्वभावात् । विक्रियावत्त्वे चानित्यत्वात् । मोक्षे च विशेषानभ्युपगमादभ्युपगमे चानित्यत्वप्रसङ्गात् । अविद्यावदुपलभ्यत्वाच्च भेदस्य तत्क्षयेऽनुपपत्तिरिति सिद्धमेकत्वं तस्माच्छरीरेन्द्रियमनोबुद्धिविषय-वेदनासंतानस्याहंकारसंबन्धादज्ञानबीजस्य नित्यविज्ञानान्यनिमित्तस्याऽऽत्मतत्त्वयाथात्म्यविज्ञानाद्विनिवृत्तावज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञा विपर्यये च बन्धसंज्ञा । स्वरूपापेक्षत्वादुभयोः । ब्रह्म ह, इत्यैतिह्यार्थः । पुरा किल देवासुरसंग्रामे जगत्स्थितिपरिपिपालयिषयाऽऽत्मानुशासनानुवर्तिभ्यो देवेभ्योऽर्थिभ्योऽर्थाय विजिग्येऽजैषीदसुरान्ब्रह्मण इच्छानिमित्तो विजयो देवानां बभूवेत्यर्थः । तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । यज्ञादिलोकस्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धिं पूजां वा प्राप्तवन्तः ॥ ॥ १४ ॥ १ ॥

दुःखी काश्चित्सुखी दुःखादिविक्रियाव्यवस्थान्यथानुपपत्त्याऽऽश्रयभेदस्तात्त्विकः कल्प्यते तत्राऽऽह—विक्रियावत्त्वे चेति । सुखादिविक्रियाणामुपाधिधर्मत्वान्नाऽऽत्मभेदसाधकत्वं व्यधिकरणसिद्धत्वादित्यर्थः । किंच न सर्वैरेव मोक्षे विक्रियादिविशेष इष्यते । स्वरूपावस्थानं च मोक्षस्ततः सविशेषत्वं न स्वाभाविकमित्याह—मोक्षे चेति । किंच जाग्रत्स्वप्नयोरविद्यावद्भिर्भ्रान्तैरुपलम्भात्सुषुप्तिसमाध्योर्भ्रान्त्यभावेऽनुपलम्भान्मिथ्यात्वं भेदस्य सिद्धमित्याह—अविद्यावदिति । जीवानां क्रमेणानेकशरीरानुयायित्वात्प्रातिभासिकस्य शरीरादिसंतानस्य मिथ्याभिमानविषयत्वाच्छुक्तिरूप्यवदज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञेति संबन्धः । आत्मन इति कस्मादुच्यते विशिष्टस्य बन्धमोक्षौ किं नेष्येते तत्राऽऽह—स्वरूपापेक्षत्वादिति । विशिष्टस्य मोक्षेऽन्वयासंभवादन्वये वा संसारानिवृत्तिप्रसङ्गादन्यस्य च बन्धेऽन्यस्य च मोक्षे साधनवैयर्थ्यादुपाधिवैशिष्ट्यद्वारेण स्वरूपस्यैवोपाधिप्रतिबिम्बकल्पस्य बन्धमोक्षौ । प्रतिबिम्बो हि वाच्यरूपेण मिथ्या लक्ष्यरूपेण तु बिम्बमेव स्वरूपावस्थानं मुक्तिरुपपद्यते । तदुक्तम्—

" उपाधिना सार्धमुपाधिजन्यमौपाधिकं सर्वमवेहि मिथ्या ।
भागं मृषा चित्प्रतिबिम्बकेऽपि बिम्बं पुनः सत्यमशेषमेव " इति ॥ १४ ॥ १ ॥

१ घ. च. छ. °रणसि° । २ च. छ. झ. ञ. °च स° । ३ क. °च्यत्वरू° ।

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजा-
नत किमिदं यक्षमिति ॥ १५ ॥ २ ॥
तेऽग्निमब्रुवञ्जातवेद एतद्विजानीहि किमिदं
यक्षमिति तथेति ॥ १६ ॥ ३ ॥
तदभ्यद्रवत्तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्र-
वीज्जातवेदा वा अहमस्मीति ॥ १७ ॥ ४ ॥
तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वं दहेयं यदिदं
पृथिव्यामिति ॥ १८ ॥ ५ ॥
तस्मै तृणं निदधावेतद्दहेति । तदुपप्रेयाय सर्वजवेन
तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं
विज्ञातुं यदेतद्यक्षमिति ॥ १९ ॥ ६ ॥

त ऐक्षन्तेति मिथ्याप्रत्ययत्वाद्धेयत्वख्यापनार्थमाम्नायः । ईश्वरनिमित्ते विजये स्वसामर्थ्यनिमित्तोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमेत्यात्मनो जयादि श्रेयोनिमित्तं सर्वात्मानमात्मस्थं सर्वकल्याणास्पदमीश्वरमेवाऽऽत्मत्वेनाबुद्ध्वा पिण्डमात्राभिमानाः सन्तो यं मिथ्याप्रत्ययं चक्रुस्तस्य पिण्डमात्रविषयत्वेन मिथ्याप्रत्ययत्वात्सर्वात्मेश्वरयाथात्म्यावबोधेन हातव्यताख्यापनार्थस्तद्धैषामित्याद्याख्यायिकाम्नायः । तद्ब्रह्म ह किलैषां देवानामभिप्रायं मिथ्याहंकाररूपं विजज्ञौ विज्ञातवत् । ज्ञात्वा च मिथ्याभिमानशातनेन तदनुजिघृक्षया देवेभ्योऽर्थाय तेषामेवेन्द्रियगोचरे नातिदूरे प्रादुर्बभूव । महेश्वरशक्तिमायोपात्तेनात्यन्ताद्भुतेन प्रादुर्भूतं किल केनचिद्रूपविशेषेण । तत्किलोपलभमाना अपि देवा न व्यजानत न विज्ञातवन्तः । किमिदं यदेतद्यक्षं पूज्यमिति ॥ १५ ॥ २ ॥

तद्विज्ञानायाग्निमब्रुवन् । तृणनिधानेऽयमभिप्रायोऽत्यन्तसंभावितयोर-

---

त ऐक्षन्तेति देवानामीक्षणस्य मिथ्याप्रत्ययत्वान्मिथ्याभिमानस्य हेयत्वख्यापनार्थो ब्रह्मणः प्रादुर्भाव इति योजना । सूत्रमिदं व्याख्याति—ईश्वरनिमित्त इत्यादिना । जयादि श्रेष्ठत्वे निमित्तं मन्यमाना इति शेषः ॥ १५ ॥ २ ॥

अथ वायुमब्रुवन्वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ २० ॥ ७ ॥

तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ २१ ॥ ८ ॥ तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वमाददीय यदिदं पृथिव्यामिति ॥ २२ ॥ ९ ॥

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकाऽऽदातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ २३ ॥ ॥ १० ॥ अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ २४ ॥ ११ ॥ स तस्मिन्नेवाऽऽकाशे स्त्रियं-

---

ग्निमारुतयोस्तृणदहनादानशक्त्याऽऽत्मसंभावना शातिता भवेदिति । इन्द्र आदित्यो वज्रभृद्वा । अविरोधात् । इन्द्रोपसर्पणे ब्रह्म तिरोदध इत्यत्रायमभिप्रायः—इन्द्रोऽहमित्यधिकतमोऽभिमानोऽस्य सोऽहमग्न्यादिभिः प्राप्तं वाक्संभाषणमात्रमप्यनेन न प्राप्तोऽस्मीत्यभिमानं कथं न नाम जह्यादिति । तदनुग्रहायैवान्तर्हितं तद्ब्रह्म बभूव ॥ १६ ॥ ३ ॥ १७ ॥ ४ ॥ १८ ॥ ५ ॥ १९ ॥ ६ ॥ २० ॥ ७ ॥ २१ ॥ ८ ॥ २२ ॥ ९ ॥ २३ ॥ १० ॥ ॥ २४ ॥ ११ ॥

स शान्ताभिमान इन्द्रोऽत्यर्थं ब्रह्म विजिज्ञासुर्यस्मिन्नाकाशे ब्रह्मणः प्रादुर्भाव आसीत्तिरोधानं च तस्मिन्नेव स्त्रियमतिरूपिणीं विद्यामाजगाम ।

॥ १६ ॥ ३ ॥ १७ ॥ ४ ॥ १८ ॥ ५ ॥ १९ ॥ ६ ॥ २० ॥ ७ ॥ २१ ॥ ८ ॥ २२ ॥ ९ ॥ २३ ॥ १० ॥ २४ ॥ ११ ॥

---

* यद्यपि बहुषु पुस्तकेष्वाददीयमिति पाठस्तथाऽपि स लेखकप्रमादात् । अथवा " इटोऽत् " इति प्राप्ते छान्दसत्वादमादेशः । + अत्र तदभ्यद्रवत्तत्तस्मादिति पाठो भाष्यतः प्रतीयते ।

माजगाम बहुशोभमानामुमां हैवमतीं ताꣳ
होवाच किमेतयक्षमिति ॥ २५ ॥ १२ ॥
इति तृतीयः खण्डः ॥ ३ ॥
सा × ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये मही-
यध्वमिति ततो हैव विदांचकार ब्रह्मेति ॥ २६ ॥
॥ १ ॥ तस्माद्वा एते देवा अतितरामिवान्यान्देवा-
न्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत्प्र-
थमो विदांचकार ब्रह्मेति ॥ २७ ॥ २ ॥
तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं
पस्पर्श स ह्येनत्प्रथमो विदांचकार ब्रह्मेति ॥२८॥
॥ ३ ॥ तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३

अभिमानबोधहेतुत्वाद्रुद्रपत्न्युमा हैमवतीव सा शोभमाना विद्यैव विरूपोऽपि विद्यावान्बहु शोभते ॥ २५ ॥ १२ ॥ इति तृतीयः खण्डः ॥ ३ ॥

तां च पृष्ट्वा तस्या एव वचनाद्विदांचकार विदितवान् । अत इन्द्रस्य बोधहेतुत्वाद्विद्यैवोमा । विद्यासहायवानीश्वर इति स्मृतिः । यस्मादिन्द्रविज्ञानपूर्वकमग्निवायविन्द्रास्ते ह्येनन्नेदिष्ठमतिसमीपं ब्रह्मविद्यया ब्रह्म प्राप्ताः सन्तः पस्पृशुः स्पृष्टवन्तः । ते हि प्रथमः प्रथमं विदांचकार विदांचक्रुरित्येतत् । तस्मादतितरामतीत्यान्यानतिशयेन दीप्यन्तेऽन्यान्देवांस्ततोऽपीन्द्रोऽतितरां दीप्यते । आदौ ब्रह्मविज्ञानात् ॥ २६ ॥ १ ॥ २७ ॥ २ ॥ २८ ॥ ३ ॥

तस्यैष आदेशस्तस्य ब्रह्मण एव वक्ष्यमाण आदेश उपासनोपदेश इत्यर्थः । यस्माद्देवेभ्यो विद्युदिव सहसैव प्रादुर्भूतं ब्रह्म श्रुतिमत्तस्माद्विद्युतो विद्योतनं यथा यदेतद्ब्रह्म व्यद्युतद्विद्योतितवत् । आ इवेत्युपमार्थ आशब्दः । यथा घनान्धकारं विदार्य विद्युत्सर्वतः प्रका-

---

॥ २९ ॥ १२ ॥ इति तृतीयः खण्डः ॥ ३ ॥ विद्येति सत्त्वप्रधाना शक्तिश्चित्तादात्म्यापत्त्या बोधहेतुः ॥ २६ ॥ १ ॥ २७ ॥ २ ॥ २८ ॥ ३ ॥

तस्मादित्यस्यापेक्षितं पाठंव्यत्यासेन व्याचष्टे—यस्मादित्यादिना । अर्थ-

---

× बहुषु पुस्तकेषु सेतिपदं नास्ति ।

---

१ घ. ङ. पाठं व्य° ।

इतीन्न्यमीमिषदा३ इत्यधिदैवतम् ॥ २९ ॥ ४ ॥
अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैत-
दुपस्मरत्यभीक्ष्णꣳ संकल्पः ॥ ३० ॥ ५ ॥ तद्ध
तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं

शत एव तद्ब्रह्म देवानां पुरतः सर्वतः प्रकाशवद्व्यक्तीभूतमतो व्यद्युतादिवेत्युपास्यम् । यथा सकृद्विद्युतमिति च वाजसनेयके । यस्माच्चेन्द्रोपसर्पणकाले न्यमीमिषत् । यथा कश्चिच्चक्षुर्निमेषणं कृतवानिति । इतीदित्यनर्थकौ निपातौ । निमिषितवदिव तिरोभूतमित्येवमधिदैवतं देवताया अधि यद्दर्शनमधिदैवतं तत् ॥ २९ ॥ ४ ॥

अथानन्तरमध्यात्ममात्मनोऽध्यात्मꣳमुच्यत इति वाक्यशेषः । यदेतद्यथोक्तलक्षणं ब्रह्म गच्छतीव प्राप्नोतीव विषयी करोतीवेत्यर्थः । न पुनर्विषयी करोति मनसोऽविषयत्वाद्ब्रह्मणोऽतो मनो न गच्छति । येनाऽऽहुर्मनो मतमिति हि चोक्तम् । गच्छतीवेति तु मनसोऽपि मनस्त्वात् । आत्मभूतत्वाच्च ब्रह्मणस्तत्समीपे मनो वर्तत इत्युपस्मरत्यनेन मनसैव तद्ब्रह्म विद्वान्यस्मात्तस्माद्ब्रह्म गच्छतीवेत्युच्यते । अभीक्ष्णं पुनः पुनश्च । संकल्पो ब्रह्मप्रेषितस्य मनसः । अत उपस्मरणसंकल्पादिभिर्लिङ्गैर्ब्रह्म मनोऽध्यात्मभूतमुपास्यमित्यभिप्रायः ॥ ३० ॥ ५ ॥

तस्य चाध्यात्ममुपासने गुणो विधीयते तद्ध तद्वनं तदेतद्ब्रह्म तच्च तद्वनं च तत्परोक्षं वनं संभजनीयम् । वनतेस्तत्कर्मणस्तस्मात्तद्वनं नाम । ब्रह्मणो गौणं हीदं नाम । तस्मादनेन गुणेन तद्वनमित्युपासितव्यम् । स यः कश्चिदेतद्यथोक्तमेवं यथोक्तेन गुणेन वनमित्यनेन नाम्नाऽभिधेयं ब्रह्म

वादोपसंहारोऽयं विद्युपक्रमार्थम् । विद्युद्दृष्टान्तेनात्यन्तदीप्तिमत्त्वं निमेषणदृष्टान्तेन देवैरपि दुर्ज्ञेयत्वमिति गुणद्वयं देवानधिकृत्य विवक्षितम् । अत एव तद्गुणद्वयाविशिष्टोपासनमाधिदैविकमुच्यते ॥ २९ ॥ ४ ॥

अहंग्रहेणैवैतत्कर्तव्यमित्यभिप्रेत्याऽऽध्यात्मिकब्रह्मरूपमाह—आत्मेत्यादिना ॥ ३० ॥ ५ ॥

वनतेस्तत्कर्मण इति । वन संभजन इत्यस्य धातोः संभजनार्थस्य रूपं वनमिति । तत्प्रसिद्धं वनं न गृह्यत इत्यर्थः । गौणमिति । अवयवशक्ति-

---

१ ग. घ. च. छ अ. °त्मविषयमध्यात्ममु° ।

वेदाभिहैनꣳ सर्वाणि भूतानि संवाञ्छन्ति ॥ ३१ ॥
॥ ६ ॥ उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्ब्राह्मीं
वाव त उपनिषदमब्रूमेति ॥ ३२ ॥ ७ तस्यै तपो
दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि (णि ?)
सत्यमायतनम् ॥ ३३ ॥ ८ ॥ यो वा एतामेवं वेदा-
पहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रति-

वेदोपास्ते । तस्यैतत्फलमुच्यते । सर्वाणि भूतान्येनमुपासकमभिसंवाञ्छन्तीहाभिसंभजन्ते सेवन्ते स्मेत्यर्थः । यथागुणोपासनं हि फलम् ॥३१॥६॥

उपनिषदं भो ब्रूहीत्युक्तायामप्युपनिषदि शिष्येणोक्त आचार्य आह—उक्ता कथिता ते तुभ्यमुपनिषदात्मोपासनं च । अधुना ब्राह्मीं वाव ते तुभ्यं ब्रह्मणो ब्राह्मणजातेरुपनिषदमब्रूम वक्ष्याम इत्यर्थः । वक्ष्यति हि । ब्राह्मी नोक्ता । उक्ता त्वात्मोपनिषत् । तस्मान्न भूताभिप्रायोऽब्रूमेत्ययं शब्दः ॥ ३२ ॥ ७ ॥

तस्या वक्ष्यमाणाया उपनिषदस्तपो ब्रह्मचर्यादि दम उपशमः कर्माग्निहोत्रादीत्येतानि प्रतिष्ठाऽऽश्रयः । एतेषु हि सत्सु ब्राह्मोपनिषत्प्रतिष्ठिता भवति । वेदाश्चत्वारोऽङ्गानि च सर्वाणि । प्रतिष्ठेत्यनुवर्तते । ब्रह्माश्रया हि विद्या । सत्यं यथाभूतवचनमपीडाकरमायतनं निवासः सत्यवत्सु हि सर्वं यथोक्तमायतन इवावस्थितम् ॥ ३३ ॥ ८ ॥

तामेतां तपआद्यङ्गां तत्प्रतिष्ठां ब्राह्मीमुपनिषदं[2] सायतनामात्मज्ञानहेतुभूतामेवं यथावद्यो वेदानुवर्ततेऽनुतिष्ठति । तस्यैतत्[3]फलमाह—अपहत्य पाप्मानम् । अपक्षय्य (क्षीय) धर्माधर्मावित्यर्थः । अनन्तेऽपारेऽविद्यमानान्ते । स्वर्गे लोके सुखप्राये निर्दुःखात्मनि परे ब्रह्मणि । ज्येये महति

लभ्यं न रूढ्या समुदायशक्त्येत्यर्थः ॥ ३१ ॥ ६ ॥

ब्राह्मणजातेरुपनिषदमिति । ब्राह्मणजात्यनुष्ठेयां विद्यामात्मज्ञानसाधनभूतामित्यर्थः ॥ ३२ ॥ ७ ॥ ब्रह्मेति वेदस्तन्मूलत्वात्तदाश्रया ॥ ३३ ॥ ८ ॥

तपआदीनि वेदाङ्गान्यन्यान्यङ्गानि यस्याः ॥ ३४ ॥ ९ ॥

सत्यकामः स्वयं सिद्धः सर्वेशो यः स्वशक्तितः ।
स वान्तःप्रविष्टोऽहमुपास्यः सर्ववेदिनाम् ॥ १ ॥

---

१ च ज. ब्राह्म्युप° । २ ग. °दं सञ्जाय° । ३ क. ञ. °स्यैव त° ।

तिष्ठति प्रतितिष्ठति ॥ ३४ ॥ ९ ॥ इति चतुर्थः खण्डः ॥ ४ ॥

इति सामवेदीया तलवकारशाखोक्ता केनोपनिषत्समाप्ता ॥

सर्वमहत्तरे प्रतितिष्ठति सर्ववेदान्तवेद्यं ब्रह्माऽऽत्मत्वेनावगम्य तदेव ब्रह्म प्रतिपद्यत इत्यर्थः ॥ ३४ ॥ ९ ॥

चतुर्थः खण्डः ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादपूज्यशिष्य-श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतौ तलवकारोपनिषदपरपर्यायकेनोपनिषद्भाष्ये क्षुद्-गणवाक्यविवरणं समाप्तम् ।

इति चतुर्थः खण्डः ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगत्पूज्यपादशिष्यश्री-मत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतौ सामवेदीयतल-वकारशाखोपनिषत्क्षुद्रगणे वाक्यविवरणे भाष्ये श्रीमत्परमहं-सपरिव्राजकाचार्यश्रीमदानन्दज्ञानविरचिता व्याख्या समाप्ता ॥

ॐ तत्सद्ब्रह्मणे नमः ।

शंकरानन्दकृता केनोपनिषद्दीपिका ।

केनेषितोपनिषदं व्याकरिष्ये पदाध्वना ।
रम्यां तलवकाराणां शाखीयामात्मबोधिनीम् ॥ १ ॥

ब्रह्मणः प्रत्यक्षादिप्रमाणैरनवगम्यत्वात्तदस्तित्वस्य च प्रमाणसिद्धत्वा-द्वित्रेणापि कर्मणा प्राणाद्युपासनेन ब्रह्मज्ञानोत्पादमन्तरेण ब्रह्मावाप्तेः संपा-दयितुमशक्यत्वादशुद्धान्तःकरणस्य च ब्रह्मज्ञानोत्पादस्यासंभावितत्वाद्बहुः कर्माणि प्राणाद्युपासनानि चोक्त्वा ब्रह्मविद्यामुपक्रमते । तत्रापि प्रतिपत्ति-सौकर्यार्थं गुरुशिष्यसंवादमिवाऽऽह । शिष्यः पृच्छति—केनासता सता केनाचेतनेन चेतनेन वा भिन्नेनाभिन्नेन वेषितमिष्टं कस्येच्छानिमित्तमित्यर्थः । पतति सर्वासु दिक्षु गच्छति मन इति वक्ष्यमाणेन संबन्धः । सामान्यतः प्रेरयितारं पृष्ट्वा विशेषतस्तं पृच्छति—प्रेषितं प्रेरितं धनुष्मतेव ज्याघाताद्बा-णजातं को ह्येतदेशादेशान्तरं नयतीत्यर्थः । मनःसंकल्पविकल्पोपलक्षितम-न्तःकरणं ज्ञानशक्तिरित्यर्थः । केन व्याख्यातम् । प्राणः पञ्चवृत्तिरध्यात्मा-दिभेदभिन्नः क्रियाशक्तिरित्यर्थः । प्रथमोऽव्याकृताभिमानिन ईश्वरस्य चेत-नाचेतनात्मकं विक्षेपं जनयतः सर्वप्रवृत्तिनिमित्तं प्रथमः पुत्रः प्रैति प्रकर्षेणो-र्ध्वादिदिक्षु गच्छति युक्तः संबद्धः केन प्रेषित इत्यर्थः । केन व्याख्यातम् । इषितां प्रेरितां वाचं वागिन्द्रियरूपामनेकशब्दजननीमिमां तास्वाद्यदृष्टस्था-नस्थां वदन्ति । अस्य वागिन्द्रियस्य वक्तुमशक्यत्वेऽपि केनाचिन्नुन्नवागि-न्द्रियास्तदुच्चार्यमाणां वर्णपदवाक्यात्मिकां वाचं व्यक्तमुच्चारयन्ति । चक्षुः-श्रोत्रं चक्षुश्च श्रोत्रं च क उ को नाम देवः सर्वव्यवहारकारणभूतो युनक्ति संनद्धं करोति प्रेरयतीत्यर्थः ॥ १ ॥

गुरुराह—श्रोत्रस्य शब्दोपलब्धेरसाधारणकारणस्य श्रोत्रं यथाऽस्माकम-साधारणव्यवहारस्य कारणं श्रोत्रं तथा श्रोत्रस्यापि शब्दग्रहणसामर्थ्यस्यासा-धारणं कारणम् । मनसः सर्वोपलब्धौ साधारणकारणस्य मनः साधारणका-रणत्वसामर्थ्यकारणम् । यद्वेत्यर्थमुक्तैः श्रोत्रादिभिर्वक्ष्यमाणैश्चक्षुरन्तैः संब-ध्यते । अथवा यद्यो वचो वागिन्द्रियस्य वर्णोच्चारणशक्तेर्हि प्रसिद्धस्य वाचं

१ ग. वित्वा° । २ ग. °विद्यां वक्तुमु° । ३ ग. °र्थस्य सा° । ४ ख. °कार्यस्य ।

वाग्वागिन्द्रियसामर्थ्यकारणम् । यदु*य उ स उ एव प्राणस्य पञ्चवृत्तेर्जीवनकारणस्य प्राणो जीवनकारणत्वसामर्थ्यकारणम् । चक्षुषो रूपोपलब्धेरसाधारणकारणस्य चक्षुश्चक्षुःसामर्थ्यकारणम् । एवंभूतो यः स एवेत्यन्वयः । मनआदेः सामान्यतो विशेषतश्च प्रेरयितेति शेषः । अयमर्थः — अस्ति मनआदीनां प्रेरयिता मनआदिविलक्षणश्चेतनश्चेतनानां भेदगन्धशून्य इति । अतो ज्ञात्वाऽविद्यां सकार्यामतिमुच्य सर्वात्मना परित्यज्य धीरा बुद्धिमन्तो ब्रह्मचर्यादिसाधनसंपन्नाः । अथवोपसर्गयोगे धातोरन्यार्थत्वं प्रायेणेति न्यायेन धीरा अतिमुच्याहं ब्रह्मास्मीति तमवगत्य प्रेत्यास्माल्लोकाल्लोकशब्दाभिधेयकार्यकारणसंघाताभिमानादस्मात्प्रतिभाणिप्रत्यक्षात्प्रेत्य प्रकर्षेण गत्वा तदभिमानं परित्यज्येत्यर्थः । अमृता मरणकारणाविद्यातत्कार्यशून्याः । भवन्ति स्पष्टम् ॥ २ ॥

ननु येन प्रेरितं मनआदिकं गच्छति तदिदमिति शुङ्कग्राहिकया कस्मान्न प्रदर्श्यत इत्यत आह—न तत्र चक्षुर्गच्छति रूपादिहीनत्वात्तस्य तस्मिन्विषये चक्षुर्न न गच्छति । ननु चक्षुरग्राह्याणामपि स्वर्गापूर्वादीनां वाग्विषयत्वं दृष्टमित्यत आह—न वाग्गच्छति । स्पष्टम् । तत्रेत्यनुवर्तते । ननु वागग्राह्याणामपि चम्पककेतक्यादिगन्धभेदानां मनसा ग्रहो दृष्ट इत्यत आह—नो मन उक्तम् । गच्छति तत्रेत्यनुवर्तते । यत एवं ततः श्रोत्रस्य श्रोत्रमित्याद्युक्तोपदेशमन्तरेणाऽऽस्याऽऽत्मनो दर्शन उपायान्तरं न विद्मः स्वबुद्ध्या न जानीमः । नापि विदितशास्त्रगुर्वाद्युपदेशेभ्य इत्याह—न विजानीमो विदितेभ्यः शास्त्रेभ्यः शास्त्रगुर्वादिभ्य इदानीमपि नाधिगच्छामः । यथा येन प्रकारेणैतच्छ्रोत्रस्य श्रोत्रमित्यादिनोक्तं मन आदेः प्रेरकमनुशिष्यान्माद्दशो गुरुर्भवादृशं शिष्यं श्रोत्रस्य श्रोत्रमित्यादिनोपदिश्यानु पश्चाच्छ्रोतो वर्तुलशृङ्गो गौरितिवद्विशेषणं कुर्यात्तमुपायं न विद्मो न विजानीम इत्यन्वयः । ननु लोके द्वयी मतिर्ज्ञातमज्ञातं च तत आभ्यामन्यतरविशेषणेन विशेषणीयमित्यत आह—अन्यदेव तद्विदितात्तच्छ्रोत्रस्य श्रोत्रमित्यादिनोक्तं विदिताज्ज्ञानविषयात्सर्वस्मादन्यदेव पृथगेव न तु ज्ञानविषयः । ननु तर्ह्यविदितमज्ञातस्वरूपमित्यत आह—अथो अप्यविदिताज्ज्ञानाविषयादज्ञाता-

---

* इदं पदद्वयं मूले नोपलभ्यते ।

---

1 ग, घ देव इ°।

दन्यदेव । नन्विदं भवद्बुद्धिकल्पितमित्यत आह—इत्यनेन प्रकारेण शुश्रुम श्रुतवन्तो वयम् । पूर्वेषां पित्रादीनाम् । ते च न मूर्खा इत्येवमाह—ये प्रसिद्धाः शमदमादिसाधनसंपन्नाः शास्त्रहृदयज्ञा नोऽस्माकं सहाध्यायिनां शिष्याणां तच्छोत्रस्य श्रोत्रमित्यादिनोक्तं व्याचचक्षिरे विस्पष्टमा समन्तात्कथितवन्तः । अनेन गुरुमुखादेवाऽऽत्मावगतिर्भवति न तु प्रकारान्तरेणेत्यर्थादुक्तम् ॥ ३ ॥

अतो वागाद्यगम्यत्वेनैवावगन्तव्यं न त्वन्यथेत्येतन्मन्त्रपञ्चकेनाऽऽह—यत्प्रसिद्धमात्मस्वरूपं वाचा वर्णपदादिरूपया वेदलोकवाक्यात्मिकयाऽनभ्युदितमप्रकाशितं शृङ्गग्राहिकया । येन प्रसिद्धेन वाग्वागिन्द्रियं वर्णादिवाक्सहितमभ्युद्यते सर्वत उच्यते स्वव्यवहारक्षमा भवतीत्यर्थः । केनेषितां वाचमित्यस्येदमुत्तरम् । तदेव वाचा प्रकाशितं वाचः प्रेरकं न त्वन्यत् । ब्रह्म बृहद्देशकालवस्तुपरिच्छेदशून्यं त्वमस्मच्छिष्यो ब्रह्मणो भेदरहितो विद्धि जानीहि । ननु किमर्थं तदेव ज्ञातव्यं यतो बहुविधभेदमहमनहं वा तदित्युपासते जनाः । तद्वदहमपि भवदुक्तादन्यज्ज्ञास्यामीत्यत आह—नेदमिदं बहुविधभेदमहमनहं वा गृहीतं वागादिविषयभूतं न ब्रह्मेति शेषः । इदंशब्दार्थमाह—यत्प्रसिद्धमुपासकानामिदं प्रसिद्धं ज्ञातृज्ञानज्ञेयभेदवदुपासत उपासनं कुर्वते यथावत्स्वरूपावबोधशून्याः ॥ ४ ॥

वागगम्यस्यापि चम्पककेतक्यादिगन्धभेदस्य मनसा ग्रहो दृष्ट इत्यत आह—यत्प्रसिद्धं मनसो मनो मनसाऽन्तःकरणेन न मनुते कोऽपि नाधिगच्छति । न च तदकिंचित्करमित्याह—येन मनसाऽविज्ञातेनाऽऽहुः कथयन्त्यस्माकं व्याख्यातारो मन उक्तं मतं ज्ञातं सर्वकार्यक्षममित्यर्थः । अनेन केनेषितमित्यादिप्रथमप्रश्नस्योत्तरं सिद्धम् । यद्यपि वाङ्मनसयोरगोचरत्वेनैव चक्षुःश्रोत्रप्राणानामगोचरत्वं सिद्धं तथाऽपि पञ्चप्रश्नानां प्रत्येकमुत्तरं दातुं वक्ष्यमाणं पर्यायत्रयमवगन्तव्यम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते व्याख्यातम् ॥ ५ ॥

यत्प्रसिद्धं चक्षुषश्चक्षुश्चक्षुषा रूपग्राहकेणेन्द्रियेण न पश्यति नावलोकयति येन चक्षुषश्चक्षुषा चक्षूंष्यक्षिणी पश्यत्यवगच्छति चक्षुषः सर्व-

---

१ ग, °ति अत्र त्व° । २ ग, °नासोऽवि° ।

कार्यकारणमित्यर्थः । चक्षुःश्रोत्रं क उ देवो युनक्तीतियोगस्य विभागेनाऽऽधस्योत्तरं दत्तम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते व्याख्यातम्॥६॥

यत्प्रसिद्धं श्रोत्रस्य श्रोत्रं श्रोत्रेण शब्दोपलब्धिसाधनेन न शृणोति नाधिगच्छति । येन श्रोत्रस्य श्रोत्रेण श्रोत्रं शब्दोपलब्धिकारणमिदमाकाशस्य प्रदेशविशेषात्मकं श्रुतमधिगतम् । स्वकार्यक्षमं कृतमित्यर्थः । चक्षुःश्रोत्रं क इत्यस्याविशिष्टस्यानेनोत्तरं दत्तम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते व्याख्यातम् ॥ ७ ॥

यत्प्रसिद्धं प्राणस्य प्राणरूपं प्राणेन पञ्चवृत्तिना न प्राणिति प्राणचेष्टां न करोति येन प्राणस्य प्राणेन प्राणः प्रसिद्धपञ्चवृत्तिः प्रणीयते प्रकर्षेण नीयते स्वचेष्टां कार्यत इत्यर्थः । अनेन केन प्राण इत्यादेरुत्तरं दत्तम् । श्रोत्रस्य श्रोत्रमित्यादिना तु सामान्यतः । अत्र तु विशेषत इति न पुनरुक्तम् । अथवा तदुत्तरं तत्रैव कण्ठतः । अत्र तु वागाद्यविषयत्वप्रतिपादनेनाऽर्थमिति न पुनरुक्तम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते व्याख्यातम् ॥ ८ ॥

इति श्रीशंकरानन्दभगवतः कृतौ केनोपनिषद्दीपिकायां प्रथमः खण्डः ॥ १ ॥

पूर्वं यथावत्स्थितमात्मस्वरूपं गुर्वाद्युपदिष्टमुपदिश्येदानीं शिष्यबुद्धिमनुसरन्नाह—यदि पक्षान्तरे मन्यसे वस्तुतो विद्यमानमपि × जानामि सुवेद सुष्ठु भवदादिभिरुक्तं ममाऽऽत्मस्वरूपं जानामि । इत्यनेन प्रकारेण यदि मन्यस इत्यन्वयः । तथा ब्रह्मतत्त्वं जानीष इत्याह—दहरमेवापि नूनम् । अपि संभावनायाम् । नास्त्येव भवतो ब्रह्मज्ञानम् । अथ च चेतनत्वाज्ज्ञानवानहमस्मीति संभावयसि तथाऽपि नूनं निश्चितं तद्विषयस्थाल्पत्वादल्पमेव न तु बृहत् । त्वं ज्ञानित्वाभिमानी वेत्थाल्पमेव जानीषे । किम् । ब्रह्मणो रूपं देशकालवस्तुपरिच्छेदशून्यस्य स्वरूपं दहरज्ञानत्वे हेतुर्यद्यस्मादस्य त्रिविधपरिच्छेदशून्यस्य त्वं कार्यकारणसंघाताभिमानी परिच्छिन्नो ज्ञानैकः । एवंभूतात्त्वत्तोऽन्यद्यत्प्रसिद्धं त्वया ज्ञेयं कार्यब्रह्मस्वरूपमस्य ब्रह्मणः सर्वपरिच्छेदशून्यस्य देवेष्विन्द्राग्न्यादिषु । अथ तु यस्मादस्य देवेषु यत्प्रसिद्धमस्यत्वं चेति

× इदं पदमधिकमिव भाति ।

---

१ ग. °धिकारणेन । २ ख. °शस्यं वि°।

भेदस्तस्मादेव मीमांस्यमेव विचारणीयमेव ते तव स्वयेत्यर्थः । एवमुक्तो मीमांसां कृत्वा शिष्य आह—मन्येऽवगच्छामि विदितमवगतं मयेति शेषः ॥ १ ॥

स्वयंविदि[त]त्वे हेतुमाह–नाहं मन्ये सुवेदेति नो न वेदेति वेद च । अहं सुवेदेति नैव मन्ये । यदि सम्यङ्न ज्ञातं तर्हि किं न ज्ञातमेवेत्यत आह–नो न वेदेति । तर्हि किं संदिग्धमित्यत आह–वेद च । जानाम्यपि चकाराज्जानन्नपि भेदबुद्धेरभावान्न जानामि । न सुवेदेत्यनेन ब्रह्मणोऽतिदुर्बोधत्वं दर्शितम् । नो न वेदेत्यनेन शास्त्रैकगम्यत्वमुक्तम् । वेदेत्यनेन संशयादिराहित्यमुक्तम् । चकारेण सर्वभेदभक्षकः साक्षात्कार उक्तः । अतिदुर्बोधशास्त्रैकगम्यासंदिग्धसर्वभेदशून्यब्रह्माहमस्मीत्यर्थः । यो मत्तोऽन्योऽपि नोऽस्माकं शिष्याणां मध्ये तन्मयोक्तं सुवेदेति न न वेदेत्यपि न वेद चेति वेद जानाति स तद्ब्रह्म श्रोत्रस्य श्रोत्रमित्यादिनोक्तं वेद जानाति यस्मादयमवगन्ता मदुक्तं वेद भवानेतमवगच्छति । नो न वेदेति वेद च न जानामीति न जानामीत्यपि न । चकार इतिनोकारयोरनुवृत्त्यर्थः । दर्शिता च तयोर्योजना । तस्माद्ब्रह्म वेदेत्यभिप्रायः ॥ २ ॥

ननु न जानामीति ज्ञानवता ज्ञेयं जानामीति ज्ञानवता चाज्ञेयं भवद्वाचो भङ्ग्या ब्रह्म सिध्यति न चैवं प्रामाणिकमित्यत आह–यस्य ब्रह्म विदुषोऽमतमनधिगतं कर्तृकर्मादिभावेन तस्य कर्तृकर्मादिभावानधिगतवतो मतमधिगतम् । इदानीं वैपरीत्यमाह–मतं कर्तृकर्मादिभावेनाधिगतं यस्य ब्रह्म विदुषो न वेद न जानाति स कर्तृकर्मादिभेदज्ञानवान् । तत्रैव हेतुमाह–यतोऽविज्ञातमनधिगतं विजानतां विविधज्ञातृज्ञानज्ञेयादिबुद्धिमतां देशकालवस्तुपरिच्छेदशून्यरूपत्वाद्ब्रह्मणस्ततः । विज्ञातं विशेषेण यथाविद्यमानस्वरूपेणाधिगतमविजानतां विविधज्ञात्रादिभेदबुद्धिरहितानाम् ॥ ३ ॥

अविजानतां विज्ञातं चेत्तर्हि सुषुप्तिमूर्छादौ सर्वोऽपि कृतकृत्यः स्यादित्यत आह—प्रतिबोधविदितं सर्वप्रत्ययसाक्षित्वेनावगतं मतं विज्ञातं न तु सर्वप्रत्ययोपरमे सुषुप्त्यादौ । ननु किमनेन ज्ञानेनेत्यत आह–अमृतत्वं हि विन्दन्त आत्मना हि यस्मादात्मनाऽऽत्मज्ञानेनामृतत्वमविद्यातत्कार्यादिमरण-

---

१ ग. स्वस्य विदितत्वे । २ ग. °ति । चेत्तर्हि । ३ ग. °ये तद्ब्र° । ४ ग. गमयतो ।

शून्यत्वं स्वयंप्रकाशमानन्दात्मस्वरूपमित्यर्थः । विन्दते लभते । हेर्हेत्वर्थस्याऽऽत्मनेति व्याख्यानम् । विन्दते वीर्यं सामर्थ्यमविद्यानिवृत्तिकारणं चरमसाक्षात्काररूपं लभते । उक्तवीर्यलाभादुक्तामृतत्वप्राप्तिः प्रसिद्धैवेत्याह- विद्ययाऽधिष्ठानयाथात्म्यसाक्षात्कारेण कर्मगन्धानपेक्षेण विन्दतेऽमृतमधिष्ठानविपरीतग्रहणतज्जदुःखरूपमरणकारणशून्यमविक्रियमधिष्ठानं लभते ॥ ४ ॥

ननु विद्या चेच्छरीरान्तर एव न त्वत्रैव सति शरीर इत्यत आह-इहास्मिन्नेवाधिकारिशरीरे चेद्यद्यवेदीज्ज्ञातवान् । अथ तदा सत्यं सच्चिदानन्दरसं ब्रह्मास्ति विद्यते न चेदिहावेदीदिहाधिकारिशरीरे यद्यहं ब्रह्मास्मीति शरीरे साक्षात्कारं न कृतवांस्तदा महत्यतिपौढा त्रिविधदुःखसंतानजननी विनष्टिर्विनाशरूपा । श्रुत्या सानुक्रोशमेतदुक्तम् । एतच्छरीरमन्तरेण समूलघोरसंसारविनाशकात्मज्ञानस्य दुर्लभत्वात्ततोऽस्मिन्सत्येव तदर्थं यत्न आस्थेयोऽन्यथा सततं संसारसागरे निमज्जनमेव स्यादिति । इदानीमात्मनः सर्वत्राहमस्मीत्यवलोकनं करणीयमित्येतदात्मज्ञानस्य संसारव्याध्यौषधस्य स्वरूपमाह सा । भूतेषु भूतेषु प्राणिषु । वीप्सा निखिलचतुर्विधप्राणिसंग्रहार्था । विचित्य वयं स्म इत्यधिगत्य धीरा बुद्धिमन्तो विद्वांसः । प्रेत्यास्माल्लोकादमृता भवन्ति व्याख्यातम् ॥ ५ ॥

इति श्रीशंकरानन्दभगवतः कृतौ केनोपनिषद्दीपिकायां द्वितीयः खण्डः ॥२॥

विशुद्धान्तःकरणैरेव ब्रह्मविद्ययैव सर्वातिशयवत्सर्वात्मभूतं ब्रह्म विज्ञेयं न त्वन्यथेत्येतदर्थमियमाख्यायिकाऽऽरभ्यते-ब्रह्म सत्यज्ञानानन्दादिलक्षणं ह किल देवेभ्यो देवानामनुग्रहार्थाय विजिग्ये विविधं देवानां लोकद्वयप्रतिकूलमसुरकुलं जितवत् । तस्य देवानुग्रहवृत्तस्य ह किल ब्रह्मणः सत्यज्ञानानन्दादिलक्षणस्य विजये विविधजयनिमित्तं देवा इन्द्राग्निवायुप्रभृतयोऽमहीयन्त पूजिता अभूवन् । तेऽविज्ञातब्रह्मप्रभावा ऐक्षन्त प्रत्यक्षं वक्ष्यमाणप्रकारेणेक्षणमकुर्वन् । तदीक्षणप्रकारमाह-अस्माकमेव कार्यकरणसंघाताभिमानिनामिन्द्राग्न्यादीनामेव न त्वन्यस्य कस्यचित् । अयमस्मत्प्रत्यक्षविषयो विजयो विवि-

---

१ ग. °र्थस्य व्या° । २ ग. र्थकार° ।

धोऽसुरपराभवलक्षण उत्कर्षः। अस्माकमेवायं व्याख्यातम्। महिमा महत्त्व-रूपः सर्वजन्तुभ्यः स्तुतिपूजादिलाभलक्षणः। इत्यनेन प्रकारेण ॥ १ ॥

तद्ब्रह्म देवानां विजयकृद्ध किलैषां देवानामज्ञानिनां गर्वारूढमभिप्रायं विजज्ञौ विशेषेण ज्ञातवत्तेभ्यस्तेषां गर्वारूढानां देवानामज्ञानिनामनुग्रहार्थं ह किल प्रादुर्बभूव किमपि रूपं धृत्वा नयनपथमागतं तद्ब्रह्म न व्यजानत देवा इदं तदिति विशेषेण न ज्ञातवन्तः। तदज्ञातमाह—किं विचारे। इदं प्रत्यक्षं यक्षं पूज्यमतिदिव्यरूपत्वात्। इत्यनेन प्रकारेण ॥ २ ॥

एवं संशयाविष्टहृदयास्ते गर्वाविष्टा देवा अग्निं देवानामग्रेसरं वह्निमब्रुवन्नुक्तवन्तः। तदुक्तिमाह—जातवेदो जातानि वेदांसि विविधानि ज्ञानानि सर्व-वेदात्मकानि यस्मादग्नेः स जातवेदास्तस्य संबोधनं हे जातवेद एतदस्माभि-रुच्यमानं पुरःस्थितं विजानीहि विशेषेणावगच्छ। किमेतद्यक्षमेतत्पुरतः स्थितं यक्षं किं देवादिषु कतमदित्यर्थः। इत्यनेन प्रकारेण। एवं तैरुक्तः स तथा देवोक्ताङ्गीकारे। यद्भवद्भिरुच्यते तत्करिष्यामीत्यर्थः। इत्यनेन प्रका-रेणोक्त्वेति शेषः ॥ ३ ॥

तत्पुरःस्थितं यक्षमवगन्तुमभ्यद्रवत्संमुखत्वेन समीपं गतवान्। तद्यक्षं तं समीपं प्राप्तं जिज्ञासुं सावज्ञमभ्यवददाभिमुख्येनोक्तवत्। तदुक्तिमाह—कः प्रश्ने। मत्समीपमागतस्त्वमसि भवासि। इत्यनेन प्रकारेण। एवं पृष्टः स आह अग्निरग्निनामा वै प्रसिद्धः सर्वेषामहं त्वत्समीपमागतोऽस्मि भवामि। इत्यनेन प्रकारेणाब्रवीदुक्तवान्। विशेषनाम्ना पुनरात्मानमाह—जातवेदा वा अहमस्मीति स्पष्टम् ॥ ४ ॥

एवमुक्ते पुनः सावज्ञं तद्यक्षमाह—तस्मिन्नुक्तनाम्नि त्वयि मत्पुरतो वर्त-माने वराके। किमाक्षेपे। न किमपीत्यर्थः। वीर्यं सामर्थ्यमित्यनेन प्रकारेण। एवमाक्षिप्तोऽपि स स्वगर्ववशात्तदीयं प्रश्नं मन्वान आह—अपि संभावना-याम्। इदं शुष्कमार्द्रं च जगत्सर्वं निखिलं दहेयं दहनं कुर्याम्। अत्युक्ति-द्योतनार्थं सर्वशब्दार्थमाह—यत्प्रसिद्धमेदं स्थावरजङ्गमात्मकं मूर्तं पृथिव्यां ब्रह्माण्डकटाहभुवि। इत्यनेन प्रकारेण ॥ ५ ॥

तस्मै तस्याग्नेरनुग्रहार्थं तृणमत्यल्पं शुष्कं स्थावररूपं निदधौ नितरां पुरतः स्थापितवत्। तत्स्थापयित्वेदं जगौ। एतच्छुष्कं तृणं मया पुरतः स्थापितं दह भस्मी कुरु। इत्यनेन प्रकारेण यक्षेणोक्तोऽग्निः पुरतः स्थितं तृणमुपमे-

वायव सभीपं प्रकर्षेण गतवान्सर्वजवेन स्वकीयेन सर्वजवेन तद्यक्षस्थापितं शुष्कं तृणं न शशाक दग्धुं भस्मीकर्तुं शक्तो न बभूव । सोऽग्निर्जातवेदा अपगतगर्वस्तत एव शुष्कतृणादहनादेव निमित्तात्प्राप्तलज्जो निवर्तते झटित्येव देवान्गन्तुं तस्मान्निवृत्तिं चकार । आगत्य च देवानुवाच । तदुक्तिमाह—नैतदशकं विज्ञातुं यदेतद्यक्षमेतत्पुरतः स्थितं यत्प्रसिद्धं सामान्यतस्तदेवादिति विशेषतो विज्ञातुं शक्तो नाभवम् । इत्यनेन प्रकारेण ॥ ६ ॥

अथाग्नेर्निवृत्तस्य वाक्यश्रवणानन्तरं वायुं सर्वजगतः प्राणं प्रभञ्जनमब्रुवन्नुक्तवन्तः । वायो हे वायो । एतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत्कोऽसीति । वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति । तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वमाददीय यदिदं पृथिव्यामिति तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकाऽऽदातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति । वायुर्वायुनामा । इदं सामान्यम् । विशेषरूपं त्वाह—मातरिश्वा मातर्यन्तरिक्षे श्वसि(या)मि गच्छामीति मातरिश्वनामा । आददीयाऽऽदायान्तरिक्षे गमनं कुर्याम् । आदत्स्वाऽऽदायैतस्या भूमेरस्य तृणस्य च कस्याचिदत्यल्पमप्यन्तरं कुरु । आदातुं सर्वतः स्वीकर्तुं व्याख्यातमन्यत् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

अथ निवृत्तस्य विगतगर्वस्य वायोर्वचनश्रवणानन्तरमिन्द्रं परमैश्वर्यसंपन्नं त्रिलोकनाथमब्रुवन्नुक्तवन्तः । मघवन्भो इन्द्र । एतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत् । व्याख्यातम् । तस्मात्स्वसमीपप्राप्तादिन्द्रात्तिरोदधेऽन्तर्धानं चकार । शुद्धान्तःकरणैरपि स्वस्वकर्मभिरनवगम्यं दर्शयितुमिन्द्रो हि ब्रह्मसमीपं प्राप्तः करग्रहणावसरे तन्न दृष्टवानित्यर्थः ॥ ११ ॥

स विस्मयमना इन्द्रस्तस्मिन्नेव यत्र यक्षं स्थितं तत्रैव न त्वन्यत्राऽऽकाशेऽवकाशे तदेव यक्षं ध्यायंस्तस्थाविति शेषः । एवं स्थिते मघोनि विशुद्धान्तःकरणे यक्षदर्शनोत्सुके तदन्तर्धानादपगतान्तर्धानाद्यैश्वर्याभिमाने संपन्नाधिकारिगुणे स्त्री प्रादुर्बभूव । स तां स्त्रियं ब्रह्मविद्यां मूर्तिमतीं ददर्शेति शेषः । ततो निरीक्ष्य तामाजगाम यक्षस्य वार्तां प्रष्टुमागतवान् । आगत्य च बहुशोभमानां सकलाविद्यापिशाचीवैलक्षण्ये-

नाधिककान्तिमतीमुमां सकलसंसारवृक्षोच्छेदकत्वेनोत्कृष्टां प्रभां ब्रह्मविद्यामित्यर्थः । हैमवतीं हिमरूपः सर्वदा शीतलः स्वयंप्रकाशमान आनन्दात्माऽन्तर्हितयक्षस्वरूपः स यस्य नित्यमस्त्युपनिषद्विभागस्य स हिमवांस्तस्येयं दुहिता हैमवती ताम् । अथवोमा भगवतः पिनाकपाणेः प्राणप्रिया सा हि कान्दिशीकान्भृशं विषण्णाञ्जन्तून्मातेव नानारूपैराश्वासयति । तदुचितमिन्द्रस्यापि तादृशस्य तस्या दर्शनम् । सा च हिमवतो गिरिराजस्य दुहिता प्रसिद्धा ताम् । अथवा हेम कनकं तस्याऽऽभरणानि हैमानि कटकमुकुटादीनि तानि यस्याः सन्ति सा हैमवती तां प्रसिद्धां विदुषामुमां ह किलोवाचोक्तवान् । तदुक्तिमाह—किमेतद्यक्षमिति व्याख्यातम् ॥ १२ ॥

इति श्रीशंकरानन्दभगवतः कृतौ केनोपनिषद्दीपिकायां
तृतीयः खण्डः ॥ ३ ॥

सा तं ब्रह्म बृहद्देशकालवस्तुपरिच्छेदशून्यं भवतां विजयकारणमित्यनेन प्रकारेण ह किलोवाचोक्तवती । ब्रह्मेति नामधेयमुक्त्वा तस्य महिमानमप्याह—ब्रह्मण उक्तस्य वै प्रसिद्धस्यैतद्विजये महीयध्वं विजयनिमित्तमेतन्महीयध्वमिदं भवतां महत्त्वं येन लोके स्तुतिपूजादिमन्त एतादृशाः स्युरित्यनेन प्रकारेण । शिक्षा चेयं ब्रह्मणो विजये सति यूयं महीयध्वं मा स्वातन्त्र्याभिमानं कुरुतेत्यर्थः । एवमुमयोक्त इन्द्रस्ततस्तस्या उमाया वचनाद्ध किलैव तत एव न त्वन्यस्माद्विदांचकार ज्ञातवान् । तज्ज्ञानप्रकारमाह—ब्रह्म यद्यक्षमन्तर्हितं तद्ब्रह्मेत्यनेन प्रकारेण ॥ १ ॥

तस्माद्यतो वाग्वह्नी संवादं कृतवन्तौ ब्रह्मणेन्द्रश्चोमावचनेन निश्चिकाय ततो वै प्रसिद्धा एते [देवा अ]ग्नीन्द्रवायवोऽतितरामिवाधिकमतिक्रम्येव वर्तन्तेऽन्यानग्नीन्द्रवायुव्यतिरिक्तान्देवांश्चन्द्रवरुणादीन् । एत इत्युक्तान्नामत आह—यद्यः प्रसिद्धोऽग्निर्वायुरिन्द्रः प्रसिद्धानि त्रीण्यपि नामानि त्रयाणां तेऽग्नीन्द्रवायवः सर्वेभ्योऽत्यधिका हि यस्मादेनद्यक्षरूपमात्मानं नेदिष्ठमतिशयेन समीपं पस्पृशुः स्पर्शनं चक्रुर्ब्रह्मणः समीपं गता इत्यर्थः । तेऽग्नीन्द्रवायवः सर्वदेवाधिका हि यस्मादेनदेवानां पुरतः स्थितं यक्षं ब्रह्म प्रथमः

१ ग. °दुषीमु° ।

प्रथमा देवेभ्यो मुख्या इत्यर्थः । विदांचकार विदांचक्रुः । छत्रिन्यायं दर्शयितुमेकवचनेन निर्देशः । तज्ज्ञानानुकरणं ब्रह्मेति स्पष्टम् ॥ २ ॥

इदानीं छत्रिन्यायं विवृणोति—तस्माद्यतोऽग्नीन्द्रवायुषु ब्रह्मसमीपगामिष्विन्द्र एवोमोपदेशाद्ब्रह्म ज्ञातवान्, ततो वै प्रसिद्ध इन्द्रः परमैश्वर्यसंपन्नोऽतितरामिवातिशयेनातिक्रामत्यन्यान्स्वव्यतिरिक्तान्देवानग्निवायुप्रमुखान् । स इन्द्रः । ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदांचकार ब्रह्मेति स्पष्टम् ॥ ३ ॥

तस्येन्द्रेणावगतस्य ब्रह्मण एव वक्ष्यमाण आदेश उपदेशः । यत्प्रसिद्धं ब्रह्मरूपं शास्त्रेषु स्वयंप्रकाशमेतद्बुद्धेर्द्रष्टृ वक्ष्यमाणस्वरूपं विद्युतः प्रसिद्धाद्यास्तडितः । व्यद्युतद्विशेषेण द्योतनमकरोत् । आ३ । आकारप्लुतिराश्चर्यार्था । आश्चर्यं तेजोधातुविलक्षणमपि ब्रह्म विद्युतः सकाशाद्विस्पष्टं प्रकाशं कृतवदिव स्वयंप्रकाशमित्यर्थः । इत्यनेन प्रकारेणाऽऽदेश इत्यन्वयः । यथा स्वयं विद्युतोऽपि विशेषप्रकाशवदिव । इदित्थं चक्षुरादीनि सान्तःकरणानि न्यमीमिषन्निमेषोपलक्षितं स्वस्वव्यापारं कारितवत् । आ३ । आकारप्लुतिः पूर्ववदाश्चर्यं सर्वक्रियाहीनोऽपि सर्वदेवनिष्पाद्यां क्रियां कारितवानिवेत्यनेन प्रकारेणाऽऽदेश इत्यन्वयः । अधिदैवतं हिरण्यगर्भमधिकृत्येति द्वयाभ्यां वाक्याभ्यामुपदिष्ट आदेशोऽधिदैवतम् ॥ ४ ॥

अथाधिदैवतादेशकथनानन्तरमध्यात्मं आत्मानमधिकारिशरीरतुरीकृत्योच्यमान उपदेशोऽध्यात्मं यत्प्रसिद्धमधिदैवं विद्युतोऽपि विशेषप्रकाशवदिवैतद्बुद्धेर्द्रष्टृ सर्वगतं प्रति गच्छतीव च यातीव चकारात्स्पृशतीव च मनोऽन्तःकरणमनेन चान्तःकरणेनैवैतद्विद्युतोऽपि विशेषप्रकाशवदिव ब्रह्मोपस्मरत्यहं ब्रह्मास्मीति सामीप्येन शास्त्रोक्तं स्मरत्यभीक्ष्णं निरन्तरं संकल्प इदं ब्रह्माहं साक्षात्करोमीत्येवंरूपोऽभिलाषः सोऽप्यनेनेत्यभिप्रायः ॥ ५ ॥

तदुक्तं ब्रह्म ह किल तद्वनं नाम तस्य तस्य प्राणिजातस्य वननीयं संभजनीयमेतदेव नामधेयम् । तस्येदानीं नामानुगुणोपासनमाह—तद्वनं नामधेयमित्यनेन प्रकारेण तदुपासितव्यं विजातीयप्रत्ययशून्येन सजातीयप्रत्ययप्रवाहेण साक्षात्कर्तव्यम् । इदानीं गुणोपासनस्य फलमाह—स उपासकलक्षणसंपन्नो यः कश्चनैतत्स्वयंप्रकाशं सर्वव्यापारनिमित्तं मनःसंकल्प-

---

१ ग. °डितस्तत्स्वयंप्रकाशं सर्वव्यापारनिमित्तं मनः संकल्पस्मरणगमनेषु कारणं ब्रह्म आ ३ आश्च° । २ ग. °णमिव ब्र° । ३ ग. °शाद्विशिष्टं ।

स्मरणगमनेषु कारणं ब्रह्म। एवमुक्तेन प्रकारेण तद्वनं नामधेयमिति वेद जानात्युपास्त इत्यर्थः। अभिहैनं सर्वाणि भूतानि गच्छ*न्ति ह किलैनं तद्वन(नं)नामोपासकं निखिलानि स्थावरजंगमानि भूतानि दर्शनस्पर्शनादिनाऽभिगच्छन्ति संगच्छन्ति संवाञ्छन्ति सर्वत इच्छां कुर्वन्ति ॥ ६ ॥

इदानीमाख्यायिकां परित्यज्य पुनः शिष्यप्रश्नमवतारयति--उपनिषदं ब्रह्मविद्यां विद्यया विन्दतेऽमृतमिति भवतैवोक्तं भो हे गुरो ब्रूहि कथय किमु ब्रह्मविद्याऽऽहोस्विदन्याऽपीति प्रश्नार्थः। इत्यनेन प्रकारेण। ब्रह्मविद्या चेदुक्तैव तस्याः साधनानि चेत्तपआदीनि वक्ष्यामीत्यनेनाभिप्रायेण गुरुराह-उक्ता श्रोत्रस्य श्रोत्रमित्यारभ्याभीक्ष्णं संकल्प इत्यन्तेन गुणोपासनासहितेन वाक्यसंदर्भेण कथिता। ते तुभ्यम्। उपनिषत्, तादात्म्यलक्षणेन सामीप्येन नितरां ब्रह्म गमयित्वाऽहंममादिग्रन्थीञ्शिथिलीकृत्याविद्यां ससंस्कारां सादयति विनाशयतीत्युपनिषद्ब्रह्मविद्या। ब्राह्मीं वाव ब्रह्मणा सत्यज्ञानलक्षणेन संबद्धा ब्राह्मी तामेव न तु तत्संबद्धां तपआदिकाम्। अत उपनिषदं व्याख्यातम्। अब्रूमोक्तवन्तः। अतोऽन्यां कथयिष्याम इत्यभिप्रायः ॥ ७ ॥

तस्यै, उक्तायै ब्राह्म्या उपनिषद उत्पत्त्यर्थम्। तपस्तपःशब्दाभिधेयं स्वधर्मानुगुणशरीरसंतापकरं मनइन्द्रियैकाग्र्यादिषु। दम इन्द्रियनिग्रहः। कर्म स्ववर्णाश्रमोचितं श्रौतं स्मार्तं चेत्यादिकमन्यदपि शमब्रह्मचर्यादि। इदानीमस्या उपनिषदः स ब्राह्म्युपनिषदः (?) उपासनमाह—प्रतिष्ठाः प्रतितिष्ठन्त्येतैरिति प्रतिष्ठा इयं तपआद्युपनिषत्कामधेनुर्ब्रह्मविद्योपनिषद्वत्सा चतुष्पादित्यर्थः। ततः प्रतिष्ठाः पादाः। इदानीं तान्विशेषत आह—वेदा ऋगाद्याश्चत्वारः। वेदानां षड(सर्वा)ङ्गानि(णि) विद्याकामधेनोः परिशिष्टानि निखिलाङ्गानि। सत्यं कालत्रयेऽपि बाधशून्यं ब्रह्म भूरित्येतस्या गोरायतनं प्रचारोपवेशनादिस्थलम् ॥ ८ ॥

यो मुमुक्षुर्ब्रह्मविद्यार्थी तपआदिसंपादनोद्यतो वै प्रसिद्धोऽनुत्पन्नब्रह्मसाक्षात्कारः श्रद्धालुरेतां तपआदिकामधेनुं ब्रह्मविद्यावत्सामेवं वेदपादादिरूपेण

---

* इद पदमधिकमिव भाति।

---

१ क. बोक्तां भो।

वेद जानात्युपास्त इत्यर्थः । सोऽवहत्य स्वस्मादपच्छेदपुरःसरं विनाश्य पाप्मानं ब्रह्मविद्योत्पत्तिप्रतिबन्धहेतुमनन्ते विनाशरहिते स्वर्गे स्वर्गवासिभिर्गेय आनन्दात्मनि लोके स्वयंप्रकाशे ज्येये ज्यायसि सर्वस्मादभ्यधिके ब्रह्मणीत्यर्थः । प्रतितिष्ठति संजातचरमसाक्षात्कारः प्रकर्षेण पुनरुत्थानशून्यत्वेनावस्थानं करोति । प्रतितिष्ठति व्याख्यातम् । पदाभ्यास उपनिषत्समाप्त्यर्थः ॥ ९ ॥

इति श्रीशंकरानन्दभगवतः कृतौ केनोपनिषद्दीपिकायां चतुर्थः खण्डः ॥ ४ ॥

समाप्तेयं शंकरानन्दकृता तलवकारोपनिषदपरपर्यायकेनोपनिषद्दीपिका ॥

ॐ तत्सद्ब्रह्मणे नमः ।

नारायणविरचिता केनोपनिषद्दीपिका ।

—:⊙:—

केनेषितोपनिषदि खण्डाश्चत्वार ईप्सिताः ।
क्षुद्रग्रन्थसमाहारे सा द्वात्रिंशत्तमी मता ॥

तलवकारशाखा सामवेदे नवाध्याय्याम् । तत्र प्राक्कर्माण्युक्तानि ततः समस्तकर्माश्रयस्य प्राणस्योपासनानि ततः कर्माङ्गसामोपासनानि ततो गायत्रसामविषयं दर्शनं वंशान्तमुक्तमष्टभिः । ततस्तैः शुद्धसत्त्वं प्रति केनेषितमित्याद्या ब्रह्मविषयोपनिषन्नवमाध्याय आरभ्यते । दृष्टादृष्टार्थेभ्यो बाह्यसाधनेभ्यो विरक्तस्य प्रत्यगात्मविषया जिज्ञासेयम् । केनेषितमित्यादि । शिष्याचार्य[प्रश्न]प्रतिवचनरूपेण कथनं सुखप्रतिपत्त्यर्थं केवलतर्कागम्यत्वदर्शनार्थं च । केन कर्त्रेषितमिष्टमभिप्रेतं सत्कस्येच्छामात्रेण मनः पतति स्वविषयं प्रति गच्छति । इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासंभवादिच्छार्थस्यैतद्रूपम् । इडागमश्छान्दसः । तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमिति । न यथाप्रसिद्धमेव कार्यकारणसंघातस्य प्रेरयितृत्वं किंतु संघातव्यतिरिक्तस्य स्वतन्त्रस्येच्छामात्रेण मनआदिप्रेरयितृत्वमित्यस्यार्थस्य प्रदर्शनार्थं केनेषितं प्रेषितमिति विशेषणद्वयम् । ईश्वरविषयोऽयं प्रश्नः ।

यदुक्तम्—ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ इति ।

प्रवृत्तिलिङ्गाच्च विशेषार्थः प्रश्न उपपन्नः । रथादीनां हि चेतनावदधिष्ठितानां प्रवृत्तिर्दृष्टा तद्धि लिङ्गं चेतनावतोऽधिष्ठातुरस्तित्वे । मनआदीनि चेतनावदधिष्ठितानि करणत्वाद्वासीवादिति प्रयोगः । मनुतेऽनेनेति मनोऽन्तःकरणम् । इषितं प्रेषितमित्युपमार्थे न त्वनयोरर्थाविह संभवतः । नहि शिष्यानिव मनआदीनि विषयेभ्यः प्रेरयत्यात्मा । विविक्तनित्यचित्स्वरूपमात्रतया तु निमित्तमात्रं प्रवृत्तौ । प्राण इति नासिक्यः । प्रकरणात् । केन युक्तो नियुक्तः प्रेरितः सन्प्रैति गच्छति स्वव्यापारं प्रति । प्रथम आद्यः । तत्प्रवृत्तिपूर्वकत्वात्सर्वेन्द्रियप्रवृत्तीनाम् । चक्षुःक्रिया हि सर्वेषां प्राणनिमित्तैव । तेन प्राणस्य प्राथम्यम् ।

स्वतस्त्वन्द्रियाणां विषयावभासकत्वमात्रं न चलिक्रियारूपा प्रवृत्तिः । सा तु प्राणनिमित्तैव तेषाम् । केन देवेनेषितामिष्टां कस्येच्छामात्रेण वाचं शब्दलक्षणां वदन्ति लौकिकवाचा वदनं किंनिमित्तं प्राणिनाम् । चक्षुः श्रोत्रमिन्द्रियम् । क उ प्रश्ने । देवो युनक्ति प्रेरयति । करणानामधिष्ठाता चेतनावान्यः स किंलक्षण इत्यर्थः ॥ १ ॥

प्रतिवचनं श्रोत्रस्य श्रोत्रमित्यादि । अयमत्र पदार्थः । श्रोत्रे तावत्स्वविषयव्यञ्जनसमर्थे(सामर्थ्ये) दृष्टम् । तच्च सामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्मज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति नासतीति । " आत्मनैवायं ज्योतिषाऽऽस्ते शेते " " तस्य भासा " " येन सूर्यस्तपति " इत्यादिश्रुतेः श्रोत्राद्येव सर्वस्याऽऽत्मभूतं चेतनमिति प्रसिद्धम् । तदिह निवर्त्यते । अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तमिति प्रतिवचनम् । शब्दार्थश्चोपपन्नः । कथं शृणोत्यनेनेति श्रोत्रं तस्य शब्दावभासकत्वं श्रोत्रतत्त्वम् । ततश्च शब्दोपलब्धृरूपतयाऽवभासकत्वं न स्वतः श्रोत्रस्याचिद्रूपत्वात् । आत्मनश्च चिद्रूपत्वाद्यच्छ्रोत्रस्योपलब्धृत्वेनावभासकत्वं तदात्मनिमित्तमिति श्रोत्रात्मेत्युच्यते । यथोदकस्यौष्ण्यमग्निनिमित्तमिति दग्धुरप्युदकस्य दग्धाऽग्निरुच्यते । उदकप्यग्निसंयोगादग्निरुच्यते । तद्वत् । अनित्यं यस्यान्यसंयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि । उदकस्येव दग्धृत्वम् । तत्र हि तन्नित्यं यत्र नित्यमुपलब्धृत्वमग्नाविवौष्ण्यं स नित्योपलब्धिस्वरूपत्वाद्दग्धेवोपलब्धोच्यते । श्रोत्रादिषु श्रोत्रत्वाद्युपलब्धिरनित्या । नित्या चाऽऽत्मनि । अतः श्रोत्रस्य श्रोत्रमित्याद्यक्षरार्थानुगमादुपपन्नं निर्विशेषस्योपलब्धिरूपस्याऽऽत्मनो मनआदिप्रवृत्तिनिमित्तत्वम् । मनसोऽन्तःकरणस्य मनो न ह्यन्तःकरणमन्तरेण चैतन्यज्योतिषा दीपितं स्वविषयसंकल्पाध्यवसानादिसमर्थं स्यात् । तस्मान्मनसोऽपि मनः । बुद्ध्यादित्रयमप्यन्तर्भाव्य मनस इति निर्देशः । यद्वाचो ह वाचम् । यच्छब्दो यस्मादर्थः श्रोत्रादिभिः सर्वैः संबध्यते । यस्माच्छ्रोत्रस्य श्रोत्रं यस्मान्मनसो मनो यस्माद्वाचो वाक्तस्मात्तज्ज्ञात्वा मनआद्यतिमुच्योज्झित्वाऽमृता भवन्तीत्यन्वयः । वाचमिति द्वितीया प्रथमार्थे । स उ प्राण इत्यनुरोधात् । पृष्टस्याऽऽत्मनः प्रधानविभक्त्या प्रथमया निर्देष्टुमुचितत्वाच्च । स यस्त्वया पृष्टः स प्राणाख्यस्य वृत्तिविशेषस्य प्राणः । तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम् । न ह्यात्मनाऽनधिष्ठितस्य प्राणनमुपपत्तिमत् । "को ह्येवान्या-

त्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति" इत्यादिश्रुतिभ्यः । ननु श्रोत्रादीन्द्रियप्रस्तावाद्घ्राणप्राणस्य ग्रहणं युक्तं न त्वविशेषेण । सत्यम् । सामान्यग्रहणे तस्याप्यन्तर्भावाददोषः । सर्वस्यैव हि करणकलापस्य यदर्थमयुक्ता प्रवृत्तिस्तद्ब्रह्मेति प्रकरणार्थो विवक्षितः । तथा चक्षुषो रूपप्रकाशकस्य यद्ग्रहणसामर्थ्यं तदात्मचैतन्याधिष्ठितस्यैव । अतश्चक्षुषश्चक्षुः । प्रेष्टुः पृष्टस्यार्थस्य ज्ञातुमिष्टत्वादत्र तज्ज्ञत्वेति शेषः । अतिमुच्योज्झित्वा सामर्थ्याच्छ्रोत्रादिकरणकलापम् । यत्कृतः संसारस्तं श्रोत्रादावात्मभावं त्यक्त्वा श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्माऽऽत्मेति ज्ञात्वाऽत एव ते धीरा धीमन्तो न हि विशिष्टधीमत्त्वमन्तरेण श्रौत्राद्यात्मभावः शक्यः परित्युक्तम् । प्रेत्य व्यावृत्त्यास्माल्लोकान्ममाहंभावलक्षणात्त्यक्तसर्वैषणा भूत्वेत्यर्थः । अमृता अमरणधर्माणो भवन्ति । अथवाऽतिमुच्येत्यनेनैवैषणात्यागस्य सिद्धत्वादस्माल्लोकात्प्रेत्यास्माच्छरीरादपेत्य मृत्वेत्यर्थः ॥ २ ॥

यस्माच्छ्रोत्रोद्यात्मभूतं ब्रह्मातो न तत्र तस्मिन्ब्रह्मणि चक्षुर्गच्छति । स्वात्मनि गमनासंभवात् । अत एव न वाग्गच्छति । यथाऽग्निर्दाहकः प्रकाशकश्चापि सन्न ह्यात्मानं दहति प्रकाशयति वा तद्वत् । श्रोत्रस्य श्रोत्रमित्यादिनोक्तेऽप्यात्मतत्त्वे सूक्ष्मत्वेनाप्रतिपन्नत्वात्पुनः पर्यनुयुयुक्षा वाक्चक्षुषोः सर्वेन्द्रियार्थत्वाच्चक्षुरादीनि तत्र स्वात्मभूते न ज्ञानमुत्पादयन्तीत्यर्थः । तर्हि सुखादिवदन्तःकरणेन गृह्यतामत आह—नो मनो गच्छति । अतो न विद्मो बाह्यकरणैर्न विजानीमोऽन्तःकरणेन सुखादिवद्यथैतन्मनआदिकरणजातमनुशिष्यादुपदिशेद्ब्रह्म । यद्धि करणगोचरं तदन्यस्मा उपदेष्टुं शक्यं जातिगुणक्रियादिविशेषणैः । न तु जात्यादिविशेषणवद्ब्रह्म; तस्माद्विषमं शिष्यानुपदेशेन प्रत्याययितुं तस्मादुपदेशे तदर्थग्रहणे च यत्नातिशयः कर्तव्य इति भावः । अथवा श्रोत्रादीनां श्रोत्रादिलक्षणं ब्रह्म विशेषेण दर्शयेत्युक्त आह—न तत्र चक्षुरित्यादि । पूर्ववत्सर्वमत्र तु विशेषः । यथैतदनुशिष्यात्मतिपादयेदन्योऽपि शिष्यमितोऽन्यविधिनेति भावः । सर्वथा ब्रह्म बोधयेत्युक्ते यद्यपि प्रत्यक्षादिभिर्न शक्यते प्रत्याययितुमागमेन तु शक्यत इत्याशयेनाऽऽह—अन्यदेव तद्विदितादथो अविदितादधीति । विदितं व्यक्तं व्याकृतं ततोऽन्यदविदितमव्याकृतमविद्या ततोऽप्यधुपरि लक्षणयाऽन्यदित्यर्थः । यद्धि यस्मादुपरि

भवति तत्ततोऽन्यदिति प्रसिद्धम् । यद्विदितं तदल्पं मर्त्यं दुःखात्मकं चेति हेयम् । अविदितमुपादेयं कार्यार्थं हि कारणमुपादीयते । तेन हेयोपादेयाभ्यामन्यद्ब्रह्म । एतेन स्वात्मव्यतिरिक्तब्रह्मविषया या जिज्ञासा सा निवर्तिता भवति । न हि स्वात्मा हेयो नाप्युपादेयोऽन्यद्धन्येनोपादीयते न तु स्वयमेव स्वयं हीयते वोपादीयते वा । तेन स्वात्मैव ब्रह्मेत्युपदिष्टम् । इति शुश्रुमेति । ब्रह्मैवमाचार्योपदेशपरम्परयैवाधिगन्तव्यं न तर्कतः प्रवचनमेधावहुश्रुततपोयज्ञादिभ्यश्चेत्येवं शुश्रुम श्रुतवन्तो वयं पूर्वेषामाचार्याणां वचनम् । य आचार्या नोऽस्मभ्यं तद्ब्रह्म व्याचचक्षिरे विस्पष्टं कथितवन्तः ॥ २ ॥

अन्यदेवेत्यनेनाऽऽत्मा ब्रह्मेति प्रतिपादिते शङ्का स्यात् । कथमात्मा शरीरी ब्रह्म ततोऽन्य उपास्यो विष्णुरीश्वर इन्द्रः प्राणो वा ब्रह्म भवितुमर्हतीति न त्वात्मा लोकप्रत्यय विरोधादिति तामपनेतुमाह—यद्वाचेति । यच्चैतन्यमात्रं स्वसत्ताकं वाचा वागिति जिह्वमूलादिस्वष्टसु स्थानेषु विषक्तमाश्रेयं वर्णानामभिव्यञ्जकं करणं वर्णार्थार्थसंकेतपरिच्छिन्ना एतावन्त एवं क्रमप्रयुक्ता इत्येवं तदभिव्यङ्ग्यः शब्दः पदं वाक्यं वागित्युच्यते । " अकारो वै सर्वा वाक्सैषा स्वरस्पर्शान्तःस्थोष्मभिर्व्यज्यमाना वाङ्नानारूपा भवति " इति श्रुतेः । मितममितं स्वरः सत्यानृते एव विकारो यस्यास्तस्या वाचा पदत्वेन परिच्छिन्नया करणवत्याऽनभ्युदितमप्रकाशितम् । येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वागभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते सा हि वक्तुरुक्तिरूपा नित्या चैतन्यरूपा "न हि वक्तुर्वाचो विपरिलोपो विद्यते" इति श्रुतेः तदेवाऽऽत्मस्वरूपं ब्रह्म निरतिशयं भूमारूपं बृहत्त्वाद्ब्रह्मेति विद्धि जानीहि त्वम् । चक्षुश्चश्चक्षुरित्यादिश्रौतव्यवहारान्व्युदस्याऽऽत्मानमेव निर्विशेषं ब्रह्म विद्धीत्येवशब्दार्थः । नेदं ब्रह्म यदिदमुपाधिभेदविशिष्टमनात्मेश्वराद्युपासतेऽध्यापयन्ति । उक्तं हीश्वरेण वसिष्ठं प्रति—

शृणु ब्रह्मविदां श्रेष्ठ देवार्चनमनुत्तमम् ।
न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः ॥
न देवो देवरूपो हि न देवश्चित्तरूपकः ।
अकृत्रिममनाद्यन्तं देवनं देव उच्यते ॥
आकारादिपरिच्छिन्ने मिते वस्तुनि तत्कृतः ।
अकृत्रिममनाद्यन्तं देवनं चिच्छिवं विदुः ॥ इति ।

अज्ञातशिवतत्त्वानामाकाराद्यर्चनं कृतम् ।
योजनाध्वन्यशक्तस्य क्रोशाध्वा परिकल्पते ॥ इति च ।

तत्र पूजाविधिरप्युक्तः—

बोधः साम्यं शम इति पुष्पाण्यस्याणि तत्र च ।
शिवं चिन्मात्रममलं पूज्यं पूजाविदो विदुः ॥ इति ।

तदेव विद्धीत्युक्तेऽपि नेदं ब्रह्मेत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते नियमार्थमन्यब्रह्मबुद्धिपरिसंख्यानार्थं च ॥ ४ ॥

अन्यदेव तदिति ब्राह्मणोक्तार्थो यद्वाचेत्यादिमन्त्रे दृढी क्रियते—यन्मनसेति । कामादिवृत्तिमन्मनस्तेन यच्चैतन्यज्योतिर्मनसोऽवभासकं न मनुते न संकल्पयति नापि निश्चिनोति मनसोऽवभासकत्वेन नियन्तृत्वात्सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्ततेऽन्तःकरणम् । अन्तःस्थेन हि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यं तेन सर्ववृत्तिकं मनो येन ब्रह्मणा मतं विषयीकृतं व्याप्तमाहुः कथयन्ति ब्रह्मविदः । तस्माच्चैतन्यं मनस आत्मानं प्रत्यक्चेतयितारं त्वं ब्रह्म विद्धि ॥ ५ ॥

न पश्यति न विषयी करोति येनान्तःकरणवृत्तिसंयुक्तेन चक्षूंषि तद्वृत्तीः पश्यति चैतन्यात्मज्योतिषा विषयी करोति व्याप्नोति लोकः ॥ ६ ॥

यच्छ्रोत्रेण दिग्देवताधिष्ठितेनाऽऽकाशकार्येण मनोवृत्तिसंयुक्तेन न विषयी करोति लोकः । यच्चैतन्यात्मज्योतिषा च श्रोत्रं श्रुतं विषयीकृतं तदेव ॥ ७ ॥

यत्प्राणेन पार्थिवेन नासापुटस्थेनान्तःकरणप्राणवृत्तिभ्यां सहितेन न प्राणिति गन्धवन्न विषयी करोति लोकः । येन चैतन्यात्मज्योतिषाऽवभास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते तदेव ॥ ८ ॥

इति नारायणविरचितायां केनोपनिषद्दीपिकायां प्रथमः खण्डः ॥ १ ॥

एवं हेयोपादेयविपरीतस्वभावमात्मा ब्रह्मेति प्रत्यायितः शिष्योऽहमेव ब्रह्मेति सुष्ठु वेदाहं मामिति गृह्णीयादित्याशङ्क्याऽऽचार्यः शिष्यबुद्धिविचालनार्थमाह-यदिति । अहं सुष्ठु वेदेति चेन्मन्यसे नैतद्युक्तं सर्वस्य हि वेदितुरात्मा ब्रह्म नहि वेदिता वेदितुर्वेदितुं शक्योऽग्निरिव दग्धुमग्नेः । न चान्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत्स्याद्ब्रह्म " नान्यदतोऽस्ति विज्ञातृ" इत्यन्यस्य विज्ञातुर्निषेधात् । तस्मात्सुष्ठु वेदाहं ब्रह्मेति प्रतिपत्तिर्मिथ्यैव । तस्माद्युक्तमेवाऽऽहाऽऽचार्यो यदीत्यादि । कदाचिद्यथाश्रुतदुर्विज्ञेयमपि क्षीणदोषः सुमेधाः कश्चित्प्रतिपद्यते कश्चिन्नेति साशङ्क्युक्तं यदीत्यादि । महतीह सूक्ष्मेक्षिका वर्तते । ब्रह्मणा बोधितोऽपि विरोचनो यथावन्न प्रतिपेदे । इन्द्रश्चतु-

र्थपर्याये प्रथमोक्तमेव ब्रह्म प्रतिपेदे लोकेऽप्येकस्माद्गुरोः शृण्वतां कश्चिद्य-
थावत्प्रतिपद्यते कश्चिदयथावत्कश्चिद्विपरीतं कश्चिन्न प्रतिपद्यते । किं पुनर्वक्त-
व्यमतीन्द्रिय आत्मतत्त्वे । सर्वे चात्र तार्किका विप्रतिपन्नाः । तस्मादविदितं
ब्रह्मेति सुनिश्चितोक्तेऽपि विषमप्रतिपत्तित्वाद्यदि मन्यस इति साशङ्कं वचनं
युक्तमेवाऽऽचार्यस्य । दहरं दभ्रमल्पमेवापि नूनं त्वं वेत्थ जानीषे ब्रह्मणो
रूपम् । किमनेकानि रूपाणि महान्ति दभ्रकाणि च येनाऽऽह—दभ्रमेवेत्या-
दि । बाढम् । अनेकानि हि नामरूपोपाधिकृतानि ब्रह्मणो रूपाणि न
स्वतः । स्वतस्तु " अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च
यत् " इति शब्दादिभिः सह रूपाणि प्रतिषिध्यन्ते । न केवलं श्रोत्रस्य
श्रोत्रमित्याद्यध्यात्मोपाधिपरिच्छिन्नमुपदिष्टमेव ब्रह्मणो रूपमल्पं वेत्थ । किंतु
यदस्य ब्रह्मणो देवेषु रूपमधिदैवमिति यावत् । अधिदैवोपाधिपरिच्छिन्न-
स्य ब्रह्मणो यद्रूपं वेत्थ तदपि दभ्रमेव वेत्थेत्यहं मन्ये । यदध्यात्मं यदपि
च देवेष्वधिदैवतोपाधिपरिच्छिन्नं तदपि तत्त्वतो न सहसा वेदितुं शक्यम् ।
यत्तु विध्वस्तसर्वोपाधिविशेषं शान्तमनन्तमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म
तत्कथं सुवेद्यमित्यभिप्रायः । यत एव मत्थ नु हीनं तस्मान्मन्येऽ-
द्यापि मीमांस्यं विचार्यमेव तव ब्रह्म । एवमाचार्योक्तः शिष्य एकान्त उप-
विष्टः सन्यथोक्तमाचार्येणाऽऽगममर्थतो विचार्य तर्कतश्च निर्धार्य स्वानुभवं
कृत्वाऽऽचार्यसकाशमुपगम्योवाच—मन्ये विदितमिति । अथ त्वं मन्यसे मया
विदितं ब्रह्मेति । अथवा देवेष्वग्न्यादिषु सूक्ष्मबुद्धिष्वपि यो मन्यते सुवेदा-
हमिति सोऽप्यस्य ब्रह्मणो रूपं दभ्रमेव वेत्ति नूनं किं पुनर्वक्तव्यमल्पबुद्धिषु
मानवेषु । तस्मान्मीमांस्यमेवेत्युक्तः शिष्य आह मन्ये विदितमित्येवं योज्यम् ।
अथवाऽध्यात्ममधिदैवं च यदस्य ब्रह्मणो रूपं सोपाधिकं त्वया विदितं
तद्दहरमल्पमेव न तु परं भूमाख्यं तत्तु ते मीमांस्यमेवास्तीत्युक्तः शिष्य
उपाधिं परित्यज्यानुभवेन निश्चित्याऽऽह मन्ये विदितमित्येवं योज्यम् । अथ
न्विति हेतुर्मीमांसायाः । सुविदितरूपं कस्मादभ्रमन्यदेव तद्विदितादित्युक्त-
त्वात् । मन्ये विदितमिति शिष्यमीमांसानन्तरोक्तिरागमाचार्यानुभवलक्षणप-
त्ययत्रयस्यैकविषयत्वेन संगत्यर्थम् ॥ १ ॥

आचार्यात्मानुभवयोस्तुल्यत्वे हेतुमाह—मन्ये सुवेदेति । × अहेत्यवधारणे ।
नैव मन्ये सुवेद ब्रह्मेति । नैव तर्हि त्वया विदितं ब्रह्मेत्युक्त आह—नो न

× मूले नाहमित्यत्र नाहेति पाठानुरोधेवेदम् ।

वदेति वेद चेति । नाह मन्ये सुवेदेति विदितादन्यत्वमुक्तं नो न वेदेति चाविदितादन्यत्वमुक्तं वेद चेति वेदैव । ननु विप्रतिषिद्धमिदं न सुवेद वेद चेति । एकस्मिन्विषये वेदनावेदनयोर्विरोधात् । नैष दोषः । विदिताविदितान्यत्वेन स्वप्रकाशावेदनपरत्वात् । फलव्याप्यत्वासंभवेऽपि चरमान्तःकरणवृत्तिव्याप्तत्वाङ्गीकारात् । आत्मप्रकाशे प्रकाशान्तरानपेक्षणात् । विषयाकारान्तःकरणवृत्तिप्रतिबिम्बितं चैतन्यं फलं घट इवाऽऽत्मप्रकाशे स्वप्रकाशत्वेन प्रतिबिम्बानपेक्षणात् । इदानीमात्मने(नो) ब्रह्मविद्याया दृढनिश्चयतां दर्शयन्गर्जति यो न इति । नोऽस्माकं सब्रह्मचारिणां मध्ये य उक्तं तद्वचनं तत्त्वतो वेद स एव तद्ब्रह्म वेद नान्यः । किं पुनस्तद्वचनमत आह— नो न वेदेति वेद चेति । अन्यदेवेत्यादिनोक्तं वस्त्वनुमानानुभवाभ्यां संयोज्य निश्चितं नो न वेदेति वेद चेत्यनेन वाक्येनाऽऽचार्यबुद्धिसंवादार्थं मन्दबुद्धिग्रहणव्यपोहार्थं च मयोक्तं ब्रह्म । एतद्वाक्यमर्थतो यो वेद स एव ब्रह्म वेद नान्य इत्यर्थः ॥ २ ॥

आख्यायिकोपसंहारार्थं श्रुतिः स्वेन रूपेण समस्तसंवादनिर्वृत्तमर्थमवधारयति- यस्यामतमिति । यस्यायमात्मतत्त्वनिश्चयफलावसानावबोधतया विविदिषा निवृत्ता तस्य मतं तेन ज्ञातम् । " मतिबुद्धिपूजार्थेभ्यश्च " इति क्तः । " क्तस्य च वर्तमाने " इति कर्तरि षष्ठी । विद्वदविदुषोर्यथोक्तौ पक्षावव धारयति— अविज्ञातमिति । अविज्ञातं विज्ञाताद्विदितादन्यदेव ब्रह्म विजानतां सम्यग्दर्शिनाम् । विज्ञातं विदितं ब्रह्माविजानतामसम्यग्दर्शिनाम् । इन्द्रियमनोबुद्ध्युपाधिष्वात्मदर्शिनां ब्रह्मोपाधिविवेकानुपलम्भाद्बुद्ध्युपाधेश्च विज्ञातत्वाद्विज्ञातं ब्रह्मेत्युपपद्यते भ्रान्तिः । न त्वत्यन्तमूढानामियं भ्रान्तिरतोऽसम्यग्दर्शनपूर्वपक्षत्वेनोपन्यस्यते । हेत्वर्थे वोत्तरार्धः ॥ ३ ॥

यदि ब्रह्मात्यन्तमेवाविज्ञातं तर्हि लौकिकानां ब्रह्मविदां चाविशेषः प्राप्तोऽविज्ञातं विजानतामिति च परस्परविरुद्धम् । कथं च ब्रह्म सम्यग्विदितं भवतीत्येवमर्थमाह—प्रतिबोधेति । बोधं बोधं प्रति विदितं बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते । यस्य सर्वे प्रत्यया विषयी भवन्ति स आत्मा सर्वबोधान्प्रतिबुध्यते सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्येष्वविशिष्टतया लक्ष्यते नान्य*द्द्वारान्तरमात्मविज्ञानाय । अतः प्रत्ययप्रत्यगात्मतया यदा विदितं ब्रह्म तदा तन्मतं तत्सम्यग्दर्शनमित्यर्थः । यद्वा गुरूपदेशः प्रतिबोधस्तेन विदितं मतम् । अमृतत्वं हि विन्दत इति हेतुवच-

* अन्यादित्यधिकमिव भाति ।

मम् । विषयात्मविज्ञाने(नं) हि मृत्युमारभत इत्यात्मविज्ञानममृतत्वनिमित्त-मिति युक्तं हेतुवचनम् । कथमात्मविज्ञानेनामृतत्वं विन्दतेऽत्र आह—आत्म-नोति । स्वेन रूपेण विन्दते लभते वीर्यं बलं सामर्थ्यम् । धनसहायमन्त्रौष-धितपोयोगकृतं वीर्यं मृत्युं नाभिभवितुं शक्नोति । अनित्यवस्तुकृतत्वात् । आत्मविद्याकृतं तु वीर्यमात्मनैव विन्दते नान्येनेत्यतस्तदेव वीर्यं मृत्युं शक्नो-त्यभिभवितुम् । यत एवमात्मविद्याकृतं वीर्यमात्मनैव विन्दतेऽतो विद्ययाऽऽ-त्मविषयया विन्दतेऽमृतम् । "नायमात्मा बलहीनेन लभ्यते(भ्यः)" इति श्रुतेः सामर्थ्यं हेतुरमृतत्वे ॥ ४ ॥

कृष्टा खलु संसारगतिरत इहैव चेद्यदि मनुष्योऽधिकृतः समर्थः सन्नवेदी-दात्मानं यथोक्तलक्षणं विदितवान् । अथ सत्यं परमार्थतत्त्वमस्त्यवाप्तं तस्य जन्म सफलमिति भावः । चेन्नावेदीन्महती विनष्टिर्महान्विनाशो जन्ममरण-प्रबन्धाविच्छेदलक्षणः स्यात् । ज्ञाते किं स्यादत आह—भूतेषु भूतेषु चरा-चरेषु विचित्य पृथक्कृत्यैकमात्मतत्त्वमात्मभावेनोपलभ्य धीरा धीमन्तो विवेकिनः प्रेत्य व्यावृत्त्यास्माल्लोकाच्छरीराद्व्यावृत्तमस्त्वाहंकाराः सन्तोऽ-मृता नित्यविज्ञानामृतत्वस्वभावा भवन्ति ॥ ५ ॥

इति नारायणविरचितायां केनोपनिषद्दीपिकायां द्वितीयः खण्डः ॥ २ ॥

समाप्ता ब्रह्मविद्याऽत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यतेऽधिकय-त्नाय । शमाद्यर्थो वाऽऽम्नायोऽभिमानशातनात् । व्यावृत्तबाह्यमिथ्याप्रत्यय-ग्राह्यत्वाद्ब्रह्मणः । " नेदं यदिदमुपासते " इत्यपोदितत्वात्सगुणब्रह्मोपास-नार्थो वा । तस्यैव ब्रह्मणः सगुणत्वेनाध्यात्ममधिदैवं चोपासनं विधातव्य-मित्यर्थः । ब्रह्म, ईश्वरः । को ह्यन्यस्तृणं वज्रीकर्तुं क्षमः । ह, ऐतिह्ये । देवासुरसंग्रामे देवेभ्योऽर्थाय विजिग्येऽजैषीदसुरान् । ब्रह्मण इच्छानिमित्तो देवानां विजयो बभूवेत्यर्थः । तस्येति ब्रह्मणो विजये ब्रह्मकर्तृके स्वोत्कर्षे सति यज्ञादिलोकस्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धिं पूजां वा प्राप्न-वन्तः । त ऐक्षन्ताऽऽलोचितवन्तो मिथ्याप्रत्ययत्वाद्धेयख्यापनार्थोऽयमाम्ना-यः । किमालोचितवन्त ईश्वरनिमित्ते विजये सति स्वसामर्थ्यनिमित्तोऽस्मा-कमेवायं विजयोऽस्माकमेवायं महिमेति सर्वकल्याणास्पदमीश्वरमात्मानम-बुद्ध्वा पिण्डमात्राभिमानाः सन्तः ॥ १ ॥

तद्ब्रह्म ह किलैषां देवानामभिप्रायं मिथ्याहंकाररूपं विजज्ञौ ज्ञातवत् । ज्ञात्वा च मिथ्याभिमानशातनेन तदनुजिघृक्षया तेभ्यो देवेभ्योऽर्थाय तेषा-

मेवेन्द्रियगोचरे नातिदूरे प्रादुर्बभूव महेश्वरशक्तिमायोपाधिनास्यन्ताद्भुतेन केनचिद्रूपेण प्रादुर्भूतं तत्किलोपलभमाना अपि देवा न व्यजानत न विज्ञातवन्तः। किमिदं यदेतद्यक्षं पूज्यमिति। यजेरौणादिकः सः॥ २॥

ते तद्विज्ञानायाग्निमब्रुवन्। अभ्यद्रवच्छीघ्रं गतः। तमभ्यवदद्ब्रह्म। किम्। कोऽसीति। पृष्टेऽग्निर्वै जातवेदा वा इति नामद्वयेनाऽऽत्मानं श्लाघयन्नग्निरब्रवीत्। एवमुक्तवन्तं ब्रह्मोवाच। तस्मिन्नेवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यमिति। सोऽब्रवीदपीदमित्यादि। पृथिव्यामित्युपलक्षणमन्तरिक्षस्थस्यापि। एवमभिमानवते ब्रह्म तृणं निदधौ पुरः स्थापितवत्। एतत्तृणमात्रं ममाग्रतो दह न चेद्दग्धुं समर्थो मुञ्च सर्वत्र दग्ध्वाभिमानमित्युक्तस्तत्तृणमुपप्रेयाय तृणसमीपं गतवान्सर्वजवेन सर्वोत्साहकृतेन वेगेन। गत्वा न शशाक नाशकद्दग्धुं सोऽग्निस्तत एव तृणदाहाशक्तेरेव व्रीडित्वा निवृत्ते निवृत्तः सन्देवानवोचन्नैतदिति॥ ३॥ ४॥ ५॥ ६॥

अथानन्तरं वायुमब्रुवन्नित्यादि पूर्ववत्। वानाद्गमनाद्वायुः। मातर्वन्तरिक्षे श्वयति वर्धत इति मातरिश्वा। आददीय ग्रहीषाम्। तृणनिधानेऽयमभिप्रायः। अत्यन्तसंभावितयोरग्निमारुतयोस्तृणदहनादानशक्त्याऽऽत्मसंभावना शातिता भवेदिति। तस्मादिन्द्रात्तिरोदधे। तिरोधानेऽप्ययमभिप्राय इन्द्रोऽहमित्यधिकतमोऽभिमानो यस्य सोऽहमग्न्यादिभिः प्राप्तं वाचा संभाषणमात्रमप्यनेन न प्राप्तोऽस्मीत्यभिमानं कथं न नाम जह्यादिति। तदनुग्रहायैवान्तर्हितं बभूव। स शान्ताभिमान इन्द्रोऽत्यर्थं ब्रह्म जिज्ञासुर्यस्मिन्नाकाशे ब्रह्मणः प्रादुर्भाव आसीत्तिरोधानं च तस्मिन्नेवाऽऽकाशे तस्थौ किं तद्यक्षमिति ध्यायन्न निवृतेऽग्न्यादिवत्। तत इन्द्रस्य यक्षे भक्तिं दृष्ट्वा विद्या प्रादुरासीत्। सा स्त्रियमतिरूपिणीं विद्यामाजगाम। रुद्रस्योमा हैमवती बहुशोभमानाऽभिप्रायबोधहेतुत्वाद्विद्यैव सा तां ह प्रसिद्धामुवाच किमिदं यक्षम्। इति वाक्यसमाप्तौ॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥

इति नारायणविरचितायां केनोपनिषद्दीपिकायां तृतीयः खण्डः॥ ३॥

सा तं ब्रह्मेति होवाच। सा हि नित्यमेवेश्वरेण सर्वज्ञेन सह वर्तत इति ज्ञातुं समर्था। ब्रह्मण ईश्वरस्य वै विजये महीयध्वमीश्वरेण हि जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणम्। युष्माकं तु मिथ्याभिमानोऽस्माकमेवायं विजय इति। ततस्तस्मादेवोमावाक्याद्धैव विदांचकार ब्रह्मेतीन्द्रः। ततो हैवेत्यवधारणं ब्रह्मात्मबोधे स्वातन्त्र्यनिरासाय॥ १॥

तस्माद्वा इति । यस्मादग्निवायविन्द्रा ब्रह्मणा संवाददर्शनादिना सामीप्यमुपगतास्तस्मात्स्वैर्गुणैरतितरामिव शक्तिगुणादिमहाभाग्यैरन्यान्देवानातिशेरत इव । इवशब्दोऽवधारणे । अतिशेरत एते हि देवा यस्मादेनद्ब्रह्म नेदिष्ठमन्तिकतमं पस्पृशुः स्पृष्टवन्तः । यथोक्तैर्ब्रह्मणः संवादादिप्रकारैस्ते हि यस्माच्च हेतोरेतद्ब्रह्म प्रथमः प्रथमाः प्रधानभूताः सन्तो विदांचकार विदांचक्रुरेतद्ब्रह्मेति ॥ २ ॥

यस्मादग्निवायू अपीन्द्रवाक्यादेव विदांचक्रतुः । इन्द्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्म । तस्माद्वा इन्द्रोऽतितरामिवातिशयेन शेत इवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श । यस्मात्स ह्येनत्प्रथमो विदांचकार ब्रह्मेत्युक्तार्थम् ॥ ३ ॥

तस्य प्रकृस्य ब्रह्मण एष आदेश उपदेशो निरुपमस्य ब्रह्मणो येनोपमा स एष पदार्थ इत्यर्थः । किं तत् । यदेतत्प्रसिद्धं लोके विद्युतो व्यद्युतत्प्रत्यगार्थोऽविवक्षितो देवेभ्यो ब्रह्म तिरोभूतम् । अथवा विद्युतस्तेज इत्यध्याहार्यम् । व्यद्युतद्विद्योतितवदा इव विद्युतस्तेजः सकृद्विद्योतितवदिवेत्यर्थः । इतिशब्द आदेशप्रतिनिर्देशार्थः । इत्ययमादेश इति । इच्छब्दः समुच्चयार्थः । अयं चापरस्तस्याऽऽदेशः । कः । न्यमीमिषत् । स्वार्थे णिच् । उपमार्थ एवाऽऽकारः । चक्षुषो विषयं प्रति प्रकाशतिरोभाव इवेत्यर्थः । अथवोपमानद्वयेन ब्रह्मणो ज्ञानशक्तिक्रियाशक्ती क्रमेण दर्शिते । इत्यधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम् ॥ ४ ॥

अथाध्यात्मं प्रत्यगात्मविषय आदेश उच्यते । यदेतद्ब्रह्म गच्छतीव च मन उपढौकत इव विषयी करोतीव चैष आदेशः । तस्मायःपिण्डवन्मनोवृत्तिमात्रस्य स्फुरणाविष्टत्वात् । अन्यथाऽऽकारमात्रस्य जडत्वेनैव मानानुपपत्तेः । साधकस्य विषयासक्तावपि ब्रह्माविस्मरणेऽयं हेतुरित्याह-अनेन च मनसो ब्रह्ममनेनैतद्ब्रह्मोप स्वसमीप एव स्मरति चिन्तयति न विस्मरत्यभीक्ष्णं निरन्तरम् । संकल्पः संकल्पयतीति संकल्पः । संकल्पविकल्पौ मनोवृत्ती कुर्वन्नपि साधक एषोऽध्यात्मसमुपदेशः । यद्वैषोऽभीक्ष्णं संकल्पो मनसो ब्रह्मविषय इत्युपदेशः । अधिदैवं विद्युदुन्मेषणवद्द्युतं प्रकाशधर्मि ब्रह्माध्यात्मं च मनःप्रत्ययसमकालाभिव्यक्तिधर्मीत्येष आदेशः । एवमादिश्यमानं हि ब्रह्म मन्दबुद्धिगम्यं भवति । न हि निरुपाधिकमेव ब्रह्म मन्दबुद्धिभिराकलयितुं शक्यम् ॥ ५ ॥

तस्य नामाऽऽह—तद्ध तद्वनं नाम ब्रह्म । ततः किमत आह—तद्वनमित्युपासितव्यमिति । नाम्नोपासनायायमुपदेशः । तस्य प्राणिजातस्य वनं संभज-

नीयम् । "वन संभक्तौ" संभक्तिः सम्यक्सेवा । तदुपासनेन तदेव फलं भवतीत्याह—स य एतदेवमिति । वेदोपास्ते । अभिसंवाञ्छन्ति इ प्रार्थयन्त एव यथा ब्रह्म ॥ ६ ॥

एवमनुशिष्टः शिष्य आह—उपनिषदं भो इति । आचार्य आह—उक्तेति । का पुनः सेत्यत आह—ब्राह्मीमिति । ब्रह्मणः परमात्मन इयं ताम् । एतावत्येवेयमुपनिषदन्यनिरपेक्षाऽमृतत्वायोक्ता । इतिशब्दो विद्यासमाप्तौ ॥ ७ ॥

उपनिषदं भो ब्रूहीति प्रश्नसार्थकत्वायोक्तायाः उपनिषदः प्राप्त्युपायभूतानि तपआदीनि विद्याङ्गरूपकेणाऽऽह—तस्या इति । कायेन्द्रियमनसां समाधानं तपः । उपशमो दमः । अग्निहोत्रादि कर्म । इतिशब्द आद्यर्थे । अमानित्वमदम्भित्वमित्यादीन्यपि । प्रतिष्ठा पादौ पादाविवास्या विद्यायास्तेषु हि सत्सु प्रतितिष्ठति ब्रह्मविद्या पद्भ्यामिव पुरुषः । तपआदीनां विद्यासाधनत्वं श्वेताश्वतरमन्त्र उक्तम्—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ।

स्मृतौ च—ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ॥ इति ।

वेदाः साङ्गाश्चत्वारः सर्वाणि शिरःपाण्यादीन्यङ्गानि । सत्यममायितामकौटिल्यं च वाङ्मनःकायानां तदायतनमाश्रयो विद्यायास्तपआदिष्वेव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्वप्रदर्शनार्थम् ।

अश्वमेधसहस्रं तु सत्यं च तुलया धृतम् ।
अश्वमेधसहस्रात्तु सत्यमेकं विशिष्यते ॥ इति स्मृतेः ॥ ८ ॥

अमृतत्वं हि विन्दत इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगमयति—यो वा इति । एतां केनेषितमित्याद्यां ब्रह्म देवेभ्य इत्यादिना स्तुताम् । पाप्मानमविद्याकामकर्मलक्षणं संसारबीजम् । अनन्तेऽपर्यन्ते स्वर्गे लोके सुखात्मनि ब्रह्मणि ज्येये ज्यायसि सर्वमहत्तरे । स्व आत्मनि प्रतितिष्ठति न पुनः पुनः संसारमापद्यते । द्विरुक्तिः समाप्त्यर्था ॥ ९ ॥

इति नारायणविरचितायां केनोपनिषद्दीपिकायां चतुर्थः खण्डः ॥ ४ ॥

नारायणेन रचिता शंकरोक्त्युपजीविना ।
अस्पष्टपदवाक्यानां केनेषितमदीपिका ॥
समाप्तेयं नारायणकृता तलवकारोपनिषदपरपर्यायकेनोपनिषद्दीपिका ॥